# प्रौढभागवतम् -भाग-2



सम्पादकः
डा. आर् विठोबाचार्यः

प्रकाशनम्
वेद-वेदान्ताध्ययनशोधसंस्थानम्
वसन्तकुञ्ज, नवदेहली

विश्वविद्याग्रन्थमाला-22

वेदवेदान्ताध्ययनशोधसंस्थानम्

श्रीविश्वनन्दनतीर्थविरचितं

# प्रौढभागवतम्-भागः-2

सम्पादकौ

वि। प्रदीपसिंहाचार्यः चतुर्वेदः

डा। आर् विठोबाचार्यः

प्रकाशकः

वेद-वेदान्ताध्ययनशोधसंस्थानम्.

वसन्तकुञ्ज,नवदेहली.

2023

**विश्वविद्याग्रन्थमाला- 22**

# प्रौढभागवतम् - 2

**श्रीविश्वनन्दनतीर्थविरचितम्**


**सम्पादकौ** : वि । प्रदीपसिंहाचार्यः चतुर्वेदः
डा । आर् विटोबाचार्यः



**प्रकाशनम्** : वेद-वेदान्ताध्ययनशोधसंस्थानम्.
वसन्तकुञ्ज, नवदेहली.

**प्रथममुद्रणम्** : **2023**

ISBN : **978-81-978406-0-9**

**पृष्ठसङ्ख्या** : **194+12**

**प्रतयः** : 250

**मूल्यम्:** 100 **रूप्यकाणि**

**मुखचित्रविन्यासः** रघुनन्दनः

**मुद्रणम्** : वागर्थ. बेङ्गलूरु

## जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्
(पेजावरअधोक्षजमठः,उडुपी)

# श्रीविश्वप्रसन्नतीर्थश्रीपादानाम् अनुग्रहसन्देशः

निगमकल्पतरोर्गलितं फलं श्रीमद्भागवतं महापुराणं निखिलवेदान्तसारसर्वस्वं वर्तते। अत्रत्यं प्रतिपदं श्रीकृष्णपरमात्मनः दिव्यगुणान् प्रस्तौति। तादृशस्य भागवतस्य गभीरार्थबोधनं सामान्यानां कृते दुष्करम्।

अत्यन्तं सन्तोषस्य विषयोऽयं यत् 'वेदवेदान्ताध्ययनशोधसंस्थान'स्य पक्षतः 'प्रौढभागवतम्' इति ग्रन्थस्य द्वितीयभागः सम्प्रति प्रकाशपदवीं नीतः। अस्य ग्रन्थस्य प्रणेतारः श्रीविश्वनन्दनतीर्थश्रीपादाः। तैः अत्र भागवतस्य कानिचन अतिविशिष्टानि श्लोकानि सङ्गृह्य, तेषां कृते अत्यन्तं संक्षिप्ता, प्रमेयबहुला, अपूर्वा च व्याख्या विलिखिता। इयं व्याख्या अल्पाक्षरैः अनल्पमर्थं प्रकाशयन्ती विदुषां मुमुक्षूणां च महते उपकाराय कल्पते। ग्रन्थस्यास्य सम्पादनकार्यं विद्वद्भिः प्रदीपसिंहाचार्यैः तथा डा। विटोबाचार्यैः अत्यन्तं श्रद्धया कृतम्। तदीयं परिश्रमं संस्थानस्य सेवां च वयं श्लाघयामः।

शोधसंस्थानमिदं निरन्तरं दुर्लभग्रन्थानां प्रकाशनेन सनातनधर्मस्य महतीं सेवां कुर्वदस्ति। अनेन सत्कार्येण भगवान् श्रीकृष्णः मुख्यप्राणान्तर्गतः प्रीयताम्। सर्वेषां च ज्ञानिनामन्तःकरणे भक्तिज्ञानवैराग्याणि वर्धन्तामिति भगवच्चरणारविन्दयोः प्रार्थयामः।

इत्यनेकनारायणस्मरणानि

**श्रीविश्वप्रसन्नतीर्थश्रीपादाः**

पीठाधिपतयः पेजावरअधोक्षजमठः,उडुपि

श्रीलक्ष्मीहयग्रीवो विजयते

## श्रीश्रीविश्वनन्दनतीर्थश्रीपादाः

(श्रीक्षेत्रहनसोगे मध्वमठः.दोड्डहनसोगे.)

# अनुग्रहसन्देशः

'श्रीमद्भागवतं पुराणममलम्' इत्याद्युक्तदिशा श्रीमद्भागवतपुराणं पुराण राजत्वेन प्रसिद्धम्। तत्रत्यकथासङ्ग्रहात्मकं बालबोधाय कर्नाटकभाषायां रचितं बालभागवतं पुरा प्रकाशितम्। इदानीं विद्वज्जनोपकाराय भागवतोक्तप्रमेयसङ्ग्रहात्मकं प्रौढभागवतं प्रकाशं लभते।

अत्र भगवत्पादैः, टीकाकृद्भिः, श्रीद्विजयध्वजश्रीमच्चरणैः, अस्मद्गुरुचरणैश्चोक्तानां प्रमेयानां नातिविस्तरः सङ्ग्रहः कृतः। सर्वेषां प्रमेयानां सङ्ग्रहे देवा एवाधिक्रियन्ते। वयं तु यथाशक्ति कतिपय-प्रमेयसङ्ग्रहेणैव कृतार्था इति मन्यामहे। प्रत्यध्यायं भगवन्निष्ठत्वमपि प्रदर्शितम्। इतः पूर्वं प्रकाशिते विजयध्वजीयसमेते श्रीमद्भागवते तत्रतत्र 'इदमस्पष्टम्' इति यत्सूचितं तत्स्पष्टीकरणेऽपि प्रयत्नः कृतः ।

भाषात्रयाविदुषां सखित्वेन वर्णितं श्रीमद्भागवततात्पर्यनिर्णय-मुपजीव्य केवलं भगवत्प्रीत्यै प्रमेयसङ्ग्रहे यतितम्। वैदुष्यभ्रान्त्या वा पदार्थवर्णने कौशलप्रघटनाय वा न वयं प्रवृत्ता इति निवेदयितु-मुत्सहामहे ।

अस्मच्छिष्यवर्गयाञ्चया, श्रीमद्देवेन्द्रतीर्थश्रीमच्चरणानामाशयं ज्ञातु-कामानां विदुषां चोदनेन चानेकवर्षपर्यन्तं कृतश्रमस्य परिपाकोऽयं ग्रन्थ इति ज्ञापयामहे। यदि विदुषोऽत्रोक्तप्रमेयावगाहनेन सन्तुष्येयुस्तर्हि

श्रम आस्माकः सार्थको जात इति वयमपि सन्तुष्यामहे ।।

कीटराज्यप्रदायी भगवान् बादरायणो श्रीमन्मध्वाद्यस्मद्देशिक-पर्यन्तान्तर्यामी कीटमणिप्रभायितज्ञानस्यापि मम आयुरारोग्यज्ञान-प्रदानेनैतद्ग्रन्थग्रथनपाटवदानेन चानुगृहीतवानिति ग्रन्थपूरणरूपकार्या-नुमानेनावगम्यते ।

आमूलाग्रं भागवतमध्यापितवतोऽस्मद्विद्यागुरून् श्रीश्रीदेवेन्द्रतीर्थ-श्रीमच्चरणान् प्रणमन्तः श्रीमद्विजयध्वजाधिष्ठितश्रीमदधोक्षजतीर्थीय-श्रीपेजावरमठाधीशानस्मद्गुरून् श्रीश्रीविश्वेशतीर्थश्रीमच्चरणान् प्रवन्द-मानाः, एतद्ग्रन्थसम्पादने कृतपरिश्रमं विदुषं प्रदीपसिंहाचार्यमभिनन्दन्त उपरमामहे ।

इति नारायणस्मृतयः

श्रीश्रीविश्वनन्दनतीर्थश्रीपादाः

# निदेशकस्य पुरोवाक्

श्रीमद्भागवतं महापुराणं तु निखिलनिगमसारभूतं, भक्तिज्ञानवैराग्याणां पावनगङ्गाप्रवाहस्वरूपं च वर्तते। अस्मिन् ग्रन्थराजे विद्यमानानां गूढार्थानां प्रकाशनेन मुमुक्षूणां महान् उपकारो भवति।

अत्यन्तं हर्षस्य विषयोऽयं यत् 'वेदवेदान्ताध्ययनशोध'संस्थानस्य पक्षतः 'प्रौढभागवतम्' इति ग्रन्थं विदुषां पुरतः उपस्थापयामः। अस्य ग्रन्थस्य प्रणेतारः श्रीविश्वेशतीर्थश्रीपादैः अधिगतप्रणवोपदेशाः श्रीमन्माध्वयतिपरम्परायाः सुप्रसिद्धाः ज्ञानिनः श्रीविश्वनन्दनतीर्थाः। तैः अत्र श्रीमद्भागवतस्य कतिपयानां विशिष्टानां श्लोकानां चयनं कृत्वा, तेषां कृते अत्यन्तं संक्षिप्ता किन्तु अपूर्वा, प्रमेयबहुला च व्याख्या विरचिता अस्ति। इयं व्याख्या जिज्ञासूनां कृते भागवतस्य गभीरार्थबोधने प्रदीपप्रायः वर्तते। पूर्वमस्य ग्रन्थस्य प्रथमभागः प्रकाशितः । इदानीं षष्टस्कन्धमारभ्य द्वादशस्कन्धपर्यन्तः द्वितीयभागः प्रकाशनाय सन्नद्धः । ग्रन्थस्यास्य संपादन-कार्यं विद्वद्भिः प्रदीपसिंहाचार्यैः अत्यन्तं परिश्रमेण निर्व्यूढमस्ति। तेषां सेवा अस्माकं संस्थायाः कृते श्लाघनीया।

अस्माकं शोधसंस्थानं सदैव तादृशानां दुर्मिलग्रन्थानां प्रकाशने कटिबद्धं वर्तते येन सनातनधर्मस्य, विशेषतः द्वैतवेदान्तसाहित्यस्य संरक्षणं संवर्धनं च भवेत्। अनेन ग्रन्थप्रकाशनेन अध्येतारः भागवततत्त्वं सुलभतया अवगन्तुं समर्थाः भवेयुरिति अस्माकं दृढविश्वासः। अस्य ग्रन्थस्य मुद्रणे संशोधने च ये साहाय्यं कृतवन्तः, तेभ्यः सर्वेभ्यः कार्तज्ञ्यं निवेदयामि।

**डा. विठोबाचार्यः**

# प्राग्वचनम्

ग्रन्थमिममधिकृत्य वक्तव्यं सर्वमपि गुरुपादैरेवोक्तम्। तथापि श्रीमद्भगवतो महाकारुणिकस्यानुग्रहलेशं कामयमानोऽयं जनः किञ्चिद्वक्तुं प्रयतत इति सर्वथा अनुग्राह्यः सहृदयैर्वाचकैरिति सादरमभ्यर्थये ।।

भागवतमूलपाठविषये वक्तव्यं किञ्चित्। पञ्चसप्ततिशतवत्सरात् पूर्वमेव आचार्यैरवमभ्यधायीति किल कथा सुमध्वविजये पण्डिताचार्यैः प्राकाशि ।।

**'गुरोरुपान्ते श्रवणे रतैर्द्विजैः सपञ्चषैर्भागवते कदाचन ।**

**बहुप्रकारे लिखिते तु वाचिते प्रकारमेकं प्रभुरभ्यधाद् दृढम्।।**

**परप्रकारेष्वपि सम्भवत्सु ते विनिर्णयोस्मिन् कथमित्युदीरिते ।**

**मुकुन्दबोधेन महाहृदब्रवीत् प्रकारमेकं भगवत्कृतं स्फुटम्'** इति ।।

तेनायमेव शुद्धपाठ इति न किल निर्धारितुं प्रभवाः स्मो वयम्। अद्यावधिमुद्रितेषु वैष्णवपाठत्वेन मन्यमानेष्वपि सर्वेषु भागवतपुस्तकेषु सर्व-मूलोदाहृतभागवतपाठानुगुण्यादर्शनात्। यथा चतुर्थस्कन्धे प्रथमे 'दत्तं दुर्वाससं सोममात्मेशब्रह्मसम्भवान्' इति प्रचलितः। 'दत्तं दुर्वाससं सोमं जज्ञे पुत्रानकल्मषान्' इति भगवानाचार्यः अनुव्याख्याने। यथा वा 'वासुदेवे परे तत्वे' इति गीताभाष्ये। 'वासुदेवे परे तत्वे' इति तु प्रचलितः। तेनात्र कचिदुपलभ्यमानपाठविसंवादेपि नात्र मूलपाठगवेषणावसरः ।।

कानिचन प्रौढभागवतोक्तप्रमेयाणि रुच्यर्थं सूच्यन्ते।

द्वितीयस्कन्धे -नाभ्यां स्थितमिति पद्ये विस्तरेण नाडीसङ्ख्यासंयोजन-क्रमः, तृतीये द्वाविंशाध्याये प्रजाः सृजेति श्लोके काम्यकर्मविचारः, 'स्नातं कृतशिरःस्नानम्' इत्यत्र चतुर्विंशे सुमङ्गलीनामाचरणविचारः, चतुर्थे

पुरञ्जनकथायां आध्यात्मिकार्थसङ्ग्रहः। पञ्चमे भूमण्डल- खगोलादिविचार इत्यादिष्वाविष्कृतः प्रमेयविचारः ।।

अस्मदध्ययनावसरे गुरुभिरभिहितान् द्वित्रान् प्रमेयानुपस्थाप्योपरम्यते। तृतीये 'अव्यक्ताद्याः पृथिव्यन्ताः सर्वाः प्रकृतयः' इत्युक्तम्। प्रकृत्युपादानकः सर्गः प्राकृत इत्यप्युक्तम्। किन्तु महदहङ्कारेन्द्रियभूतानां सृष्टिः प्राकृतत्वेन वर्ण्यते। तत्कथमिति। प्रकृतित्वेनोक्तानामेव प्राकृतत्वं कथमिति प्रश्नाभिप्रायः। समाधानं तु -प्रकृतिभूतस्याव्यक्तस्य कालस्वरूपत्वात् महत्तत्त्वं प्राकृतमुच्यते ।

प्रकृतिभूतस्य महतः(विकारात्) कार्यत्वात् अहङ्कारं प्राकृतमित्युच्यते। प्रकृतिभूताहङ्कारोपादानकत्वात् इन्द्रियाणि भूतानि च प्राकृतानीच्युच्यन्त इति।।

अपरं च - अष्टादशाध्याये तृतीये दिवि उत्पातोल्लेखः। अत्र न द्युशब्दार्थः स्वर्गः। स्वर्गीयोत्पातानां कुत्राप्यनुल्लेखात् तेषां दर्शनासम्भवाच्च। तथाच 'सहस्रधनुषस्तूर्ध्वं द्युशब्देनापि भण्यते' इत्युक्तेरन्तरिक्षोपरितनभागः द्युस्थानीयः । सूत्रभाष्योक्तदिशा द्युस्थितत्वदिवःपरत्वयोरिव। अन्तरिक्षभागीयोत्पाताः महातडिदायो ग्राह्याः ।।

किञ्च दक्षाध्वरप्रसङ्गे 'वपुरानन्दकरम्' इतीन्द्रस्तुतिः। येषां यावद्रूपापरोक्षदर्शनयोग्यता तावद्रूपाभेददर्शनमपि भवति। तथा तद्गतगुणक्रियाजात्यादीनामपि। यथा अद्वैताचार्यस्य वेदव्यासश्रीरूपदर्शनेपि नान्यरूपदर्शनयोग्यता। स्वाभेदो हि धर्मविशेषः। तेन न सर्वेषां तदवकाशः।।

इत्याद्यनेकप्रमेयाणि गुरुमुखादेव अध्येतव्यानि। अत एव 'शुकमध्यापयामास' इति पौराणिकी वाक् ।।

अत्रापि प्रमेयनिरूपणावसरे इति गुरुपादाः, गुरुमुखादेवावगन्तव्यम् इत्यादि। निर्मत्सरसदाधिकारिकोऽयं प्रौढभागवताख्यो ग्रन्थवरः नूनमुपाकरोति सर्वेषां भागवतीयप्रमेयपीयूषजुषामिति नास्त्यत्र संशयलेशः ।।

अध्ययनसौकर्याय प्रायः सन्धिविच्छेदः कृतस्तत्र तत्रेति नात्र विसन्धिप्रयोगदोषगवेषणा ।।

प्रतिश्लोकं प्रतिपदमनेकाकूतिगर्भितं श्रीमद्विजयध्वजीयटीकासाहित्ये-नामलभागवतपुराणम् आमूलाग्रम् उपदेशकान् प्रसङ्गतो दक्षपक्षविहतेन समधिकस्वरश्रिया हंसो मानसात् काकमिव आधुनिक-वैज्ञानिकजं मानसं दोषं विपक्षे बाधकशक्तिपुरस्सरं भीषयतः सुयुक्तिगर्भाभिरुक्तिभिरसकृत्प्रमेयं बोधयतः परमहंसान् अस्मद्गुरुवरान् श्रीविश्वनन्दनतीर्थश्रीमच्चरणान्साष्टाङ्ग-पुरस्सरमभिवादये ।।

बहुशः शोध्यमानेपीत्यलमात्मश्लाघया, किन्तु क्षतिरेकापि क्षतिरेव गुणसन्निपातेष्विति न्यायं मानयंश्चेतसि विलज्जमानोयं साञ्जलि सुचेतसां प्रचेतसां क्षमां याचते ।।

आशासे च विद्वांसः स्वकटाक्षाभिवृष्ट्या गुरूणामेतद्ग्रन्थरचनश्रमं सफलयिष्यन्तीति अलमतिप्रपञ्चितेन वाचाम् ।।

इति विद्वज्जनवशंवदस्य
सि.आर्. प्रदीपसिंहाचार्यस्य

# द्वितीयमुद्रणमधिकृत्य

प्रौढभागवतम् इति ग्रन्थोयम् 2017 मध्ये श्रीहयग्रीवविट्ठलट्रस्ट् पक्षतः मुद्रितम्। तदनु इदानीम् तस्यानुपलभ्यमानत्वात् पुनः वेद-वेदान्ताध्यनशोधसंस्थानपक्षतः सारस्वतलोकं प्रति समर्प्यत इति महान् प्रमोदविषयः। पूर्वप्रकाशने विद्यमानटङ्कणदोषाः अपसारिताः यथामति । विशेषांशा अपि तत्रत्र योजिताः। प्रथमप्रकाशने श्रीविश्वनन्दनतीर्थैः प्रदत्तः अनुग्रहसन्देशः यथावद् योजितः। तथा प्राग्वचनमपि। सहृदयाः विद्वांसः भागवतरसास्वादनेन भगवद्भक्तिभाजना भवेयुरित्याशासाते ।

एतद्ग्रन्थस्य सम्पादने प्रकाशने च पूर्णानुग्रहं कृतवतां श्रीपेजावर-मठाधीशानां श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादानां परमानुग्रहः सर्वदा भूयादिति प्रार्थयावहे ।

**संपादकौ**

(श्रीश्रीविश्वनन्दनतीर्थविरचितं भागवतव्याख्यानम्)

# प्रौढभागवतम्

**द्वितीयभागः**

## षष्ठस्कन्धः

### ।। अथ प्रथमोऽध्यायः ।।

**श्रीशुक उवाच**

**न चेदिहैवापचितिं यथांऽहसः**
**कृतस्य कुर्यान्मनउक्तिपाणिभिः ।**
**ध्रुवं स वै प्रेत्य नरकानुपैति**
**ये कीर्तिता मे भवतस्तिग्मयातनाः ।। ७ ।।**

इहैव अस्मिन् जन्मन्येव । यस्मिन् जन्मनि पापं क्रियते तस्मिन्नेव प्रायश्चित्ते कृते नरकपरिहारः । अन्यथा नरकप्राप्तिरित्यर्थः ।।

**तस्मात्पुरैवाश्विह पापनिष्कृतौ**
**यतेत मृत्योरविपद्यदा(ऽऽ)त्मनः ।**
**दोषस्य दृष्ट्वा गुरुलाघवं यथा**
**भिषक् चिकित्सेत रुजां निदानवित् ।। ८ ।।**

‘दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक्’ इत्यत्रायमभिप्रायः ।। यथा भिषक् रोगस्य गौरवे गुर्वीं चिकित्सां लाघवे लघ्वीमेवं पापस्य गुरुत्वे गुरुप्रायश्चित्तं लाघवे लघ्विति ।।

**राजोवाच**

**दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितम् ।**
**करोति भूयो विवशः प्रायश्चित्तमथो कथम् ।। ९ ।।**

विवशः भगवद्वशः । 'यन्मनोऽनुविधीयते' इति गीतोक्तेः ।।

**केचित्केवलया भक्त्या वासुदेवपरायणाः ।**
**अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ।। १५ ।।**

'केचित् केवलया भक्त्या' इत्यत्र केचित् अल्पसङ्ख्याताः केचन । तप आदिना प्रायश्चित्तं कुर्वाणा बहवः । केवलभक्त्या प्रायश्चित्तं कुर्वाणा विरला इत्यर्थः ।। अत एवात्र 'वासुदेवपरायणाः' इति, उत्तरत्र 'नारायणपरायणाः' इति विशिनष्टि ।।

**ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः ।**
**के यूयं प्रतिषेद्धारो धर्मराजस्य शासनम् ।। ३२ ।।**

'के यूयम्' इत्यत्र यमभटानां सर्वथा विष्णुभटानां ज्ञानं नास्ति इति न । किन्तु चक्रशङ्खादिलक्षणदर्शनेन विष्णुपार्षदत्वज्ञानेऽपि विशेषजिज्ञासायां प्रश्नः ।। अत एव विष्णुदूतैर्वयं विष्णुदूता इति परिहारमनुक्त्वा अजामिलो दण्डानर्ह इति तं मोचयितुं वयमागता इति परिहार उक्तः ।।

**विप्रां स्वभार्यामप्रौढां कुले महति लम्भिताम् ।**
**विससर्जाचिरात्पापः स्वैरिण्यापाङ्गविद्धधीः ।। ६५ ।।**

'विप्रां स्वभार्यामप्रौढां कुले महति लम्भिता'मित्यत्रेदं बोध्यम् । भार्या-शब्देन भर्तव्यत्वमभिप्रैति । स्वेन पाणिग्रहणात् स्वभर्तव्यत्वा प्राप्ता । धर्मे चार्थेच कामेच नातिचरामीति विप्राग्निसाक्षिकं प्रतिज्ञातम् । तादृश्यास्त्याग

एव पापावहः । तत्रापि विप्रा । तत्राप्यप्रौढा । तत्रापि कुले महति लम्भिता । विप्रायास्त्यागेन अत्यन्तबन्धुनिधनं त्याग एव हीत्युक्तेः विप्रहत्या अपि प्रसक्ता । अप्रौढात्यागेन भ्रूणहत्यापि प्रसक्ता । कुलीनायास्त्यागेन तु पितृ-भ्रात्रादिदुःखदानजन्यप्रत्यवायोऽपि इति ।।

एवमेवोत्तराध्याये ३२तमे श्लोके 'वृद्धावनाथौ न्यायबन्धू तपस्विनौ' इति उत्तरत्राधिकाधिकदोषावहत्वमुक्तमिति ज्ञातव्यम् ।।

**एतदध्यायत्रयस्य भगवन्नामस्मरणमाहात्म्यवर्णनपरत्वाद्भगवन्निष्ठत्वम् ।।**

**इति प्रथमोऽध्यायः**

## अथ द्वितीयोऽध्यायः

**एतेनैव ह्यघो नोऽस्य कृतं स्यादघनिष्कृतम् ।**
**यदा नारायण इति जगाद चतुरक्षरम् ।। ८ ।।**

एतेनैवेति ।। यथाहुः कृष्णामृतमहार्णवे ।। 'नाम्नोऽस्ति यावती शक्तिः पापनिर्हरणे हरेः । तावत्कर्तुं न शक्नोति पातकं पातकीजनः' इति ।।

'नारायण इति चतुरक्षर'मित्यनेनेदं ज्ञायते ।। नारायण इति सम्बुध्यन्तं चतुराक्षरमन्त्रमिदमिति । अत एवोत्तरत्र अजानतोऽप्यात्मगुणं कुर्यान्मन्त्रोऽप्युदाहृत इति वक्ष्यति ।।

**तैस्तान्यघानि पूयन्ते तपोदानव्रतादिभिः ।**
**नाधर्मबीजं हृदयं तदपीशाङ्घ्रिसेवया ।। १७ ।।**

'नाधर्मबीज'मित्यत्रेदमवगन्तव्यम् । तपआदिभिः पापनिर्हरणेऽपि पाप-करणबुद्धिर्न निवर्तते । अधर्मबीजस्यानिवृत्तत्वात् । नामोच्चारणादिरूप-भगवत्सेवया त्वधर्मबीजनिवृत्तेः पापकरणबुद्धिः निवर्तत इति ।।

**धर्मो योऽयमुपन्यस्तः परमस्तु सनातनः ।**
**क्रियतेऽहरहः शुद्धिरात्मनो वाससो यथा ।। १८ ।।**

'क्रियतेऽहरहः शुद्धिरात्मनः' इत्यत्र वासोदृष्टान्त एवं वर्णनीयः ।।

यथा वस्त्रस्य क्षालनेन शुद्धिरेवं पापस्य नामस्मरणरूपधर्मेण शुद्धिः । तत्रापि स्वल्पमलदिग्धवस्त्रस्य सकृत् क्षालनेन शुद्धिरिवाल्पानां पापानां सकृन्नामोच्चारणेन शुद्धिः । बहुमलदिग्धवस्त्रस्य पुनःपुनः क्षालनेन यथा शुद्धिरेवं महत्पापानां नामाभ्यासेन शुद्धिरिति । अन्यथा पापानुसारेण अल्पबहुबहुतर-संख्याकजपविधानादीनां वैय्यर्थ्यापत्तेः ।।

**अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ।**
**सङ्कीर्तितमघं पुंसोसदहत्येधो यथाऽनिलः ।। २० ।।**

अज्ञानादित्यत्र मन्त्राज्ञानादित्यर्थः ।। नामस्वामितया भगवज्ज्ञानं त्वावश्यकम् । अन्यथा न सर्वथा पापनाशः । 'साङ्केत्यं पारिहास्यं वा' इत्यत्राप्येवमेव ज्ञातव्यम् ।।

**तं विवक्षुमभिप्रेत्य महापुरुषकिङ्कराः ।**
**सहसा पश्यतस्तस्य तन्त्रान्तर्दधिरेऽनघ ।। २६ ।।**

'सहसा पश्यतस्तस्य तत्रान्तर्दधिरे' इत्यत्रेदं बोध्यम् । मनुष्यैर्दर्शनं स्पर्शनं सम्भाषणं नेच्छन्ति देवताः । मनुष्येषु जातेन देवेनापि चिरं सह वासं नापेक्षेन्त इति ।।

**स तस्मिन् देवसदने आसीनो योगमास्थितः ।**
**प्रत्याहृतेन्द्रियग्रामो युयोज मन आत्मनि ।। ४३ ।।**

देवसदने त्रिविक्रमदेवस्थान इति वदन्ति ।।

**म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम् ।**
**अजामिलोऽप्यगान्मुक्तिं किमुत श्रद्धया गृणन् ।। ५२ ।।**

'अजामिलोऽप्यगान्मुक्तिम्' इत्यस्य समाख्या पञ्चरात्रे । अजामिलोऽपि पापात्मा यन्नामोच्चारणादनु । प्राप्तवान् परमं धामेति ।।

अजामिलोपाख्यानश्रोतॄणामेवं प्रतीयते । महत्पापानि कृत्वाऽपि नामोच्चारणेन नरकं तरामह इति । वैष्णवानां न नरकप्राप्तिरिति केचिदाहुः। अत्रेदं बोध्यम् । देवमानुषदानवानां गीतं वर्णयद्भिर्भगवत्पादैर्देवानां नरकं नास्तीति वदद्भिर्मानुषाणां नरकप्राप्तिरङ्गीकृता । अतो नरकभीरुभिः पापानि निवारणीयानि । ज्ञानादज्ञानाद्वा पापाचरणे यथाशक्ति शास्त्रोक्तप्रायश्चित्तं कृत्वाऽशेषपापनिवृत्यर्थं यथाशक्ति नामसङ्कीर्तनं कर्तव्यम् । अन्यथा वेदोक्त-प्रायश्चित्तानां वैय्यर्थापत्तेः । स्नानसन्ध्यादिकं त्यक्त्वाऽपि नामसङ्कीर्तनस्य सौलभ्याच्च ।।

किञ्च 'अभक्तोदाहृतं नाम नाघहरम्' इति भगवत्पादोक्तेः भक्तिपूर्वकमेव नामोच्चारणमघहरमिति ज्ञायते नतु नामोच्चारणमात्रम् । पापहरणशक्तिरपि भक्त्यनुसारिणी । अत एव नारदकृतनामोच्चारणश्रवणेन नरकपतितानामुद्धारः श्रीश्रीपादराजकृतशङ्खतीर्थप्रोक्षणेन ब्रह्महत्यापरिहार इत्यादिकं सङ्गच्छते । तत्र यथा नारदकर्तृकनामोच्चारणस्य श्रीश्रीपादराजकर्तृक-शङ्खतीर्थस्य वा यावत्सामर्थ्यं पापनिर्हरणे तथाऽस्मत्कर्तृकनामोच्चारणादीनां न तावत् सामर्थ्यमित्यवश्यमङ्गीकर्तव्यम् । अन्यथाऽस्माभिरपि चैत्रतैलदिग्ध-वस्त्रस्य शुद्धिः क्रियतामित्यास्तां विस्तरः ।।

**पूर्ववद्भगवन्निष्ठत्वम् ।।**

**।। इति द्वितीयोऽध्यायः ।।**

## अथ तृतीयोऽध्यायः

**द्वादशैते विजानीमो धर्मं भागवतं भटाः ।**
**गुह्यं विशुद्धं दुर्बोधं यज्ज्ञात्वाऽमृतमश्नुते ।। २१ ।।**

द्वादशैते विजानीम इत्यत्र न केवलं पूर्वश्लोकोक्ता द्वादश विजानन्ति किन्तु स्वयम्भुवमारभ्य जनकपर्यन्ता सर्वे जानन्तीति गुरुपादाः ।।

**जिह्वा न वक्ति भगवद्गुणनामधेयं**
**चेतश्च न स्मरति तच्चरणारविन्दम् ।**
**कृष्णाय नो नमति यच्छिर एकदाऽपि**
**तानानयध्वमसतोऽकृतविष्णुकृत्यान् ।। २९ ।।**

'एकादाऽपी'त्यत्रेदं प्रतीयते । य एकदाऽपि भगवन्तं गृणाति स्मरति नमति वा स न कदाऽपि नरकं गच्छतीति । एवं न मन्तव्यम् । किन्तु नरकं गतोऽपि स्मरणाद्यकर्तृवत् नरकभोगं नाप्नोतीति ज्ञातव्यम् ।।

**पूर्ववद्भगवन्निष्ठम् ।।**

**।। इति तृतीयोऽध्यायः ।।**

## अथ चतुर्थोऽध्यायः

**ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह ।**
**राजोवाच महान् सोमो मन्युं प्रशमयन्निव ।। ६ ।।**

'राजोवाच महान् सोम' इत्यत्रेदमवगन्तव्यम् । अत्र प्रचेतसः सोमोऽसान्त्वयदिति प्रतीयते । चतुर्थे तु ब्रह्माऽसान्त्वयदिति । तत्तु सोमस्य ब्रह्माविष्टत्वाद्युज्यत इति भाति । अत एवात्र महानिति विशेषणम् ।।

**इत्युक्त्वा मिषतस्तस्य भगवान् विश्वभावनः ।**
**स्वप्नोपलब्धार्थ इव तत्रैवान्तर्दधे हरिः ।। ५४ ।।**

स्वप्नोपलब्धार्थ इति दृष्टान्तः स्वाप्नपदार्थो यथा पूर्वमूर्ध्वं च न दृश्यत एवं भगवतः पूर्वमूर्ध्वं चादर्शनपरः ।।

**हंसगुह्येन भगतः स्तुतत्वात् भगवन्निष्ठत्वं बोध्यम् ।।**

**।। इति चतुर्थोऽध्यायः ।।**

## अथ पञ्चमोऽध्यायः

**चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः ।**
**देवर्षिमुपलक्ष्याह रुषा प्रस्फुरिताधरः ।। ३५ ।।**

'पुत्रशोकविमूर्च्छित' इत्यनेनेदमवगम्यते । यद्यपि हर्यश्वानां शबलाश्वानां च योग्यताभिज्ञो गुरुर्नारदः किमपि अनिष्टं नाचरितवान् । तथापि पुत्रशोकविमूर्छितत्वात् दक्षो नारदाय चुक्रोधेति । नारदादपि वरो दक्षः कथं तद्योग्यतां न ज्ञातवनिति मा शङ्कि । तत्काले तद्योग्यताविषये मनःप्रणिधानाभावस्य सम्भवात् ।। रोषनिमित्तमेव पापेति (३७श्लोके)सम्बोधनं शापदानं चेति ।।

**ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् ।**
**विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ।। ३७ ।।**

'ऋणैस्त्रिभिरमुक्तानाम्' इत्यादि क्रमसन्न्यासापेक्षयेति द्रष्टव्यम् । अन्यथा 'ब्रह्मचर्यादेव प्रव्रजेत्' इति श्रुतिव्याकोपात् ।। ईक्षणत्रयमुक्तायां ब्रह्मचर्यादेव प्रव्रजनं विहितम् । अन्यथा यावदीषणत्रयमेकस्तावत् गृहस्थाश्रमे तिष्ठन् प्रयत्नं कुर्यात् । अत एव पञ्चमे 'गृहेषु निर्वेद्य यतेत पूर्व'मित्युक्तम् ।।

**नेत्थं पुंसो विरागः स्यात् त्वया केवलिना विना ।**
**मन्यसे यद्युपशमं स्नेहपाशनिवर्तनम् ।। ४० ।।**

**नानुभूय न जानाति पुमान् विषयतीक्ष्णताम् ।**
**निर्विद्यते स्वयं तस्मान्न तथा भिन्नधीः परैः ।। ४१ ।।**

नेत्थं पुंसो विरागः स्यादित्यस्यैव विवरणं– नानुभूयेत्यादि ।।

**भगवज्ज्ञानसाधनभूतवैराग्योपदेशाद्भगवन्निष्ठत्वम् ।।**

## अथ षष्ठोऽध्यायः

**मरुत्वांश्च जयन्तश्च मरुत्वत्यां बभूवतुः ।**
**जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः ।। ८ ।।**

‘मरुत्वांश्च जयन्तश्च’ इत्यत्र जयन्तो यमपुत्रत्वेन जातः । स एव इन्द्रपुत्रत्वेनापि जात इति द्रष्टव्यम् ।।

**द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वस्तुर्विभावसुः ।**
**द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ।। ११ ।।**

वस्तुरिति ।। वस्तुरेव द्युनामा वसुरिति ज्ञातव्यम् ।।

**प्रजापतेराङ्गिरसः स्वधा पत्नी पितॄनथ ।**
**अथर्वाङ्गिरसं वेदं पुत्रत्वे चाकरोत् सती ।। १९ ।।**

‘आङ्गिरसः स्वधा पत्नी’ इत्यत्र अङ्गिरःपत्नी स्वधाऽग्निपत्न्याः स्वधाया भिन्नेति द्रष्टव्यम् ।।

**तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनी इति ।**
**पतङ्ग्यसूत पतगान् यामिनी शलभानथ ।। २१ ।।**

ताक्ष्यर्स्येत्यत्र ताक्ष्यर्ः कश्यपः । यद्यपि ताक्ष्यर्ः कश्यपनन्दन इति ताक्ष्यर् नाम गरुडपर्यायः । तथाऽपि पितुर्यत् तत् पुत्रस्येति न्यायेन कश्यपस्यापि ताक्ष्यर्नाम । तथा चात्रोक्ता विनतादयश्चतस्रो वक्ष्यमाणादित्यादि त्रयोदश च कश्यपपत्न्यः ॥

**उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप ।**
**पुलोमां कालिकां च द्वे वैश्वानरसुते नृप ॥ ३३ ॥**

**उपयेमे च भगवान् कश्यपो ब्रह्मचोदितः ।**
**पौलोमाः कालिकेयाश्च दानवा युद्धशालिनः ॥ ३४ ॥**

'वैश्वानरसुते उपयेमे कश्यपो ब्रह्मचोदितः' इत्यनेन कथं कश्यपः स्वपौत्री उवाहेति चोद्यं निरस्तम् । सर्वज्ञेन ब्रह्मणा चोदितत्वात् ।

**भगवतीनां लोकमातॄणां वंशस्य कीर्तनात् शिशुंमारावतारकीर्तनाच्च भगवन्निष्ठत्वम् ॥**

**॥ इति षष्ठोऽध्यायः ॥**

## अथ सप्तमोध्यायः

**नो गर्हयन्ति ह्यर्थेषु यविष्ठाङ्घ्र्यभिवादनम् ।**
**छन्दोभ्योऽन्यत्र न ब्रह्मन् वयो ज्यैष्ठ्यस्य कारणम्॥३३ ॥**

'यविष्टाङ्घ्र्यभिवन्दनम्' इत्यत्र देवकृतविश्वरूपवन्दनेन न देवानां तेजो-हानिः । यथा मनुष्यस्य गोवन्दनेन । प्रायः समानस्कन्धेष्वेव नीचवन्दनेन तेजोहानिरिति द्रष्टव्यम् ॥

**हरिभक्तिजनकगुरुभक्तेरवश्यकर्तव्यताया निरूपणाद् भगवन्निष्ठत्वम् ॥**

**॥ इति सप्तमोऽध्यायः ॥**

## अथाष्टमोऽध्यायः

**विश्वरूप उवाच**

**धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।**
**कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ।। ४ ।।**

धौताङ्घ्रिपाणिरित्यादि इतिकर्तव्यतावचनम् ।।

**नारायणमयं वर्म सन्नह्येद् भय आगते ।**
**दैवभूतात्मकर्मभ्यो नारायणमयः पुमान् ।। ५ ।।**

'दैवभूतात्मकर्मभ्यो भय'मित्यस्य आधिदैविकाधिभौतिकाध्यात्मिकभयमित्यर्थः । तदेव विशदयति विजयध्वजाचार्यो अनावृष्टिरित्यादि ।।

**पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ।**
**मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ।। ६ ।।**

आनुपूर्व्यादित्यत्र ल्यब्लोपनिमित्ता पञ्चमी । आनुपूर्वीमनुसृत्येति यावत् । तथाच ओंकारादियकारान्तं क्रमेण पादादिशिरोऽन्तेषु इति लभ्यते । अयं च लयक्रमः वनस्थानां न्यासिनां च ।।

**ओं नमो नारायणायेति विपर्ययमथापि वा ।**
**करन्यासं ततः कुर्याद् द्वादशाक्षरविद्यया ।। ७ ।।**

'विपर्ययमि'त्यनेन शिरआदिपादान्तसृष्टिक्रमो ग्राह्यः । स च ब्रह्मचारिणाम् ।। गृहस्थानां तु स्थितिक्रमः । स च आनुपूर्व्यात् विपर्ययं च । शिरोमुखोरोहृत्सु ओंकारादिनाकारान्तं पादजानूरूदरेषु राकारादियकारान्तमिति ।।

**प्रणवादियकारान्तमङ्गुल्यंगुष्ठपर्वसु ।**

**न्यसेद् हृदय ओङ्कारं विकारमनु मूर्धनि ।। ८ ।।**

‘प्रणवादियकारान्तम्’ इत्यत्रेदं बोध्यम् ।। द्वादशाक्षरविद्यायां ओंकारादि-यकारान्तानि द्वादशाक्षराणि ।। तानि च पञ्चाङ्गुलि-अङ्गुष्ठपर्वाख्यषट्स्थानेषु करद्वन्द्वे न्यस्यानि ।। सृष्टिक्रमे दक्षिणाङ्गुष्ठमारभ्य दक्षिकनिष्ठिकापर्यन्तं ततो वामाङ्गुष्ठपर्यन्तं ततो दक्षिणकनिष्ठिकापर्यन्तं ततो वामकनिष्ठिकामारभ्य वामाङ्गुष्ठपर्यन्तमिति ।।

विष्णुमन्त्राक्षरन्यासस्त्वित्थम् ।। ओं ओं परमात्मने हृदयाय नमः । ओं विं विश्वाय शिरसे स्वाहा । ओं षं तैजसाय भ्रूमध्याय नमः । ओं णं प्राज्ञाय शिखायै वषट् । ओं वें तुर्याय नेत्राभ्यां औषट्। ओं नं आत्मने सर्वसन्धिभ्यो नमः (कवचाय हुम्)। ओं मः अन्तरात्मने अस्त्राय फट्। अस्त्रमुद्दिश्येत्यत्र उद्देशः चतुर्थी ।।

**हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।**
**दरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टगुणोऽष्टबाहुः ।। १२ ।।**

हरिर्विदध्यादिति ध्यानम् ।।

**सनत्कुमारोऽवतु कामदेवात् हयशीर्षो मं पथि देवहेलनात् ।**
**देवर्षिवर्यः पुराषान्तरार्चनात् कूर्मो हरिर्मां निरयादशेषात् ।।**

‘पथि देवहेलनात्’ इत्यत्र पथि देवहेलनं नाम मार्गे गमनकाले यदि तत्र देवालयो वा अश्वत्थादिर्वा गवादिर्वा विद्यते तर्हि नमनादि सत्कारं कृत्वा गच्छेत् । अन्यथा देवहेलनाख्यदोषः प्रसज्यत इति ।।

**यथैकात्म्यानुभावेन विकल्परहितः स्वयम् ।**
**भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ।। ३२ ।।**

भूषणायुधलिङ्गाख्या धत्ते । तत्क्रमो द्वादशस्कन्धे दशमाध्याये स्पष्टः ।

**य इदं शृणुयात् काले यो धारयति चादृतः ।**
**तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ।। ४२ ।।**

य इदमित्यनेन नारायणवर्मश्रवणधारणकर्तारं नमतोऽपि सर्वभय-मोचनवर्णनेन नारायणवर्मणा माहात्म्यमुक्तं भवति ।।

**नारायणवर्मवर्णनेन स्पष्टं भगवन्निष्ठत्वम् ।।**

## अथ नवमोऽध्यायः

**सोमपीथं तु यत् तस्य शिर आसीत् कपिञ्जलः ।**
**कलविङ्कः सुरापीथमन्नादं यत् स तित्तिरिः ।। ५ ।।**

'सोमपीथम्'इत्यादिना शिरांसि पक्षिण आसन्निति प्रतीयते । तत्कथमिति चेत् तदाश्रिता अभिमानिना एवंरूपा इति गुरुपादाः ।।

**द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलम् ।**
**तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरिकिल्बिषम् ।। १० ।।**

द्रव्यभूयोवरेणेत्यस्यायमभिप्रायः । 'वैशेष्यात्तु तद्वादस्तद्वादः' इत्यधिकरणोक्तदिशा पार्थिव-आप्य-तैजसदेहेषु प्रत्येकमष्टधा विभक्तेषु दशभागा अपाम् । अतो भूयस्त्वमिति ।।

**आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ ।**
**पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम् ।। २८ ।।**

विना श्रीवत्सकौस्तुभावित्यत्र मध्यस्थमूर्तेः श्रीवत्सकौस्तुभौ स्तः । आवरणभूतानां षोडशानां न स्त इति नार्थः । किन्तु श्रीवत्सकौस्तुभाभ्यां

विनाभावस्तदतीतत्वमेव ।। **देवकृतस्तोत्रेण नारायणवर्मतेजोविशिष्टायुधेन वृत्रहननस्योपदेशाच्च भगवन्निष्ठत्वम् ।।**

## ।। अथ दशमोऽध्यायः ।।

दशमादित्रयेष्वध्यायेषु वृत्रवधो निरूप्यते । 'वृत्रासुरवधो यत्र' इति श्रीमद्भागवतलक्षणमभिहितम् । किमेतदसाधारण्यमिति चेदुच्यते । वृत्रो नाम अज्ञानाभिमानी ।। भगवत्पादैः 'अहिं वृत्रं वृत्रतर'मित्यत्र तथा व्याख्यानात् । अत्र नारायणवर्मतेजितवज्रेण वृत्रासुरवधोऽध्यात्मं भगवदाश्रयेणाज्ञाननिरसनं वक्ति । इदमेव खलु जिज्ञासासूत्रस्यातःशब्दबोध्योऽर्थविशेषः । अतो ब्रह्मसूत्रार्थभूतभागवतस्य वृत्रासुरवधो भवत्येव लक्षणमिति ।।

**एवं चैतदध्यायत्रिकस्य भगवन्निष्ठत्वम् ।।**

**।। इति दशमोऽध्यायः ।।**

## अथ एकादशोऽध्यायः

**वृत्र उवाच**

**दिष्ट्या भवान् मे समवस्थितो रिपु-**
**र्यो ब्रह्महा गुरुहा भ्रातृहा च ।**
**दिष्ट्याऽनृणोऽद्याहमसत्तम त्वया**
**मच्छूलनिर्भिन्नदृषद्धृदाऽचिरात् ।। १४ ।।**

गुरुहा भ्रातृहेत्यस्य तव गुरोर्हन्ता मम भ्रातुर्हन्तेत्यर्थः ।।

**अथो हरे मे कुलिशेन वीर हर्ता प्रमथ्येह शिरो यदीह ।**
**तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये ।। १८ ।।**

अथो इत्याध्यायान्तश्लोकैः वृत्रस्य शुभचेतनस्य भाषणं प्रार्थनं च ।।

**अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ।**
**मनः स्मरेतात्मपतेर्गुणान् नो गृणीत वाक् कर्म करोतु कायः ।। २४ ।।**

दासानुदासो भवितास्मि भूय इत्यनेन वृत्रो जातिस्मर इति ज्ञायते । भूयः चित्रकेतुजन्मनि भगवद्दासं शेषमनु दासो भविता अस्मीति प्रार्थितत्वात् ।।

**वृत्रकृतप्रार्थनेनापि भगवन्निष्ठत्वम् ।।**

## अथ द्वादशोऽध्यायः

**वज्रस्तु तत्कन्धरमाशुवेगः कृन्तन् समन्तात् परिवर्तमानः ।**
**न्यपातयत् तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ।। ३३ ।।**

'न्यपातयत् तावदहर्गणेन यो ज्योतिषामयने' इत्यत्र वज्रो वृत्रशिरश्छेदयितुं संवत्सरकालं पर्यवर्तयदिति नार्थः ।। किन्तु संवत्सरमलं युद्धानन्तरं वृत्रशिरोऽपातयदिति । अथवा नर्मदातीरे सञ्जातस्य प्रथमयुद्धस्य विरामानन्तरं समुद्रतीरे सञ्जाते युद्धे शिरःपातः ।। तावदेकसंवत्सरात्मककालो गत इत्यर्थः ।।

**वृत्रेन्द्रधर्मजिज्ञासया भगवद्भक्तेन्द्रविजयवर्णनेन च भगवन्निष्ठत्वम् ।।**

## अथ त्रयोदशोऽध्यायः

**तयेन्द्रं स्म ह सन्तप्तं निर्वृतिर्नामुमाविशत् ।**
**ह्रीमतां वाच्यतां प्राप्तं सुखयन्त्यपि नो गुणाः ।।११।।**

तयेन्द्रं स्म ह सन्तप्तमित्यत्र ब्रह्महत्यया तापो नाम भोक्तव्यप्रारब्धकर्मणः ब्रह्महत्यासूचितत्वम् । यथा ज्ञानिनो युधिष्ठिरस्य कृतकनरकदर्शनं भगवदादेशो संशयेन सूचितं नतु फलितम् ।।

**मानसेन नरसिंहमन्त्रजपेन विष्णुपद्या अवितत्वेन पापनिष्फलीकरण-**

**वर्णनेनाश्वमेधेन भगवद्विषयेण पापनाशवर्णनेन च भगवन्निष्ठत्वम् ।।**

## अथ चतुर्दशोऽध्यायः

**न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ।**
**यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ।। ५४ ।।**

न हि क्रमश्चेदित्यस्यायमभिप्रायः । यः पूर्वं जातः पितादिः स पूर्वं म्रियेत । यः पश्चाज्जातः पुत्रः स पश्चान्म्रियेतेति क्रमो नश्चेत् पुत्रे पित्रादीनां यः स्नेहपाशो विधिना कृतः पुत्रस्य पोषणादिद्वारा सर्गविवृद्धये स च्छिन्नः स्यात् । तथा च विधिना स्वकृतसृष्टेर्विरोध एव कृतः स्यादिति ।।

**भक्तिदार्ढ्यजनकवैराग्यजननाय संसारे सम्भवपुत्रवियोगजन्य-दुःखवर्णनेन भगवन्निष्ठत्वम् ।।**

## अथ पञ्चदशोऽध्यायः

**आङ्गिरो-नारदोपदेशात् पूर्ववद्भगवन्निष्ठत्वम् ।।**

## अथ षोडषोऽध्यायः

**जीवकृतोपदेशेन वैराग्यबोधनात् नारदोपदेशात् शेषोपदेशाच्च भगवन्निष्ठत्वम् ।।**

## अथ सप्तदशोऽध्यायः

**इति भागवतो देव्याः प्रतिशप्तुमलन्तमः ।**
**मूर्ध्ना सञ्जगृहे शापमेतावत् साधुलक्षणम् ।। ३७ ।।**

'प्रतिशप्तुमलंतम' इत्यत्रेदं ज्ञातव्यम् । नीचैरुक्तमानां दत्ताः शापा न प्रभवन्ति । क्वचिदुत्तमा गरुडादयः सौभर्यादीनां शापमनुमोदन्ते । यथा

कथञ्चिदपि नीचा उत्तमान् शप्त्वा क्षीणपुण्या भवन्तीति । शापदाने केवलं सामर्थ्यमस्तीति ।।

**तितिक्षाख्यभागवतधर्मवर्णनात् भगवत्प्रसादेच्छुभिः महद्द्रोहो नैव सम्पाद्य इति वर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति सप्तदशोऽध्यायः**

## अथाष्टदशोऽध्यायः

**कृमिविड्भस्मसंज्ञाऽन्ते यस्येशाभिहितस्य वा ।**
**भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ।। २५ ।।**

'कृमिविड् भस्म' इत्यस्यायमर्थः । मरणानन्तरं देहेऽसंस्कृते कृमिर्भवति । प्राणिना भुङ्क्ते विड् भवति । दग्धे भस्मीभवतीति ।।

**स एव देवतालिङ्गैर्नामरूपविकल्पितैः ।**
**इज्यते भगवान् पुंभिः स्त्रीभिश्च पतिरूपधृक् ।। ३४ ।।**

पतिरूपधृक् पत्यौ रूपं धरतीति । पतिसन्निहित इत्यर्थः ।

**मातृष्वसुरभिप्रायमिन्द्र आज्ञाय मानद ।**
**शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत् कविः ।। ५६ ।।**

दितिं पर्यचरत् कविरित्यत्र वटुरूपेणेति द्रष्टव्यम् ।

**दितिकृतभगवद्व्रतजन्यप्रसादान्मरुदुत्पत्तिकथनात् भगवन्निष्ठत्वम् ।।**

**इति अष्टादशोऽध्यायः ।।**

## अथैकोनविंशोऽध्यायः ।।

**विप्रान् स्त्रियो वरवतीः स्रग्गन्धबलिमण्डनैः ।**
**अर्चेदहरहर्भक्त्या देवं नियममास्थिता ।। १९ ।।**

वरवतीः भर्तृमतीः पुत्रमतीश्च ।।

**इत्येकोनविंशोऽध्यायः ।।**

## ।। इति षष्ठः स्कन्धः ।।

## अथ सप्तमस्कन्धः

## अथ प्रथमोध्यायः

**निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।**
**स्वमायागुणमाविश्य बाध्यबाधकतां गतः ।। ६ ।।**

'बाध्यबाधकतां गतः' इत्यत्र बाध्येषु स्थितो बाध्य इति बाधकेषु स्थितो बाधक इति कथ्यत इत्यर्थः ।।

**नारद उवाच–**

**एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया ।**
**सनन्दनादयो जग्मुश्चरन्तो भुवनत्रयम् ।। ३७ ।।**

'स्नेहात् यूयं भक्त्या वयम्' इत्यत्र पाण्डवानां स्नेहः नारदादीनां भक्तिरित्यापातप्रतीतार्थात् नारदादयः पाण्डवेभ्यो वरा इति प्रतीयते । तन्न । स्नेहादित्यस्य बहुमानसाम्यसहितस्नेहादित्यर्थः । भक्त्या इत्यस्य स्नेहोपसर्जनबहुमानेनेत्यर्थः । देवानां मुन्यपेक्षया बहुमानमपि अधिकम् । अतो देवा एव वरा इति द्रष्यव्यम् । तात्पर्योक्तमेव विशदीकृतमिति नात्र मम कश्चन भारः । गुरुपादानां विशेषणाच्च ।।

**तावद्य क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ।**
**अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ।। ४७ ।।**

**वैरानुबन्धतीव्रेण ध्यानेनाच्युतसाम्यताम् ।**
**नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ।। ४८ ।।**

'तावद्य राक्षसौ जातौ' इत्यादीनामयं भावः । 'यंयं वापि स्मरन् भावम्'

इत्युक्तेः हिरण्यकशिपुहिरण्याक्षौ स्वं संहरन्तं वराहं नारसिंहं च भूतं मत्वा भूतवद् भयानकराक्षसौ जातौ । रावणकुम्भकुर्णौ स्वं संहरन्तं रामं राजानं मत्वा राजानौ च । शिशुपालदन्तवक्रौ स्वं संहरन्तं चक्रपाणिं कृष्णं भगवन्तं मत्वा भगवन्तमापुरिति ।। अत्र भगवत्पादयोगं लब्ध्वा भगवति वैकुण्ठं गते वैकुण्ठद्वारि भगवत्पादाद् बहिरागत्य द्वारपयोरैक्यमाप्नुवन्तीति ।।

अत्राध्याये एतदितिहासकथनेन भगवतो वैषम्याभावे किमायातमिति स्पष्टं न प्रतीयते । इदमत्रावधेयम् । लोका हि स्वद्वेषिसहवासं कृतवन्तमपि दूरीकुर्वन्ति कामक्रोधााभिभूतत्वात् । भगवांस्तु स्वद्वेषिकृतसङ्गमपि स्वभक्तं व्यमोचयदित्यहो करुणाम्बुराशिः । द्वेषिभक्तयोस्तस्तद्भावनानुसारिफल-दातृत्वात् वैषम्यराहित्यमुपपादितमिति ।।

**भगवद्भक्तिसामर्थ्यवर्णनात् भगवतो वैषम्यराहित्यवर्णनात् भगवन्निष्ठत्वम्।।**

**।। इति श्रीमद्भागवते सप्तमस्कन्धे प्रथमोध्यायः ।।**

## अथ द्वितीयोऽध्यायः

**विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् ।**
**देवर्षिपितृभूतानां धर्मस्य च परायणम् ।। ११ ।।**

'विष्णुर्द्विजक्रियामूलः' इत्यत्र द्विजक्रियाभिः यज्ञैः विष्णुर्बलमाप्नोतीति आसुरं मतम् । अत एव यज्ञान् निघ्नन्ति ।।

**हिरण्यकशिपुरुवाच–**

**भो भो दानव दैतेय द्विमूर्धंस्त्र्यक्ष शम्बर ।**
**शतबाहो हयग्रीव नमुचे पाक इल्वल ।। ४ ।।**

**विप्रचित्ते मम वचः पुलोमन् शकुनादयः ।**
**शृणुताऽनन्तरं सर्वैः क्रियतामाशु मा चिरम् ।। ५ ।।**

**सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितस्सुहृत् ।**
**पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ।। ६ ।।**

**अम्बाम्ब हे वधूः पुत्रा वीरं माऽर्हथ शोचितुम् ।**
**रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ।। २० ।।**

'भो भो दानव' इत्यादि असुरावेशतो वचनम् ।'अम्बाम्ब' इत्यादि द्वारपावेशत इति विवेकः ।।

**हिरण्यकशिपुभाषणेन सर्वसुखकारणभगवन्महिमावर्णनात् विरक्तिबोधनाच्च भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते सप्तमस्कन्धे द्वितीयोध्यायः ।।**

## अथ तृतीयोऽध्यायः

**तं ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः ।**
**पिपीलिकाभिराकीर्णं मेदत्वङ्मांसशोणितम् ।। १५ ।।**

'मेदत्वङ्मासशोणितम्' इति । केचन 'अस्थिमात्रशरीरः अतपत्' इति कथयन्ति । तन्न । मेदत्वङादिश्रवणात् ।।

**हिरण्यकशिपुरुवाच–**
**कल्पान्ते कालसृष्टेन योऽन्धेन तमसाऽऽवृतम् ।**
**अभिव्यनग् जगदिदं स्वयंज्योतिः स्वरोचिषा ।। २६ ।।**

'कल्पान्ते' इत्यादि मिश्रस्तुतिः ।

**मिश्रस्तुत्या भगवन्महिमाप्रतिपादनाद् भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते सप्तमस्कन्धे तृतीयोध्यायः ।।**

## अथ चतुर्थोऽध्यायः

**तमङ्ग मत्तं मधुनोरुगन्धिना**
**विवृत्तताम्राक्षमशेषधिष्ण्यपाः ।**
**उपासतोपायनपाणिभिर्विना**
**त्रिभिस्तपोयोगबलौजसां पदम् ।। १३ ।।**

त्रिभिर्विना= वसुरुद्रादित्यैर्विना । मरुदादीनामत्रैवान्तर्भावः।।

**यस्मिन् महागुणा राजन् गृह्यन्ते कविभिर्मुहुः ।**
**न तेऽधुनाऽभिधीयन्ते यथा भगवतीश्वरे ।। ३५ ।।**

'यथा भगवतीश्वरे' इत्यत्राधिकदृष्टान्तः । किञ्चित्साम्यं विविक्षितम् ।।

**भगवत्प्रपन्नानां भयं नास्तीति निरूपणात् भगवद्भक्तप्रल्हादवर्णन-व्याजेन भक्तिकार्यवर्णनाच्च भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते सप्तमस्कन्धे चतुर्थोऽध्यायः।।**

## अथ पञ्चमोऽध्यायः

**नारद उवाच–**
**पौरोहित्याय भगवान् वृतः काव्यः किलासुरैः ।**
**शण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ।। १ ।।**

'शण्डामर्कौ' इत्यत्र 'देवताद्वन्द्वे च' इत्यनेन चकारात् ऋषिद्वन्द्वे अपि दैर्घ्ये रूपम् ।।

**प्रह्लाद उवाच–**

**तत् साधु मन्येऽसुरवर्य देहिनां**
**सदा समुद्विग्नधियामसद्ग्रहात् ।**
**हित्वाऽऽत्मपातं गृहमन्धकूपं**
**वनं गतो यद्धरिमाश्रयेत ।। ५ ।।**

'वनम्' इत्यत्र न केवलं वनगमनेन हर्याश्रयणं, किन्तु तत्रत्यमुनिजन-सेवनेनेत्यभिप्रेत्य 'वनं सज्जनसङ्गमलक्षणम्' इति विजयध्वजश्रीमच्चरणै-र्व्याख्यातम् ।।

**दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः ।**
**तन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ।। १७ ।।**

'तन्मूलोन्मूल' इत्येदं द्रष्टव्यम् । परशोर्लाने सत्येव वनच्छेदनं शक्यम् । एवं दैतेयचन्दवनच्छेदनकुठारो विष्णुरनेन सहित एव छिनत्तीति ।। अत एव प्रल्हादं निमित्तीकृत्य भगवान् हिरण्यकशिपुं विददार ।

**प्रह्लादानूद्यतां तात स्वधीतं किञ्चिदुत्तमम् ।**
**कालेनैतावताऽऽयुष्मन् यदशिक्षद् गुरोर्भवान् ।। २२ ।।**

'स्वधीतम्'इत्यत्र हिरण्यकशिपुना सम्यक् पठितमनूच्यतामित्युक्तम् । अत एव प्रल्हादः स्वेनाधीतमुत्तमं भक्तिमार्गमाह।।

**पर्युपासत राजेन्द्र तन्न्यस्तहृदयेक्षणाः ।**
**तानाह करुणो मैत्रो महाभागवतोऽसुरः ।। ५६ ।।**

मैत्रः=मित्वा त्रातीति मित्रम् । मित्रमैव मैत्रः स्वार्थे अण् । अत एव बालकानामज्ञानां मित्वा ततस्त्रायते ।

अत्र भगवद्भक्तिबोधनात् भगवन्निष्ठत्वम् ।।

।। इति श्रीमद्भागवते सप्तमस्कन्धे पञ्चमोऽध्यायः ।।

## अथ षष्ठोऽध्यायः

प्रह्लाद उवाच–

**हन्तार्भका मे शृणुत वचो वः सर्वतः शिवम् ।**
**वयस्यान् पश्यत मृतान् क्रीडान्धा मा प्रमाद्यथ ।। १ ।।**

'अर्भकाः' इत्यत्र चिरकालेन मुक्तियोग्याः इत्यर्थ इति सम्प्रदायज्ञाः ।

**ततो यतेत कुशलः क्षेमाय च यमाश्रितः ।**
**शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ।। १० ।।**

'यावन्न विपद्येत' इति ।'अदृढेषु हृषीकेषु हृषीकेशं यजन्ति के' इति भगवत्पादाः ।।

**पुंसां वर्षशतं ह्यायुः तदर्धं चाजितात्मनः ।**
**निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ।। ११ ।।**

'पुंसां वर्षशतं ह्यायुः' इत्यादिषु इदमप्यनुसन्धेयम् । ब्रह्मणः पराख्यकालः शत(100)वर्षात्मकः । तत्र पूर्वार्धे अल्पजीवनिनां सृष्टिरेव न । परार्धे अन्तिमसार्धद्वादशवर्षाणि लयकालः (12-½) । उर्वरितेषु सार्धसप्तत्रिंशद्वर्षेषु (37--½) ब्रह्मणो रात्रिष्वर्धं गतम् । अवशिष्टेषु पादोनेकविंशद्वर्षेषु (19-¾) मनुष्याणां रात्रिष्वर्धं गतम् । अतः अवशिष्टानि अष्टमांशोनदशवर्षाणि (9--⅞) । एतन्मध्ये प्रत्यहं मन्वन्तरप्रलयकालः(20000) विंशत्सहस्र-वर्षात्मकः । तादृशकालाः पूर्वोक्तसार्धत्रिंशद्वर्षेषु (20000×360×37-½ = 27,00,00,000) सप्तविंशत्कोटिवर्षा भवन्ति । एतन्मध्ये बाल्य-

वार्धक्ययोरज्ञानाशक्तिसम्भवेन साधनाभावेन कल्पजीविनोपि सामान्यतः ब्रह्ममाननववर्षाण्येव साधनार्थं लभ्यत इति गुरुपादोक्तं प्रमेयम् ।।

**को न्वर्थतृष्णां विसृजेत् प्राणेभ्योऽपि य ईप्सितः ।**
**यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ।। १६ ।।**

'तस्करः सेवको वणिक्' इत्यत्र तस्करः स्वदेहहानिमपमानं वा अचिन्तयित्वा चौर्यै प्रसक्तः सेवकः आकारपरिमाणादिना स्वतुल्यस्वामिनं गुणभावेन सेवते । वणिक् वर्षातपादीन् सोढ्वा चरति नूनमर्थायेति 'यं क्रीणात्यसुभिः प्रेष्ठैः' इत्युक्तमिति ज्ञातव्यम् ।।

**न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ।**
**आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वतः ।। २५ ।।**

'बह्वायासो मे' इत्यत्र शारीरायासो बहुधनव्ययो वा नास्तीति भावः । देहायाससाध्यस्य बहुवित्तव्ययसाध्यस्य च लोके दुष्करत्वेन प्रमितत्वात् । नहि हृदये स्थितस्योपासने दूरगमनादिश्रमो वित्तव्ययो वा । तदेवोक्तमुत्तरत्र 'सामान्यतः किं विषयोपपादनैः' (७-७-३९)इत्यादि।।

**प्रत्यगात्मस्वरूपेण कालरूपेण च स्वयम् ।**
**व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ।। २८ ।।**

'प्रत्यगात्मा'इत्यत्र प्रत्यगात्मा व्याप्येति कालरूपी व्यापकेति निर्देश्य इति विवेकः ।।

**तस्मात् सर्वेषु भूतेषु दयां कुरुत सौहृदम् ।**
**भावमासुरमुन्मुच्य तया तुष्यत्यधोक्षजः ।। ३० ।।**

'दयां कुरुत भावमासुरमुन्मुच्य' इत्यत्रेदं बोद्धव्यम् । चतुर्मुखेनापि दैत्यान्

प्रति 'द' इति वदता दयैवोपदिष्टा । तदनुसृत्य प्रल्हादेनेपि सैवोपदिष्टेति ।।

**श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम् ।**
**धर्मं भागवतं शुद्धं नारदाद् देवदर्शनात् ।। ३४ ।।**

देवदर्शनात् देवर्षेः ।।

**भगवत्प्राप्तिसाधनवैराग्योपदेशात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते सप्तमस्कन्धे षष्ठोऽध्यायः**

## अथ सप्तमोऽध्यायः

**इन्द्र उवाच–**

**आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः ।**
**आस्यतां यावत् प्रसवं मोक्ष्येऽर्थपदवीं गतः ।। ९ ।।**

'अर्थपदवीं गत' इत्यस्य प्रसवानन्तरं तं दैत्यशिशुं हत्वैनां मेक्ष्य इत्यर्थः । नतु तां भुक्त्वेति । एवं तमभिप्रायं जानन्नारदः ' अयं निष्किल्बिष'इत्यादिना तस्यावध्यतवमाह ।। नारदेन ज्ञातमिन्द्रेण ततोप्युत्तमेन न कथं ज्ञातमितीयं शङ्का, नारदः स्वशिष्यत्वात् प्रल्हादस्य तत्र दृष्टिं दत्तवान् नेन्द्र इति परिहर्तव्येति गुरुपादाः ।।

**नारद उवाच–**

**अयं निष्किल्बिषः साक्षान्महाभागवतो महान् ।**
**त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली ।। १० ।।**

बली बलो वायुः अस्मिन्नस्तीति । वाय्वाविष्ट इत्यर्थः ।।

**इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन् वचः ।**

**अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ।। ११ ।।**

'अनन्तप्रियभक्त्येति ।। अनन्तस्य प्रियाः अथवा अनन्तः प्रिययो येषां ते ।उभयथापि विष्णुभक्ताः तेषु भक्त्या प्रीत्येत्यर्थः ।।

**ऋषिं पर्यचरत् तत्र भक्तया परमया सती ।**
**अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ।। १४ ।।**

'अन्तर्वत्नी स्वगर्भस्य' इत्यत्रेदमवधेयम् । कयाधुना स्वगर्भ इन्द्रादिना वधिष्यत इति भीतम् । अतो गर्भस्य क्षेमो याचितः । प्रसवानन्तरं कश्चिद्वधिष्यतीति भयेनेच्छाप्रसवः याचितः । स्वभर्तुः सन्निधौ प्रसवे भयाभावात् । एवंच हिरण्यकशिपोः देवमानशतवर्षपर्यन्तं तपः तत्पूर्वमेव गर्भधारणं, पञ्चवर्षीयस्य प्रल्हादस्य बाध इत्येतत्सर्वं समाहितं भवति ।।

**तत् तु कालस्य दीर्घत्वात् स्त्रीत्वान्मातुस्तिरोदधे ।**
**ऋषिणाऽनुगृहीतं मां नाधुनाप्यजहात् स्मृतिः ।। १६ ।।**

'स्त्रीत्वात्' इति तिरोधाने हेत्वन्तरम्। स्त्रीणां विषयलोलुपतया तत्वधारणाभावादिति । बालस्य तत्रापि गर्भस्थस्य कुतो धारणमिति चेत् ऋषिणा अनुगृहीतमित्याह ।।

**हेमं यथा ग्रावसु हेमकारः**
**क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ।**
**क्षेत्रेषु देहेषु तथाऽऽत्मयोगै-**
**रध्यात्मविद् ब्रह्मगतिं लभेत ।। २१ ।।**

'हेमं यथा ग्रावसु हेमकारः' इत्यत्रेदमनुसन्धेयम् । अत्र स्थले हेमोपलभ्यते इति ज्ञाने प्रथमं तत्र वासिनो जना परं स्थलं प्रति प्रेषयितव्याः । अन्यथा

खननस्यैवासम्भवात् । तथा हृदि भगवानुपलभ्यत इति ज्ञानानन्तरं हृदाश्रिताः कामादय उच्चाटयितव्याः । कामादिना आवृते ब्रह्मविचारस्य दौर्लभ्यत्वात् । खनौ हेम न साक्षाल्लभ्यते, किन्तु ग्राव्णि मिश्रितं लभ्यते । एवं हृदयेपि ब्रह्म न साक्षाल्लभ्यते किन्तु जीवचिन्मिश्रितो लभ्यते । ततः परं शुद्धं हेम यथा ग्राव्णः पृथक् क्रियते एवं जीवचिनो ब्रह्म पृथक्करणीयमिति गुरुपादाः ॥

**देहस्तु सर्वसङ्घातो जगत् तस्थुरिति द्विधा ।**
**अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत् त्यजन् ॥ २३ ॥**

अत्रैव मनुष्यदेह एव ॥॥

**बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ।**
**ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥**

'येनैवमनुभूयन्त' इत्यत्रान्तर्णीतो णिच् । अनुभाव्यत इत्यर्थः ॥ एतदभिप्रेत्य श्रीविजयध्वजतीर्थैः येन प्रेरितेन जीवेनेति व्याख्यातम् ॥

**निशम्य कर्माणि गुणानतुल्यान्**
**वीर्याणि लीलातनुभिः कृतानि ।**
**यदाऽऽतिहर्षोत्पुलकाश्रुगद्गदः**
**प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥ ३५ ॥**

**यदा ग्रहग्रस्त इव क्वचिद्धस-**
**त्याक्रन्दते ध्यायति वन्दते जनम् ।**
**मुहुः श्वसन् वक्ति हरे जगत्पते**
**नारायणेत्यात्मगतिर्गतत्रपः ॥ ३६ ॥**

'उद्गायति' इत्यादि पक्वभक्तविषयम् ।'ग्रहग्रस्त' इत्यादिपरिपक्वभक्तविषयम् ।

**रायः कलत्रं पशवः सुतादयो**
**गृहा मही कुञ्जरकोशभूतयः ।**
**सर्वार्थकामाः क्षणभङ्गुरायुषः**
**कुर्वन्ति मर्त्यस्य कियत् प्रियं चलाः ।। ४० ।।**

'मर्त्यस्य कियत् प्रियंचलाः' इत्यत्रेदं द्रष्टव्यम् । विषया अप्यनित्याः । देहोप्यनित्यः । सम्बन्धोप्यनित्य इति ।।

**हरिभक्तिसाधनदेहात्मविवेकाद्युपदेशात् भक्तेः प्राधान्यस्य वर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते सप्तमस्कन्धे सप्तमोऽध्यायः**

## अथ अष्टमोऽध्यायः

**नारद उवाच–**

**अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् ।**
**जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम् ।। १ ।।**

'निरवद्यत्वात्' इत्यत्र दैत्यबालकानामपि निरवद्यत्वात् प्रल्हादोक्तस्यापि निरवद्यत्वादिति ज्ञेयम् ।।

**हिरण्यकशिपुरुवाच–**

**व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ।**
**मुमूर्षूणां हि मन्दात्मन् ननु स्युर्विप्लुता गिरः ।। १२ ।।**

'मुमूर्षूणां हि' इत्येतत् स्वविषय एव फलितमिति द्रष्टव्यम् ।।

**यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।**

**क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते ।। १३ ।।**

'क्वासौ यदि' इत्येतत् प्रश्नोत्तरपरया योज्म् । तथाहि क्वासौ यदि इति प्रश्नः । सर्वत्रेत्युत्तरम् । यदि सर्वत्र कस्मात् स्तम्भेन दृश्यते इति प्रश्नः । स्तम्भेन दृश्यते इत्युत्तरमिति वदन्ति ।।

**दिवि स्पृशत्कायमदीर्घपीवर-**
**ग्रीवोरुवक्षः स्थलमल्पमध्यमम् ।**
**चन्द्रांशुगौरैश्छुरितं तनूरुहै-**
**र्विश्वग्भुजानीकशतैर्नखायुधैः ।। २२ ।।**

'विश्वग्भुजानीकशतैः' इति । नायं नृसिंहः चतुर्बाहुरष्टबाहुरथवा षोडशबाहुः, किन्तु शतबाहुः ।।

**असाध्वमन्यन्त हतौजसोऽमरा**
**घनच्छदा भारत सर्वधिष्ण्यपाः ।**
**तं मन्यमानो निजवीर्यशङ्कितं**
**यद्धस्तमुक्तो नृहरिं महासुरः ।। २७ ।।**

'घनच्छदा' इत्यत्र हिरण्यकशिपौ नृसिंहहस्तादुत्कलिते सुरा भयेन घनच्छदा बभूवुरिति गुरुपादाः ।।

**विष्णुपार्षदा ऊचुः –**

**अद्यैतद्धरिनररूपमद्भुतं ते**
**दृष्टं नः शरणद सर्वलोकशर्म ।**
**सोऽयं ते विधिकर ईश विप्रशापात्**
**तस्येदं निधनमनुग्रहाय विद्मः ।। ५७ ।।**

'निधनमनुग्रहाय विद्मः' इति । अन्ये निधनं स्वानुग्रहायेति विदुः, विष्णुपार्षदास्तु हिरण्यकशिपोरेवानुग्रहाय विदुरिति विवेकः ।।

**श्रीनृसिंहप्रादुर्भाववर्णनेन तत्स्तोत्रेण च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते सप्तमस्कन्धे अष्टमोऽध्यायः**

## अथ नवमोऽध्यायः

**स तत्करस्पर्शधुताखिलाशुभः**
**सपद्यभिव्यक्तपरात्मदर्शनः ।**
**तत्पादपद्मं हृदि निर्वृतो दधौ**
**हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ।। ६ ।।**

'सपद्यभिव्यक्तपरात्मदर्शनः' इत्यत्र हृदिस्थभगवद्दर्शनमभिव्यक्तिमिति ज्ञातव्यम् । बाह्यनृसिंहदर्शनस्य प्रागेव सिद्धत्वात् ।।

**विप्राद् द्विषड्गुणयुतादरविन्दनाभ-**
**पादारविन्दविमुखाच्छ्वपचं वरिष्ठम् ।**
**मन्ये तदर्पितमनोवचनात्मगेह-**
**प्राणः पुनाति सकलं न तु भूरिमानः ।। १० ।।**

'विप्राद् द्विषड्गुण' इत्यत्र द्वादशगुणेषु शमः पठितः । 'शमो मन्निष्ठता बुद्धेः' इत्युक्तेः शमापरपर्यायभगवन्निष्टावतो भगवद्विमुखत्वं कथं युज्यते इति चेत्- तत्र शमपदे शान्तिनामक-अक्रोधो ग्राह्य इत्येकं समाधानम् । द्वितीयार्धे 'तदर्पितमनोवचनात्मगेहप्राणः' इत्युक्तत्वात् तदर्पितसकलः अन्त्यजः जातापरोक्षत्वात् भूरिमानत्वेन अनपरोक्षिणो ब्राह्मणाद्वर इति द्वितीयं समाधानम् ।।

**क्वाहं रजःप्रभव ईश तमोऽधिकेऽस्मिन्**
**जातः सुरेतरकुले क्व तवानुकम्पा ।**
**न ब्रह्मणो न तु भवस्य न वै रमाया**
**यन्मेऽर्पितः शिरसि पद्मकरप्रसादः ।। २६ ।।**

‘न ब्रह्मणो नतु भवस्य’ इत्यत्र इदानीं नार्पित इत्यर्थः । तच्च प्रल्हादस्य तात्कालिकोपचेयत्वात् ।।

**तत्सम्भवः कविरतोऽन्यदपश्यमान-**
**स्त्वां बीजमात्मनि ततं स बहिर्विचिन्वन् ।**
**नाविन्ददब्दशतमप्सु निमज्जमानो**
**जातेऽङ्कुरे कथमिहोपलभेत बीजम् ।। ३४ ।।**

‘जातेङ्कुरे कथमिहोपलभेत बीजम्’ इत्यत्र अनुपलब्धिमात्रे दृष्टान्तो न विकारेपि । अत्र विशेषस्तु विजयध्वजीयादेवावगन्तव्यः । विस्तरभिया नेहोच्यते ।।

**स त्वात्मयोनिरति विस्मित आश्रितोऽब्जं**
**कालेन तीव्रतपसा परिशुद्धभावः ।**
**त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं**
**भूतेन्द्रियाशयमये विततं ददर्श ।। ३५ ।।**

‘गन्धमिवातिसूक्ष्मम्’ इत्यत्र अतिसूक्ष्मत्वे दृष्टान्तो नतु तद्गुणत्वे । गन्धशब्देन पृथिवीव्यापकदेवोक्तेः ।।

**इत्थं नृतिर्यगृषिदेवझषावतारै-**
**र्लोकान् विभावयसि हंसि जगत्प्रतीपान् ।**

**धर्मं महापुरुष पासि युगानुवृत्तं**
**छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ।। ३८ ।।**

'नृतिर्यगृषि' इत्यत्र न्रवतारो रामादिः । तिर्यगवतारो वराहादिः । ऋष्यवतारो महिदासादिः । देवावतार उपेन्द्रादिः । झषावतारो मत्स्यादिरिति विवेकः ।।

**कोऽन्वत्र तेऽखिलगुरो भगवन् प्रयास**
**उत्तारणेऽस्य भवसम्भवलोपहेतोः ।**
**मूढेषु वै महदनुग्रह आर्तबन्धो**
**किं तेन ते प्रियजनाननुसेवमानः ।। ४२ ।।**

'मूढेषु वै महदनुग्रहः' इत्यत्र ज्ञानिरक्षणं न महत् किन्त अस्मदादिमूढरक्षणमेव महदित्यर्थः ।। यथोक्तं दासार्यैः 'दोड्डवरनु काय्वुदेनु हिरिदो परमदड्डरनु काय्वुदे बिरुदो' इति ।।

**प्रायेण देवमुनयः स्वविमुक्तिकामा**
**मौनं चरन्ति विजने न परार्थनिष्ठाः ।**
**नैतान् विहाय कृपणान् विमुमुक्ष एको**
**नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ।। ४४ ।।**

'नैतान् विहाय कृपणान् विमुमुक्ष एक' इति । अत एव प्रल्हादो राघवेन्द्रयतित्वेनावततार वेङ्कण्णादीनुज्जहारेति सम्प्रदायज्ञाः ।।

**तत्वे मनो दर्शने दृगपि स्तुतौ च**
**वाक् कर्मणि ह्यपि करौ श्रवणं कथायाम् ।**
**संसेवया त्वयि विनेति षडङ्गया किं**
**भक्तिं जनः परमहंसगतौ लभेत ।। ५० ।।**

'तत्वे मन' इत्यत्र मनो-दृक्-वाक्-कर-श्रवणाख्यपञ्चाङ्गान्युक्तानि । उत्तरार्धे 'षडङ्गया' इत्युच्यते । षट्त्वमपिशब्दोक्तपादग्रहणेन पूरयितव्यम् ।।

**नारद उवाच–**

**एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः ।**
**एकान्तित्वाद् भगवति नैच्छत् तानसुरोत्तमः ।। ५५ ।।**

'एकान्तित्वाद्भगवति' इत्यत्र । ननु ऋजुतत्पत्न्य एवैकान्तभक्ताः । 'एकान्तानां न कस्यचिदर्थे नारायणः' इत्युक्तलक्षणस्य तेष्वेव सम्भवात् । तेषामेव भक्तियोगिषु गणितत्वात् । प्रल्हादस्तु कर्मयोगिषु गतः कर्मजदेवतात्वादितीयं शङ्का 'ये दीयमानं मोक्षमपि स्वभक्तफलत्वेन न मन्यन्ते, किन्तु भगवदाज्ञात्वेन गृह्णन्ति त एकान्तिनः' इति लक्षणं प्रल्हादपर्यन्तेषु गतमिति गुरुपादोक्तरीत्या परिहर्तव्या ।।

**प्रल्हादकृतनरसिंहस्तुत्या भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते सप्तमस्कन्धे नवमोऽध्यायः**

## अथ दशमोऽध्यायः

**भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ।**
**कीर्तिंविशुद्धांसुरलोकगीतांवितायमामेष्यसिमुक्तबन्धः।।१४।।**

'भोगेन पुण्यं कुशलेन पापम्' इत्यत्र प्रारब्धमित्युपस्कर्तव्यम् । प्रल्हादस्य जातापरोक्षत्वेन सञ्चितस्य नष्टत्वात् ।।

**श्रीभगवानुवाच–**

**त्रिः सप्तभिः पिता पूतः पितृभिः सह तेऽनघ ।**
**यत् साधोऽस्य कुले जातो भवान् वै कुलपावनः ।। १९ ।।**

'त्रिः सप्तभिः पिता पूतः' इत्यत्र दश पूर्वेषां दशोत्तरेषामित्याद्युक्त-प्रकारेण पूर्वे दश अपरे दश स्वयमेक इति एकविंशतिरत्र ग्राह्या न भवन्ति । प्रल्हादस्य पिता हिरण्यकशिपुः, पितामहः कश्यपः, प्रपितामहो मरीचिरिति त्रिपुरुषेष्वेव वंशावसानात् । अतो भगवत्पादाः जन्मान्तरपितृभिः सहेति व्याचख्युः । मूले त्रिःसप्तभिरित्युक्तत्वात् अनेकप्रकारा अत्र सम्भवन्ति । त्रिजन्मसु सप्तपितर इति वा सप्तजन्मसु त्रिपितर इति वा एकविशतिजन्मसु एकैकपितेति वा । अत्र कः प्रकार इत्यत्र महान्तः प्रमाणम् । नास्माभिरल्पप्रज्ञैरूहितुं शक्यते ।।

**मैवंविधः असुराणां ते प्रदेयः पद्मसम्भव ।**
**अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ।।३१।।**

'मैवं विधोसुराणां ते प्रदेय' इत्यत्र ब्रह्मा स्वान्तःस्थहरिप्रेरणया हिरण्यकायैवेवं वरं ददौ नान्येषामिति मन्तव्यम् ।।

**पुनस्तौ पूर्वशापेन राक्षसौ द्वौ बभूवतुः ।**
**कुम्भकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ।।३७।।**

पुनस्तौ पूर्वशापेनेत्यादाविदमवधेयम् । हिरण्यकौ स्वसंहारकवरहनरसिंहौ भूतौ मत्वा मृतौ भूताकारौ राक्षसौ जातौ । तत्र रामं राजानं मत्वा राजानौ जातौ । तत्र चक्रधारिणं कृष्णं ब्रह्म मत्वा कृष्णे लयमीयतुरिति ।।

**धर्मो भागवतानां च भगवान् येन गम्यते ।**
**आख्यानेस्मिन् समाख्यातमाध्यात्मिकमशेषतः ।।४६।।**

धर्मो भागवतानामिति । नकेवलमाख्यायिका भागवतस्य प्रल्हादस्य किन्तु भागवतधर्माणामप्याध्यात्मिकी ।।

**पुनर्नृसिंहस्तवेन भगवद्भक्तप्रल्हादे अनुग्रहविशेषवर्णनेन च भगवन्निष्ठत्वम् ।।**

## अथ एकादशोऽध्यायः

**नारद उवाच–**

**स एष भगवान् राजन् व्यतनोद् विततं यशः ।**
**पुरा रुद्रस्य देवस्य मयेनानन्तमायिना ।। १ ।।**

'मयेनानन्तमायिना' इत्यत्र विरोधं कारयित्वेति शेषः । सर्वं जगद्भगवदधीनं वा नवेति रुद्रस्य संशये जाते अल्पेन मयेन विरोधं कारयित्वा किन्तु मया कार्यमिदानीमिति बुद्धिं रुद्रस्योत्पादयित्वा स्वयमेवापदं परिहृत्य रुद्राय यशः सम्पादयित्वा सर्वं भगवदधीनमिति बुद्धिं दृढीचकारेति भावः ।।

**वत्स आसीत् तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ।**
**प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ।। १२ ।।**

'वत्स आसीत् तदा ब्रह्मा' इत्यत्र 'ब्रह्मगायत्रिभावे तु नांशावतरणं क्वचित्' इति वचनस्य विरोधो नाशङ्क्यः । नेदमंशावतरणम्, किन्तु विविध-सर्जनार्थं छायाद्यनेकरूपधारणवत् भगवत्सेवायै रूपविशेषधारणमेव । एवमेव भविष्योत्तरोक्तरीत्या शिशुगोरूपधारणमपि समाधेयम् ।।

**रथं सूतं ध्वजं वाहं धनुर्वर्म शरादि यत् ।**
**सन्नद्धो रथमास्थाय सशरं धनुराददे ।। १६ ।।**

'रथं सूतम्' इत्यत्र भूमिमेव रथं, ब्रह्माणमेव सूतं त्रिगुणमेव ध्वजं मेरुमेव धनुः स्वात्मानमेव शरं व्यधादित्यवगन्तव्यम् ।।

**एवं दग्ध्वा पुरस्तिस्रो भगवान् पुरहा नृप ।**
**ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ।। १९ ।।**

ब्रह्मा एव आदिः कारणं येषां तैः सनकादिभिः । बृहस्पत्यादिभिर्वा ।

त्रिपुरहरहरसाहाय्यकरणरूपभगवन्महिमावर्णनेन भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते सप्तमस्कन्धे एकादशोऽध्यायः**

# अथ द्वादशोऽध्यायः

**श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ।**
**सेवेज्याऽवनतिः सख्यं दास्यमात्मसमर्पणम् ।। ११ ।।**

'महतां गतेः सेवा' इत्यत्र गम्यते अनेन इति गतिरिति करणे क्तिन् । पाद इत्यर्थः । अतः पादसेवनमित्युक्तं भवति । भगवतः पादसेवायां श्रीरेवाधिकृतेति भगवदाविष्टमहत्पादसेवनेन भगवत्पादसेवनं सम्पाद्यमित्यभिप्रायः ।।

'दास्यमात्मसमर्पणम्' इत्यत्र दास्यं बहिःस्थेश्वरदासत्वम् । आत्मसमर्पणं तु अन्तर्यामिणः प्रेरकत्वस्यानुसन्धानम् । स्वात्मात्मीयसमस्तस्य भगवदधीनत्वचिन्तनं वा ।।

**नृणामयं परो धर्मः सर्वेषां समुदाहृतः ।**
**त्रिंशल्लक्षणसंयुक्तः सर्वात्मा येन तुष्यति ।। १२ ।।**

'त्रिंशल्लक्षणसंयुक्तः' इत्यत्र सत्याद्यात्मदेवताबुद्धिपर्यन्ता उपभागवता धर्मा येषामनुष्ठानेन श्रवणादिनवकाख्यमुख्यभागवतधर्मानुष्ठानसिद्धिरिति विवेकः ।।

**ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ।**
**ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ।। १८ ।।**

'ऋते राजन्यमापत्सु' इत्यत्र राजन्यः क्षत्रियः आपदि उत्तमां स्वापेक्षयोत्तमां ब्राह्मणवृत्तिं चरेत् ।'चरेद्वा विप्ररूपेण'इत्यन्यत्रोक्तत्वात् । वैश्यादयस्तु स्वापेक्षयोत्तमां क्षत्रादिवृत्तिं न चरेयुरित्यप्यर्थो ज्ञेयः । अन्ये अर्था विजयध्वजीये द्रष्टव्याः ।।

**शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् ।**
**दानं दयाऽच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ।। २२ ।।**

**शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ।**
**ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् ।। २३ ।।**

शमो दम इत्यादि । गीताभाष्योक्तरीत्या क्षत्रियादिष्वपि शमादयः अल्पाल्पतरत्वेन ज्ञेयाः ।।

**सन्तुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ।**
**अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ।। २९ ।।**

'पतिं त्वपतितं भजेत्' इत्यत्र पतौ पतिते तु तत्सङ्गं त्यक्त्वा पितृ-मातुल-भ्रातृ-राजाद्यन्यतममाश्रित्य ब्रह्मचर्येण वर्तेतेत्यर्थः ।।

**एवं कामाशयं चित्तं कामानामतिसेवया ।**
**विरज्येत यथा राजन्नाग्निवत् कामबिन्दुभिः ।। ३५ ।।**

'विरज्येत यथा' इत्यत्र योग्यानां चित्तं विरज्येत । अयोग्यानां नेति विवेकः ।।

**भगवद्भक्तिसाधनधर्मवर्णनाद् भगवन्निष्ठत्वमास्कन्धसमाप्ति ।।**

**इति श्रीमद्भागवते सप्तमस्कन्धे द्वादशोऽध्यायः**

## अथ त्रयोदशोऽध्यायः

**वर्जयेत् प्रमदागाथामगृहस्थो बृहद्व्रतः ।**
**इन्द्रियाणि प्रमाथीनि हरन्त्यपि यतेर्मनः ।। ७ ।।**

यतेः प्रयतं कुर्वतोपि । 'यती प्रयत्ने' ।

**न कृष्टपच्यमश्नीयादकृष्टं वाऽप्यकालतः ।**
**अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ।। १८ ।।**

'न कृष्टपच्यमश्नीयात्' इत्यत्र अश्नीयादिति पूर्वत्रोत्तरत्र च सम्बध्यते । तथाच कृष्टपच्यं नाश्नीयात् । अकृष्टपच्यमश्नीयादिति सम्बन्धः । तथा अकालतो नाश्नीयात् । अग्निपक्वं नाश्नीयात् । आमं वा अर्कपक्वं वाश्नीयादिति सम्बन्धः ।।

**यदाऽकल्पः स्वक्रियायां व्याधिभिर्जरयाऽथवा ।**
**आन्विक्षिक्यां च विद्यायां कुर्यादनशनादिकम् ।। २३ ।।**

'कुर्यादनशनादिकम्' इत्यत्र देहं त्यक्तुमनशनव्रतं कुर्यात् । आदिपदेन भृगुपतनाद्वा महानद्यां वा स्वाग्नौ वा देहं त्यजेदिति ग्राह्यम् ।।

**आत्मन्यग्नीन् समारोप्य संन्यस्याहं ममात्मताम् ।**
**कारणेषु न्यसेत् सम्यक् सङ्घातं तु यथार्हतः ।। २४ ।।**

'कारणेषु न्यसेत्' इत्यादिना देहत्यागकाले कर्तव्यं लयचिन्तनमाह ।।

**ब्रह्मचारिवानप्रस्थधर्मवर्णनात् देहत्यागकाले वानप्रस्थोपलक्षित-सर्वाश्रमिभिरवश्यकर्तव्यलयचिन्तनस्य वर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते सप्तमस्कन्धे त्रयोदशोऽध्यायः**

## अथ चतुर्दशोऽध्यायः

**बिभृयाद् यद्यसौ वासः कौपीनाच्छादनं परम् ।**
**त्यक्तं न लिङ्गदण्डाभ्यामन्यत् किञ्चिदनापदि ।। २ ।।**

'कौपीनाच्छादनं परम्' इत्यत्र परं केवलं कौपीनरूपाच्छादन-

मित्येकोर्थः । कौपीनरूपाच्छादनं परं नितम्बाच्छादनमिति द्वितीयोर्थः । कौपीनं नितम्बाच्छादनं परम् कन्थारूपमिति तृतीयोर्थः । परमित्येतदावर्त्य करवस्त्रमपीति चतुर्थोर्थ इति गुरुपादाः ।।

**क्वचिदल्पं क्वचिद् भूरि भुङ्क्तेऽन्नं साध्वसाधु वा ।**
**क्वचिद् भूरिगुणोपेतं गुणहीनमुत क्वचित् ।। ३७ ।।**

**श्रद्धयोपहृतं क्वापि कदाचिन्मानवर्जितम् ।**
**भुङ्क्ते भुक्त्वाऽथ कस्मिंश्चिद् दिवा नक्तं यदृच्छया ।।३८ ।।**

**नाहं निन्दे च न स्तौमि स्वभावविषमं जनम् ।**
**एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ।। ४२ ।।**

'क्वचिदल्पम्' इत्यादि यथासम्भवमेकजन्मनि बहुजन्मसु वा ध्येयम् ।।।

**भगवत्प्रिययतिधर्मवर्णनाद् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते सप्तमस्कन्धे चतुर्दशोऽध्यायः**

## अथ पञ्चदशोऽध्यायः

**यावदर्थ उपासीनो देहे गेहे च पण्डितः ।**
**विरक्तो रक्तवत् तत्र नृलोके नरतां न्यसेत् ।। ६ ।।**

'विरक्तो रक्तवत्' इत्यत्र विरक्तो भूत्वा रक्तपुरुष इव नरतां न्यसेत् । रक्तपुरुषो यथा करचरणादिवत्वमात्रेण नरतां भजति तथा न स्यादित्यर्थः । अथवा विरक्तो रक्तवदित्येतत् पूर्वार्धेन सम्बन्ध्यते । विरक्तोपि रक्त इव यावदर्थमुपासीन इति । रक्तवच्चरणाभावे संसारधर्मानामेवाननुष्ठानप्रसङ्गात् ।।

**नृगोखराश्वमर्कांस्तु सरीसृपविमक्षिकान् ।**

**आत्मनः पुत्रवत् पश्येत् तैरेषामन्तरं कियत् ।। १० ।।**

‘आत्मनः पुत्रवत् पश्येत्’ इत्यत्र यथा आत्मनः पुत्रो सुखी स्यान्नतु दुःखी इति चिन्तनमेवमेव नृगोखरादिविषयेपि चिन्तयेदित्यर्थः ।।

**आश्वाघान्तेवसायिभ्यः कामान् संविभजेद् यथा ।**
**आस्वैतान् महतो दारान् नृणां सत्त्वग्रहो यतः ।। १२ ।।**

‘आस्वैतान् महतो दारान्’ इत्यनेन महत्कुले जातां कन्यामुद्वहेत् । तचेन सत्वगुणाभिवृद्धिः स्यादिति वक्ति । अत एव ‘जग्राह विप्रवृषभप्रतिपादितां सः’ इत्युक्तम् ।।

**कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम् ।**
**क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ।। १४ ।।**

‘कृमि...नभच्छदिः’ इत्यस्यायं भावः । कलेवरमनित्यम् । तत्सम्बन्धिरतिमती भार्या । देह एवानित्यत्वात् न स्वीयः । तदीयरतिः तद्रतिमती भार्या । एवमपि रतावेवासक्तिश्चेत् नभश्छदिराकाशवद् व्याप्त आत्मा परमात्मा क्व लभ्य इति ।।

**सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद् वृत्तिमात्मनः ।**
**शेषे स्वत्वं त्यजेत् प्राज्ञः पदवीं महतामियात् ।। १५ ।।**

‘शेषे स्वत्वं परित्यजेत्’ इत्यत्र यज्ञशेषेपि स्वाधीनत्वबुद्धिं परित्यजेत् । तदपि भगवदायत्तं भगवत्प्रसादरूपमिति भावयित्वा भुञ्जीतेत्यभिप्रायः ।

**द्वादश्यामनुराधा स्यात् श्रवणास्तिस्र उत्तराः ।**
**तिसृष्वेकादशी चासु जन्मर्क्षं सौम्ययोगयुक् ।। २४ ।।**

‘द्वादश्यामनुराधा’ इत्यस्यायं भावः । द्वादश्यामनुराधा मार्गशीर्षे वा

पुष्ये वा कृष्णपक्षे सम्भवति । ज्येष्ठे आषाढे वा शुक्लपक्षे सम्भवति । द्वादश्यामथवैकादश्यां श्रवणः भाद्रपदशुक्लपक्षे वा आश्विनशुक्लपक्षे वा माघे वा फाल्गुने वा कृष्णपक्षे सम्भवति । एवं तिस्र उत्तरा नाम उत्तराफल्गुनी, उत्तराषाढा, उत्तराभाद्रा । तेषां योगः एकादश्यां द्वादश्यां वा यदा भवति तदा पुण्यकालविशेषः । तस्मिन् दिने वेधादिनोपवासाभावे श्राद्धमपि । अन्यथा स्नानदानादीति विवेकः ॥

किञ्च यस्मिन् पुण्यकाले उपवासप्रसक्तिः तस्मिन् पवमानपारायणेन वा स्वशाखोक्तपितृसूक्तपारायणेन वा पितृणां तृप्तिरिति ॥

**यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् ।**
**यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः ॥ ३० ॥**

'यत्र गङ्गादयः' इति ॥ अनेन पुराणेष्वप्रसिद्धा हूणदेशेषु विद्यमाना व्यावृत्ताः ॥

**एते पुण्यतमा देशा हरेरर्चाश्रिताः पुनः ।**
**एतान् देशान् निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ॥ ३४ ॥**

'एतान् देशान् निषेवेत' इति विधेरितरदेशा न निषेवणीया इत्यर्थाल्लभ्यते ॥

**गृहस्थधर्मेणापि भगवत्प्रीतिसम्पादनोपायवर्णनेन भगवन्निष्ठत्वम् ॥**

**इति श्रीमद्भागवते सप्तमस्कन्धे पञ्चदशोऽध्यायः**

## अथ षोडशोऽध्यायः

**न दद्यादामिषं श्राद्धे न चाद्याद् धर्मतत्त्ववित् ।**
**मुनीनां स्यात् परा प्रीतिर्यथा न पशुहिंसया ॥ ७ ॥**

‘न दद्यादामिषं श्राद्धे’ इति निषेधात् कलौ युगे आमिषस्थाने माषं देयम् । मधुस्थाने ये मातृदुहितरौ गावौ दुहतस्तयोर्मातृगोक्षीरं दद्यात् इति सम्प्रदायज्ञाः ।।

**धर्मार्थमपि नेहेत यात्रार्थं वाऽधनो धनम् ।**
**अनीहाऽनीहमानस्य महाहेरिव वृत्तिदा ।। १५ ।।**

‘धर्मार्थमपि नेहेत’ इत्यनेन धनसम्पत्तौ सत्यां धनसाध्यप्रपादानादि कार्यम् । नतु तदर्थं धनसङ्ग्रहः कार्य इत्युक्तं भवति ।। यदि गृहस्थस्याप्येवं विधो धर्मस्तर्हि किमुत यतिनः? अत एवोक्तं यतेराश्रमः प्रायो धर्माय नेति ।।

**असङ्कल्पाज्जयेत् कामान् क्रोधं कामविवर्जनात् ।**
**अर्थानर्थेक्षया लोभं भयं तत्वावमर्शनात् ।। २२ ।।**

‘भयं तत्वावमर्शनात्’ इत्यत्र ‘स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्वमिष्यते । स्वतन्त्रो भगवान्विष्णुः’ इति तत्वावमर्शनेन भयं जयेदित्यर्थः । व्याघ्रो वा चोरो वा मां हन्यादिति भयं भयजनकस्य स्वातन्त्र्यं मन्वानस्यैव भवति । भगवदधीनत्वज्ञाने कुतो भयम्?

**आन्वीक्षिक्या शोकमोहौ दम्भं महदुपाश्रयात् ।**
**योगान्तरायान् मौनेन हिंसां कायाद्यनीहया ।। २३ ।।**

‘आन्वीक्षिक्या शोकमोहौ’ इत्यत्र आन्वीक्षिकी तत्वविद्या । शोको नाम अतीतदुःखस्मरणम् । तच्च प्रागुक्ततत्वविस्मृतावेव भवति । मोहो नाम मिथ्याज्ञानम् । तदपि तत्वविद्याभ्यासेन परिह्रियते ।।।

**कृपया भूतजं दुःखं दैवं जह्यात् समाधिना ।**
**आत्मजं योगवीर्येण निद्रां सत्वनिषेवया ।। २४ ।।**

'निद्रां सत्वनिषेवया' इत्यत्र सत्वनिषेवा सात्विकपदार्थसेवनम् । तेन सत्वे वृद्धे तमोभिभूतमिति तत्कार्यनिद्राजयः ॥

**कार्यकारणवस्त्वैक्यदर्शनं पटतन्तुवत् ।**
**अवस्तुत्वाद् विकल्पस्य भावाद्वैतं तदुच्यते ॥ ६३ ॥**

कार्यकारणवस्त्वैक्यदर्शनमित्यादि ॥ कार्यकारणस्थितभगवद्रूपैक्यचिन्तनं भावाद्वैतम् । कर्तृकर्मक्रियास्थभगवद्रूपैक्यचिन्तनद्वारा भगवति कर्मसमर्पणं क्रियाद्वैतम् । स्वस्वीयान्तर्गतभगवद्रूपैक्यचिन्तनं द्रव्याद्वैतमिति विवेकः ॥

**अहं पुराऽभवं कश्चिद् गन्धर्व उपबर्हणः ।**
**नाम्नाऽतीते महाकल्पे गन्धर्वाणां सुसम्मतः ॥ ६९ ॥**

'अहं पुरा' इत्यादिना महद्धेलन-सेवयोर्निन्दाप्रशंसाद्वारा तयोः कार्याकार्यत्वोक्तिः ॥

**भगवत्प्रीतिसाधनगृहस्थधर्माणां अवश्यकर्तव्यचिन्तनविशेषाणां मार्गगम्यानां महत्सेवाहेलनाफलस्य च वर्णनेन भगवन्निष्ठत्वम् ॥**

**इति श्रीमद्भागवते सप्तमस्कन्धे षोडशोऽध्यायः**

**॥ इति सप्तमस्कन्धः ॥**

**॥ इति श्रीसप्तमस्कन्धगतप्रमेयसङ्ग्रहः ॥**

# अथ अष्टमस्कन्धः

## अथ प्रथमोऽध्यायः

**आत्मावास्यमिदं विश्वं यज्जगत्यां जगन्मनः ।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यचिद् धनम् ।। १० ।।**

'आत्मावास्यम्' इत्यत्र एकपदकरणात् 'ईशावास्यम्' इति श्रुतावपि एकपदं करणीयमिति सूचयामास भगवान् इति सम्प्रदायविदः ।।

**अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः ।**
**अन्वशिक्षन् व्रतं तस्य कौमारब्रह्मचारिणः ।। २२ ।।**

'अन्वशिक्षन्' इत्यत्र ब्रह्मचर्यशिक्षणार्थमेवावतारमिदमिति ब्रह्मचर्यविषये बहुवक्तव्यमस्तीति ज्ञायत इति गुरुपादाः ।।

**यज्ञ-विभु-सत्यसेनावतारवर्णनात्तापसावतारप्रस्तावाच्च भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते अष्टमस्कन्धे प्रथमोध्यायः ।।**

**आर्तानां भगवानेव शरणमिति गजेन्द्रेतिहासेन कथनात् भगवन्निष्ठत्वम्**

**।। इति श्रीमद्भागवते अष्टमस्कन्धे द्वितीयोध्यायः ।।**

## अथ तृतीयोऽध्यायः

**यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ।**
**योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम् ।। ३ ।।**

'य इदं स्वयम्' इत्यनेन प्राप्ताभेदशङ्का निवार्यते योऽस्मात् परस्माच्च पर इति ।।

**न विद्यते यस्य च जन्म कर्म वा**
**न नामरूपे गुणदोष एव वा ।**
**तथापि लोकाश्रयसंभवाय यः**
**स्वमायया तान्यनुकालमृच्छति ।। ८ ।।**

प्राकृतजन्मादीनि न सन्ति । तथापि स्वेच्छया अप्राकृतानि ऋच्छति । स्थितस्यैव व्यक्तिः प्राप्तिः ।।

**सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ।**
**असत्याच्च विमुक्ताय सदाभासाय ते नमः ।। १४ ।।**

सदाभासेयेति । सत् एव आभासः प्रतिबिम्बो यस्य । 'सद् वावः प्राणः' इति श्रुतेः ।।

**तं वीक्ष्य पीडितमजः सहसाऽवतीर्य**
**सग्राहमाशु सरसः कृपयोज्जहार ।**
**ग्राहाद् विपाटितमुखादरिणा गजेन्द्रं**
**सम्पश्यतां हरिरमूमूचदुस्रियाणाम् ।। ३१ ।।**

'सहसा अवतीर्य' इत्यनेन भक्तरक्षणे त्वरा सूच्यते । तदुक्तं श्रीमद्वादिराजश्रीमच्चरणैः ' या त्वरा जलसञ्चारे या त्वरा वेदरक्षणे' इत्यादि ।।

**गजेन्द्रस्तोत्रेण गजेन्द्रमोचनाख्यमहिमावर्णनेन च स्फुटं भगवन्निष्ठत्वम् ।।**

## अथ चतुर्थोऽध्यायः

**योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपदृक् ।**
**मुक्तो देवलशापेन हूहूर्गन्धर्वसत्तमः ।। ३ ।।**

‘मुक्तो देवलशापेन’ इत्यत्र गजेन्द्रमोक्षणात् पूर्वमेव ग्रहमोचनेनेदं द्योत्यते । यद्धरिः स्वाश्रितमोचनादपि पूर्वं स्वाश्रिताश्रितमोचनं करोतीति सत्यधर्मीये व्यक्तम् ।।

**स एकदाऽऽराधनकाल आत्मवान्**
**गृहीतमौनव्रत ईश्वरं हरिम् ।**
**जटाधरस्तापस आप्लुतोऽच्युतं**
**समर्चयामास कुलाचलाश्रयः ।। ८ ।।**

**यदृच्छया तत्र महायशा मुनिः**
**समागमच्छिष्यगणैः परिश्रितः ।**
**तं वीक्ष्य तूष्णीमकृतार्हणादिकं**
**रहस्युपासीनमृषिश्चुकोप ह ।। ९ ।।**

**तस्मा इमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धिरद्य ।**
**.मेलनात् प्राविशतां तमिस्रं यथा गजः स्तब्धमतिः सदोषः ।। १० ।।**

‘स एकदा’ इत्यादना पूजादिसमये सतामागमने अवश्यमभ्युत्थानं कर्तव्यमित्युक्तं भवति ‘...विदित्वागमनं सताम्’ इति शतापराधेषु पठितत्वात् ।।

**आपन्नः कौञ्जरीं योनिमात्मस्मृतिविनाशिनीम् ।**
**हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः ।। १२ ।।**

‘आपन्नः कौञ्जरीं योनिम्’ इत्यत्रेदमवगन्तव्यम् । स्वजलक्रीडाकाले आगतं देवलं भीषयितुं गजनक्ररूपे धृतयोः हाहाहूह्वोस्तत्तज्जन्मप्राप्तिरूपशापदानेपि हूहूस्तदैव ग्रहतामाप । हाहास्तु भीतो देवलं शैत्योपचारेणोतिथतवानिति तस्यानुग्रहस्यापि कृतत्वेन प्रथममिन्द्रद्युम्नो बभूव । यदृच्छया

अगस्त्येनापि गजयोनिप्राप्तिरूपशापदानेनान्तरं गजो बभूवेति । अत्र विष्णुपुराणं प्रमाणम् ।।

**गजेन्द्रमोचनवर्णनेन दुःस्वप्नादिदुरितनिवारणरूपमाहात्म्यवर्णनेन च भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते अष्टमस्कन्धे चतुर्थोऽध्यायः।।**

## अथ पञ्चमोऽध्यायः

**वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः ।**
**रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ।। ५ ।।**

'वैकुण्ठः कल्पितः' इत्यत्र धामत्रयस्य रमात्मकत्वात् कल्पनं नाम अभिव्यक्तिरिति ज्ञेयम् ।।

**ब्रह्मकृताजितस्तोत्रेण भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे पञ्चमोऽध्यायः**

## अथ षष्ठोऽध्यायः

**विरिञ्चो भगवान् दृष्ट्वा सह शर्वेण भारत ।**
**स्वच्छं मरकतश्यामं कञ्जगर्भारुणेक्षणम् ।। ३ ।।**

'विरिञ्चो दृष्ट्वा सह शर्वेण' इत्यनेनेदं ज्ञायते । कानिचिद्भगवद्रूपाणि क्वचित् ब्रह्मशर्वयोरेव द्रष्टुं योग्यानि यथेदानीमजितरूपम् । कानिचिद् ब्रह्मणोपि क्वचिन्न । यथा कृष्णावतारात् प्राक् क्षीरसमुद्रतीरे श्वेतद्वीपगतभगवद्रूपम् । तत्र ब्रह्मणा केवलमशरीरवाणीश्रवणात् ।।

कानिचिद्देवैरपि दृश्याणि यथा वृत्रपीडितदेवदृष्टानि परिवारिपरिवार-भावापन्नसप्तदशरूपाणि ।। कानिचित् मनुष्यैरपि दृश्यानि यथा अवतारकाले

रामकृष्णादीनि ।। रमायास्तु सर्वाणि रूपाणि सर्वदा दृश्यानीति भगवद्रूपदर्शनेपि महातारतम्यमस्तीति ।।

**त्वय्यग्र आसीदिदमात्मतन्त्रे**
**त्वमादिरन्तो जगतोऽस्य मध्यम् ।**
**घटस्य मृत्स्नेव परः परस्मात्**
**त्वमेव चाशेषविशेषनामा ।। १० ।।**

'घटस्य मृत्स्नेव' इत्यत्र कारणत्वमात्रे तदधीतसत्ताकत्वे च दृष्टान्तो नतूपादनत्वे । परमचेतनस्य ब्रह्मण उपादानत्वासम्भवात् । नह्यूर्णनाभिर्जालत्वेन परिणमते ।।

**अवरोप्य गिरिं स्कन्धात् सुपर्णः पततां वरः ।**
**ययौ जलान्त उत्सृज्य हरिणा स विवर्जितः ।। ३९ ।।**

'अवरोप्यं गिरिम्' इत्यत्र तात्पर्यवचनम्-

**'अनन्तोढो मन्दरस्तु यथा वैवस्वतान्तरे ।**
**अमृतार्थे सुपर्णोढो रैवतस्यान्तरे मनोः' इति ।**

तत्रेयमाशङ्का – रैवतवैवस्वतान्तरयोरमृतमन्थने निर्णयः कृतः । प्रकृते तु चाक्षुषमन्वन्तरीया कथा प्रवृत्ता । तत्र केनोढमिति कथं न निर्णीतमिति । रैवतस्येत्यत्र चाक्षुषश्चेति भवितव्यं वा? अत्र महान्तः प्रष्टव्याः ।।

**पुनर्ब्रह्मकृतस्तोत्रेण भगवत्प्रतिवचनेन मन्दरचूर्णितदेवासुरोत्थापन-महिमावर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे षष्ठोऽध्यायः**

## अथ सप्तमोऽध्यायः

**उपर्यगेन्द्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः ।**
**तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यैरभिष्टुवद्भिः सुमनोभिवृष्ट्या ।। १२ ।।**

'उपर्यगेन्द्रमाक्रम्य' इत्यत्र मथनवेगादुत्पतद्गिरिस्थापनाय उपर्याक्रमणमिति ज्ञातव्यम् ।।

**अहो बत भवान्येतत् प्रजानां पश्य वैशसम् ।**
**क्षीरोदमथनोद्भूतात् कालकूटादुपस्थितम् ।। ३७ ।।**

'अहो बत' इत्यादिना भवान्या अनुमोदननिरीक्षणं तु गृहस्थो गृहिण्या अनुमोदितो धर्ममाचरेदिति शिक्षणाय । 'धर्मे चार्थे च कामे च नातिचरामि'इति प्रतिज्ञातत्वात् ।।

**पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः ।**
**प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ।**
**तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ।। ४० ।।**

'पुंसः कथयते भद्रे' इत्यनेन दयाख्यभागवतधर्मः प्रदर्शितः । यथोक्तं 'दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम्' इति ।।

**ततः करतलीकृत्य व्यापि हालाहलं विषम् ।**
**अभक्षयन्महादेवः कृपया भूतभावनः ।। ४२ ।।**

'ततः करतलीकृत्य' इत्यत्र ततः व्याप्तो वायुः व्यापि हालाहलं विषं करतलीकृतमथनेन तद्वीर्यमल्पीकृत्य अभक्षयत् रुद्रमिति शेषः । णिजन्तमिदम् । एवं व्याख्याने निर्णयानुगुण्यं सम्पादितं भवति ।।।

अजितमहिमावर्णनेन शिवान्तर्यामिस्तवनेन च भगवन्निष्ठत्वम् ।।

## अथ अष्टमोऽध्यायः

**तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः ।**
**रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ।। ८ ।।**

'तस्यां चक्रुः स्पृहां' इत्यत्र स्पृहा अनेकविध । सुराणां मातृवत् स्पृहा । मानवानामाश्चर्यवस्तुवत् स्पृहा । असुराणां कामिनीवत् स्पृहा इति ।

**समुद्रः पीतकौशेयवाससी समुपाहरत् ।**
**वरुणः स्रजं वैजयन्तीं मधुना मत्तषट्पदाम् ।। १४ ।।**

समुद्रः वरुणश्चेति एकस्यैव रूपद्वयम् ।।

**विलोकयन्ती निरवद्यमात्मनः**
**पदं ध्रुवं चाव्यभिचारिसद्गुणम् ।**
**गन्धर्वयक्षासुरसिद्धचारण-**
**त्रैविष्टपेयादिषु नान्वविन्दत् ।। १८ ।।**

'विलोकयन्ती निरवद्यमात्मनः' इत्यनेन अनादितो विष्णुपत्नी रमा भगवान् दोषदूर इति ज्ञापयितुमन्येषु दोषानुक्त्वा हरिमुररीचकारेति ज्ञातव्यम् ।।

**अथासीद् वारुणी देवी कन्या कमललोचना ।**
**असुरा जगृहुस्तां वै हरेरनुमतेन ते ।। २९ ।।**

'अथासीद्वारुणी देवी' इत्यत्र वारुणी मदिराविशेषो तदभिमानिदेवता च । 'तां जगृहुः' इति परामर्शो मदिरैव । असुरैर्देवतास्वीकारायोगात् । सेयमान्तरीरीतिः ।।

**देवाः स्वभागमर्हन्ति ये तुल्यायासहेतवः ।**
**सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ।। ३८ ।।**

**इति स्वान् प्रत्यषेधन् वै दैतेया जातमत्सराः ।**
**दुर्बलाः प्रबलान् राजन् गृहीतकलशान् मुहुः ।। ३९ ।।**

'देवाः स्वभागमर्हन्ति' इति 'दुर्बलाः प्रबलान् प्रत्यषेधन्' इत्यत्र प्रतिषेधः स्वार्थमेव नतु देवभागार्थमिति द्रष्टव्यम् ।।

**सालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः ।**
**सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वताम् ।। ५५ ।।**

सालावृका नाम वनसारमेयाः ।।

**ततो गृहीत्वाऽमृतभाजनं हरि-**
**र्बभाष ईषत्स्मितशोभया गिरा ।**
**यद्यभ्युपेतं क्व च साध्वसाधु वा**
**कृतं मया वो विभजे सुधामिमाम् ।। ५७ ।।**

'यद्यभ्युपेतं क्वच ' इत्यनेन मोहिनी 'अहमसाधु करोमि' इति सूचितवती । तथापि दैत्या मोहविशेषवशं गता न बुबुधुः । अतो नास्ति मोहिन्याः कश्चिद्दोषः । दुष्टान् प्रति सुधाविभजनस्य गुणत्वमेव ।।

**दैत्यान् गृहीतकलशो वञ्चयन्नुपसञ्चरैः ।**
**दूरस्थान् पाययामास जरामृत्युहरं सुरान् ।। ६६ ।।**

'वञ्चयन्नुपसञ्चरैः दूरस्थान् पाययामास' इति कथमिति चेत् विश्वतो हस्तस्य भगवतो नास्त्यसाध्यम् । कबन्धस्यैवातिदीर्घहस्तं दत्तवतः अतिदीर्घहस्तवत्वं किमु वाच्यमिति गुरुपादाः ।।

**ते पालयन्तः समयमसुराः स्वकृतं नृप ।**
**तूष्णीमासन् कृतस्नेहाः स्त्रीविवादजुगुप्सया ।। ६७ ।।**

'स्त्रीविवादजुगुप्सया' इत्येनेनेदमसूचि दैत्या अपि स्त्रीविवादजुगुप्सवः । अतः स्त्रीविवादं परिवर्जयेत् इति । दैत्यानां तु स्त्रीविवादजिहासा प्रणयाक्रातरत्वेनैव नतु गुणवत्तया ।।।

**शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् ।**
**यस्तु पर्वणि चन्द्रार्कावभिधावति वैरधीः ।। ७१ ।।**

'शिरस्त्वमरतां नीतम्' इत्यत्रेदमवगन्तव्यम् । स्वर्भानू राहुर्वा स्वयं दैतेयापसदः । सुधासेकेनामरतां नीते तच्छिरसि देवा आविष्टाः, ते राहुं प्रति कृतेनाराधनेन सात्विकानां तुष्टन्ति । इतरकृताणां फलभागी राहुरिति ।।

रमास्वयंवर-धन्वन्तरिमोहिन्यवतारवर्णनात् भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते अष्टमस्कन्धे अष्टमोऽध्यायः**

## अथ नवमोऽध्यायः

**रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ।**
**हया हयैरिभैश्चेभाः समसज्जन्त संयुगे ।। ८ ।।**

**उष्ट्रैः केचिद् द्विजैः केचिदपरेऽभिययुः खरैः ।**
**केचिद् गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ।। ९ ।।**

**गृध्रैः कङ्कैर्बकैरन्ये श्येनैर्भासैस्तिमिङ्गिलैः ।**
**शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ।। १० ।।**

**शिवाभिराखुभिः केचित् कृकलासैः शशैर्नरैः ।**

**बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ।। ११ ।।**

**अन्ये जलस्थलखगैः सत्वैर्विकृतविग्रहैः ।**
**सेनयोरुभयो राजन् विविशुस्तेऽग्रतोऽग्रतः ।। १२ ।।**

'रथिनो रथिभिः' इत्यादिना 'अन्ये जलस्थलखगैः' इत्यन्तेन तत्कालेपि भूसेना वायुसेना जलसेना च आसीदिति ज्ञायते ।।

**तस्मिन् प्रविष्टेऽसुरकूटकर्मजा**
**माया विनेशुर्महतां महीयसि ।**
**स्वाप्नो यथाऽहिः प्रतिबोध आगते**
**हरिस्मृतिः सर्वविपद्विमोक्षणी ।। ५५ ।।**

'तस्मिन् प्रविष्टे माया विनेशुः' इत्यनेनेदं ज्ञायते ।यद्यदि जगन्मायिकं स्यात् तर्हि आसुरी मायेव भगवदागमनेन विनश्येत् । न नष्टमतो न मायिकमिति ।

**आध्यात्मिकं भगवज्ज्ञानेन पापनाशो भवेदेवेति देवासुरयुद्धव्याजेन वर्णनात् भगवत्कृतकालनेम्यादिवधवर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे नवमोऽध्यायः**

## अथ दशमोऽध्यायः

**एवं निराकृतो देवो वैरिणा तथ्यवादिना ।**
**नामृष्यत् तदधिक्षेपं तोत्राहत इव द्विपः ।। ११ ।।**

'वैरिणा तथ्यवादिना' इत्यत्र वैरी बलिः । तस्य सात्विकत्वात् तथ्यवादित्वं युज्यते । कदाचित् प्रतीपस्त्वसुरावेशात् । असुरोपि बलिर्नाम ।।

**सखायं पतितं दृष्ट्वा जम्भो बलिसखः सुहृत् ।**
**अभ्ययात् सौहृदं सख्युर्हतस्यापि समाचरन् ।। १३ ।।**

**नारद उवाच-**

**भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः ।**
**श्रिया समेधिताः सर्वे उपारमत विग्रहात् ।। ४५ ।।**

**तत्राविनष्टावयववान् विद्यमानशिरोधरान् ।**
**उशना जीवयामास सञ्जीविन्या स्वविद्यया ।। ४८ ।।**

**बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेन्द्रियस्मृतिः ।**
**पराजितोऽपि नाखिद्यल्लोकतत्वविचक्षणः ।। ४९ ।।**

'प्रत्यापन्नेन्द्रियस्मृतिः' इत्यनेनेदं द्योत्यते । पूर्वं 'सखायं पतितम्' इति श्लोके 'हतस्यापि' इत्युक्तम् । अत्र तु प्रत्यापन्नेन्द्रियस्मृतिरित्युच्यते । नतूज्जीवित इति । पूर्वश्लोके 'अविनष्टावयववान् विद्यमानशिरोधरान् । उशना जीवयामास' इत्युक्त्वा अत्र श्लोके तद्वैलक्षण्येन बलेश्चोशनसः स्पर्शेन स्मृतिप्रत्यापत्तिः । अतो ज्ञेयं न बलिर्मृतः किन्तु गाढमूर्छामाप्तः । इदानीं स्मृतिमापन्न इति ।।

**वज्रपाणेर्माहात्म्यवर्णनेन वज्रस्थनाराणयणस्यैव महिमा वर्णित इति भगवन्निष्ठत्वम्। नारदवाक्ये 'नारायणभुजाश्रयैः' इत्यनेनेदमेवोक्तम्।।**

## अथ एकादशोऽध्यायः

**तमविक्लवमव्रीडमालक्ष्य मधुसूदनः ।**
**उवाच परमप्रीतो बिभ्रत् स्वां पौरुषीं तनुम् ।। ३६ ।।**

'अव्रीडम्' इत्यत्र भगवता मोहितोस्मीति ज्ञानेन लज्जारहितमित्यर्थः ।।

**को नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान् ।**
**तांस्तान् विसृजतीं भावान् दुस्तरामकृतात्मभिः ।। ३८ ।।**

'को नु तरेन्मायाम्' इत्यत्रेदं द्रष्टव्यम् । पूर्वा कथा शिवस्य भगवन्मायामोहितत्वं वक्ति । अत्र तु भगवान् त्वदृते को नु तरेन्मायाम्' इति वदन् शिवेन माया तीर्णेति अभिप्रैति । अतो विरोध इति चेन्न । पूर्वं भगवदिच्छाशक्तिविशेषमायया मोहितत्वमुक्तम् । अत्र तु स्त्रीमयीमाया तीर्णेत्यभिप्रैतीत्यतो न विरोध इति ।।

**अयि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ।**
**अहं कलानामृषभो विमुह्ये यया वशोऽन्ये किमुतास्वतन्त्राः ।। ४२ ।।**

कलानामृषभः श्रद्धाप्राणातिरिक्तचतुर्दशकलानां स्वामी ।।

**असदविषयमङ्घ्रिं भावगम्यं प्रपन्ना-**
**नमृतममरवर्यानाशयत् सिन्धुमथ्यम् ।**
**कपटयुवतिवेषो मोहयन् यः सुरारीं-**
**स्तमिममुपसृतानां कामपूरं नतोऽस्मि ।। ४६ ।।**

'असदविषयमङ्घ्रिम्' इत्यनेन श्रीशुकः अमृतमथनमहिमानं सङ्गृह्णाति ।।

**रुद्रमोहनरूपमहिमातिशयवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे एकादशोऽध्यायः**

## अथ द्वादशोऽध्यायः

**तत्रापि जन्म भविता हरेर्विश्वसृजां गृहे ।**
**श्रीमूर्तिरिति विख्यातो येनाप्यायेत वै जगत् ।। २२ ।।**

‘श्रीमूर्तिरिति’ इत्यत्र श्रीमूर्त्याख्यावतारो वर्णितः । पुनर्विष्वक्सेनो विषूच्यां तु ’ इति श्लोके शान्ताख्यावतारो वर्णितः । अत्र सर्वत्र मन्वन्तरेषु एकैकोवतारो वर्णितः तदनुसारेणात्रीपि श्रीमूर्तिरिव शान्त इति भाति । किञ्च सर्वत्र भगवतारस्य पितरौ निर्दिष्टौ । अतस्तदनुसारणोत्रापि विष्वक्सेनात् विषूच्यां तु इति भवितव्यमिति भाति ।। ततश्च पिता विष्वक्सेनः, माता विषूची, तत्र जातः शान्त एव श्रीमूर्तिरिति फलितोर्थः ।।

**मन्वन्तरवर्णनव्याजेन सार्वभौमादिभगवदवताराणामेव वर्णनात् भगवदाविष्टमन्वादिवर्णनाद्वा भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे द्वादशोऽध्यायः ।।**

## अथ त्रयोदशोऽध्यायः

**ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ।**
**ऋषिरूपधरः कर्म योगं योगेशरूपधृक् ।। ८ ।।**

‘सिद्धस्वरूपधृक्’ इत्यादि । सिद्धस्वरूपः कपिलः । ऋषिरूपधरः सनत्कुमारादिः । योगेशरूपः दत्तात्रेयादिः ।

**सर्गं प्रजेशरूपेण दस्यून् हन्ति स्वराड्वपुः ।**
**कालरूपेण सर्वेषामभावाय पृथग्गुणः ।। ९ ।।**

स्वराड्वपुः रामादिः । प्रजेशरूपः प्रजापत्यन्तर्गतरूपः । कालरूपः संहारकः कृष्णादिर्वा इति विवेकः । ‘कालरूपोवतीर्णोद्य’ इति वचनात् ।।

**भगवता स्वयमनेकरूपैः मन्वादिरूपैश्च जगद्यात्राविधानस्य वर्णनात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे त्रयोदशोऽध्यायः**

## अथ चतुर्दशोऽध्यायः

इतः परमध्यायाष्टके वामनावतारवर्णनम् ।। **ब्रह्मवादिना शुक्रेण स्वशिष्याय कृतस्य तेजोबृंहणस्य वर्णनेन ब्रह्मण एव महिमा वर्णितेति भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे चतुर्दशोऽध्यायः**

## अथ पञ्चदशोऽध्यायः

**क्व देहो भौतिकोऽनात्मा क्व चात्मा प्रकृतेः परः ।**
**कस्य के पतिपुत्राद्या मोह एव हि कारणम् ।। १९ ।।**

**उपतिष्ठस्व पुरुषं भगवन्तं जनार्दनम् ।**
**सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् ।। २० ।।**

उपतिष्टस्वेति ।। ‘ मोह एव हि कारणम्’ इति पूर्वश्लोके उक्तावपि मोहमपरित्यजन्तीमदितिं प्रत्याहेति भावः ।।

**फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ।**
**अर्चयेदरविन्दाक्षं भक्त्या परमयाऽन्वितः ।। २५ ।।**

**सिनीवाल्यां मृदालिप्य स्नायात् क्रोडविदीर्णया ।**
**यदि लभ्येत वै स्रोतस्येतं मन्त्रमुदीरयेत् ।। २६ ।।**

‘सिनीवाल्याम्’ इत्यत्र सिनीवासी चतुर्दशीयुक्ता अमावास्या । सिनीवाली प्रथमी इति केचन । तन्न बुद्ध्यामहे । उत्तरत्र हुतशेषभोजनस्य विधानात् । पयोभक्षणमात्रव्रते हुतशेषभोजनायोगात् । ‘सा दृष्टेन्दुः सिनीवासी’ इत्यमरोक्तेः चन्द्रदर्शनयोग्या प्रतिपत् सिनीवाली इत्युच्यते । तादृशी प्रतिपदल्पैव भवेत् ।

तादृशयोगो न नियमेन भवति पयोव्रतप्रारम्भदिने ।।

**पयसा स्नापयित्वाऽर्चेद् यावद् व्रतसमापनम् ।**
**पयोभक्षो व्रतमिदं चरेद् विष्णवर्चनादृतः ।। ४६ ।।**

'पयोभक्षो व्रतमिदम्' इत्यत्र वायुभक्ष इत्यादिवत् पयोमात्रभक्षव्रतमित्यर्थः । अतो नास्ति पयसि श्रुतस्यान्नस्य भक्षणे अवकाश इति तादृशाचारा अर्वाचीना निराकृताः ।।

**भगवत्प्रीतिसाधनपयोव्रतोपदेशाद् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे पञ्चदशोऽध्यायः**

## अथ षोडशोऽध्यायः

**प्रायोऽधुना तेऽसुरयूथनाथा**
**अवारणीया इति देवि मे मतिः ।**
**यत्तेऽनुकूलेश्वरविप्रगुप्ता**
**न विक्रमस्तत्र सुखं ददाति ।। १६ ।।**

'ते असुरयूथनाथाः ... विप्रगुप्ताः' इत्यनेन भगवतो वैषम्यनैर्गुण्याभावो द्योत्यते । तस्य स्वसङ्कल्पानुसारेण तत्तकालादृष्टानुसारित्वात् ।।

**अदितिस्तुतेः भगवदाविर्भाववरदानाभ्यां ब्रह्मकृतगर्भस्तुतेश्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे षोडशोऽध्यायः**

## अथ सप्तदशोऽध्यायः

**तं वटुं वामनं दृष्ट्वा मोदमाना महर्षयः ।**
**कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम् ।। १३ ।।**

'कर्माणि कारयामासुः' इत्यत्र द्वादश्यामभिजिति वामनस्यावतारानन्तरं कथमुपनयनादि कर्मेति मा शङ्कि । तद्दिन एव कर्माणि कारयामासुरित्यनुक्तेः ।।

**तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात् ।**
**भिक्षां भगवती साक्षादुमाऽदादम्बिका सती ।। १७ ।।**

'भिक्षां भगवती साक्षादुमा' इत्यत्र उमाया जगन्मातृत्वात् तया मातृभिक्षा दत्तेति ज्ञातव्यम् । अत्र सस्यविशेषव्यावृत्त्यर्थमम्बिकेति विजयध्वजतीर्थाः । तत्र सस्यविशेषस्य भिक्षाप्रदानाप्रसक्तेः कथं तद्वारणार्थं विशेषणमिति माशङ्कि । सस्यविशेषपदेन तदभिमानिन्या उक्तेः ।।

**तत्पादशौचं कलिकल्मषापहं**
**स धर्मविन्मूर्ध्न्यदधात् सुमङ्गलम् ।**
**यद् देवदेवो गिरिशश्चन्द्रमौलि-**
**र्दधार मूर्ध्ना परया च भक्तया ।। २८ ।।**

'तत्पादशौचं मूर्ध्न्यधात्' इत्यत्र पादप्रक्षालनमुक्तम् । पुनरेकोनविंशाध्याये 'अवनिज्यावहन् मूर्ध्नि'(८-२१-१८) इति वक्ष्यते । कथमेतदिति चेत्– पूर्वं गृहागतस्य वटोः सत्कारार्थं पादप्रक्षालनम् । पुनर्दानाङ्गत्वेन पादप्रक्षालनमित्युपपत्तेः ।।

**वामनावतारवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे सप्तदशोऽध्यायः**

## अथ अष्टादशोऽध्यायः

**वचस्तवैतज्जनदेव सूनृतं**
**कुलोचितं धर्मयुतं यशस्करम् ।**

**यस्य प्रमाणं भृगवः साम्पराये**

**पितामहः कुलवृद्धः प्रशान्तः ।। २ ।।**

'वचस्तैवैतत्' इत्यादिना भगवान् कश्चिद्यजमानं प्रति किञ्चिल्लिप्सुनोच्यमानां वाचमनुकरोतीति द्रष्टव्यम् ।।

**यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगते ।**

**नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ।। ६ ।।**

'नात्मानं जयिनं मेने' इत्यत्र हिरण्याक्षजयो न महाजय इत्यतो नात्मानं जयिनं मेन इत्यर्थः ।।

**बलिरुवाच-**

**अहो ब्राह्मणदायाद वाचस्तेऽवृद्धसम्मताः ।**

**त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा ।। १८ ।।**

साक्षाद् भगवानेव वामन इत्यजानन् बलिराह 'अहो ब्राह्मणदायाद' इत्यादिना ।।

**श्रीभगवानुवाच-**

**यावन्तो विषयाः प्रेष्ठास्त्रिलोक्यामजितेन्द्रियम् ।**

**न शक्नुवन्ति ते सर्वे प्रतिपूरयितुं नृप ।। २१ ।।**

ब्राह्मणस्य सन्तोषगुण आवश्यक इत्याह वामनः यावन्त इत्यादिना ।

**तस्मात् त्रीणि पदान्येव वृणे त्वद् वरदर्षभात् ।**

**एतावतैव सिद्धोऽहं वित्तं यावत्प्रयोजनम् ।। २७ ।।**

'एतावतैव सिद्धोहम्' इत्यत्र बलेः समस्तभूमिं द्यां चादातुं पदद्वन्द्वेनालम् ।

बलिं सुतलं प्रति प्रेषयितुं तृतीयेनालमिति भावः ।।

**उशना उवाच-**

**एष वैराचने साक्षाद् भगवान् विष्णुरव्ययः ।**
**कश्यपाददितेर्जातो देवानां कार्यसाधकः ।। ३० ।।**

**प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता ।**
**न साधु मन्ये दैत्यानां महानुपगतोऽनयः ।। ३१ ।।**

भगवानेव देवकार्यार्थमागत इति जानन् उशना शिष्याय हितोपदेशो गुरुणा कार्य इति भावेनाह– एष इत्यादिना । वस्तुतो भगवते दानं हिततम-मेव । अत एवाहुर्विजयध्वजतीर्थाः ‘शिक्षयन्’ इति । अथवा स्वस्य दैत्यगुरुत्वात् दैत्यानामनये प्राप्ते तन्निवारणीयमिति भावेनाह । अत एव ‘दैत्यानामुपगतः अनयः’ इत्याद्युक्तिः ।।

**क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः ।**
**खं च कायेन महता तार्तीयस्य कुतो गतिः ।। ३४ ।।**

‘क्रमतो गां पदैकेन’ इत्यादिना शुक्राचार्ये महाज्ञानीति गम्यते । अत एव तस्य कविरिति नाम ।।

**बलेर्भक्त्यतिशयवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे अष्टादशोऽध्यायः**

## अथ एकोनविंशोऽध्यायः

**स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम् ।**
**प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ।। ३ ।।**

प्राल्हादिरिति हेतुगर्भविशेषणम् । प्रल्हादवंशोद्भवत्वात् कथं प्रत्याचक्षे इति ।।

**सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः ।**
**न तथा तीर्थ आयाते श्रया ये धनत्यजः ।। ९ ।।**

अनिवृत्ताः तनुत्यजाः सुलभाः । धनत्यजा न । तदुक्तं 'शतेषु जायते शूरः सहस्रेषु च पण्डितः । वक्ता दशसहस्रेषु दाता भवति वा नवा' इति ।।

**एष वा उत्तमश्लोको न जिहासति यद् यशः ।**
**हत्वा मैनां हरेद् युे शयीत निहतो मया ।। १३ ।।**

'शयीत निहतो मया' इति असुरावेशेणाह । तदुक्तं भगवत्पादैः' बलिरप्यसुरावेशात् स्तुवन्नपि जनार्दनम् । आक्षिपत्यन्तरा क्वापि प्रल्हादो नित्यभक्तिमान्' इति ।।

**यजमानः स्वयं तस्य श्रीमत्पादयुगं तदा ।**
**अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ।। १८ ।।**

'अवनिज्यावहन् मूर्ध्नि' इत्यत्र केचिदाहुः । बलिना पादावनेजनसमये शुक्रः कमण्डलुद्वारे सूक्ष्मरूपेणाविष्टो द्वारं बबन्ध । तदा वामनो दर्भेण कश्मलनिरहरणव्याजेन शुक्रस्यैकं नेत्रं विद्धवानिति । अत्र मूलं मृग्यम् । नचैतदप्रामाणिकमेव भवितुमर्हति । शुक्रस्य एकाक्षत्वस्य प्रसिद्धत्वात् । दासार्यैरप्युक्तम् 'शुक्र ओक्कण्ण' इति ।।

**काये बलिस्तस्य महाविभूतेः**
**सहर्त्विगाचार्यसदस्य एतत् ।**
**ददर्श विश्वं त्रिगुणं गुणात्मके**
**भूतेन्द्रियार्थाशयजीवयुक्तम् ।। २२ ।।**

'सहस्त्विगाचार्यसदस्य एतत् विश्वं ददर्श' इत्यत्र विश्वरूपदर्शनं यथायोग्यमिति मन्तव्यम् । यथोक्तं विश्वरूपाध्याये भगवत्पादैः ' त्रिलोकेषु स्थितैर्भक्तैरर्जुनाय प्रदर्शितम् । दृष्टं विष्णोर्विश्वरूपं स्वयोग्यत्वानुसारतः ।।' इति ।।

**इन्द्रप्रधानानमरान् भुजेषु**
**तत्कर्णयोः ककुभो द्यौश्च मूर्धनि ।**
**केशेषु मेघान् श्वसनं नासिकाया-**
**मक्ष्णोश्च सूर्यं वदने च वह्निम् ।। २६ ।।**

'इन्द्रप्रधानानमरान् भुजेषु' इत्यत्र 'मुखादिन्द्रश्चाग्निश्च' इत्यनेन विरोधो न शङ्कनीयः । रूपभेदेनोभयत्र स्थितेः । तदुक्तमाचार्यैः द्वितीयस्कन्धतात्पर्ये 'बह्वङ्गत्वं बहुत्वतः' इति ।।

**त्रिविक्रमावतारवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे एकोनविंशोऽध्यायः**

## अथ विंशोऽध्यायः

**नन्दः सुनन्दोऽथ जयो विजयः प्रबलो बलः ।**
**कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रराट् ।। १५ ।।**

**जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ।**
**सर्वे नागायुतप्राणाः स्वां स्वां ते जघ्नुरासुरीम् ।। १६ ।।**

अत्र नन्दादयो अष्टद्वारपालकाः जयन्तादयश्चत्वारः, विष्वक्सेनो गरुडश्चोक्ताः । तत्र नन्दादयो द्वौ द्वौ चतुर्दिक्षु जयन्तादय एकैकश्चतुर्दिक्षु पार्षदराट् विष्वक्सेनः सर्वेषामधिपतिर्गरुड इति विवेकः । 'स्वां स्वां जघ्नुः'

इत्यस्य स्वस्वदिक्षु आयातान् असुरान् जघ्नुरित्यर्थः ।।

**एतान् वयं विजेष्यामो यदि दैवं प्रसीदति ।**
**तस्मात् कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते ।। २३ ।।**

'एतान् वयं विजेष्यामो यदि दैवं प्रसीदति' इति वचनं 'रवेर्दक्षिणोत्तरोदयास्तमानकाले दैत्यानां जयः' इति ब्रह्मणो वचनं श्रुतवतो बलेः कदाचिदेतत् भविष्यतीति मिथ्याज्ञानेन प्रवृत्तम् ।। वस्तुतस्तु तादृशोदयास्तमानौ नैव भवत इति न कदाचिदपि जयो भवति । व्यक्तमेतच्छान्दोग्यभाष्ये ।।

**ब्रह्मकृतत्रिविक्रमपूजनेन त्रिविक्रमपार्षदजयेन त्रिविक्रमकृतभक्तपरीक्षणेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे विंशोऽध्यायः**

## अथ एकविंशोऽध्यायः

**त्वं नूनमसुराणां नः पारोक्ष्यं परमो गुरुः ।**
**यो नोऽनेकमदान्धानां तभ्द्रंशं चक्षुरादिशः ।।५ ।।**

'पारोक्ष्यं परमो गुरुः' इत्यत्र स एव गुरुर्यः अज्ञाननाशनेन ज्ञानप्रदः । प्रकृते अज्ञानजनकमदभ्रंशनाशेन अज्ञानं नाशयित्वा ज्ञानोदयस्यानुकूल्यकरणेन गुरुत्वम् । पारोक्ष्यं च साक्षादुपदेशाभावात् । परमत्वं च तादृशस्यान्यस्याभावादिति ज्ञेयम् ।।

**अथाहमप्यात्मरिपोस्तवान्तिकं**
**दैवेन नीतः प्रसभं त्याजितश्रीः ।**
**इदं कृतान्तान्तिकवर्ति जीवितं**
**ययाऽध्रुवं स्तब्धमतिर्न बुध्यते ।।११ ।।**

'अथाहमपि' इत्यत्र प्रल्हादस्तु स्वयमेव त्वां प्राप्तवान् । अहं तु प्रसभं त्याजितश्रीस्त्वामाप्तवान् इति वैलक्षण्यमाह ।।

**विन्ध्यावलिरुवाच-**

**क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते**
**स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युः ।**
**कर्तुः प्रभोस्तव किमस्य त आवहन्ति**
**त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ।। १९ ।।**

'क्रीडार्थमात्मन इदमिति विन्ध्यावलिवचनस्यायं भावः । स्वानधीनं राज्यं स्वाधीनं मत्वा तुभ्यं दानं करोमीत्युक्तवान् किल मम पतिः । तदपहरणेनापि न जागरूकः सन् स्वानधीनं शिरः स्वाधीनं मत्वा तद्दानं करोमीति पुनर्भणति । तत् त्वया क्षन्तव्यमिति इति सम्प्रदायविदः ।।

**गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ।**
**छलैरुक्तो मया धर्मो नायं त्यजति सत्पथम् ।। ६३ ।।**

'छलैरुक्त' इत्यत्र 'पदानि त्रीणि दैत्येन्द्र सम्मितानि पदा मम' इत्युक्तिकाले कोमलाल्पपादपरिमाणपादस्यैव दर्शनात् तत्पादसम्मितानि त्रीणि पदानि इत्यर्थो भवति । वस्तुतस्तु तत्पादात्यन्ताभिन्नत्रिविक्रमपादैराक्रमणमिति छलोक्तिरिति ज्ञेयम् ।। एतदपि स्थूलदृष्ट्या । वस्तुतस्तु पादभेदाभावान्नैव छलः ।।

**ब्रह्मभगवदादिसंवादात् भगवत्कृतप्रसादविशेषवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे एकविंशोऽध्यायः**

# अथ द्वाविंशोऽध्यायः

**प्रह्लाद उवाच-**

**नेमं विरिञ्चो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते ।**
**यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवन्द्यैरभिवन्दिताङ्घ्रिः ।। ६ ।।**

'नेमं विरिञ्चो लभते' इत्यत्र एतत्कालविशेषे इत्युपस्कर्तव्यम् । बले-स्तात्कालिकोपचेयत्वात् । यथा प्रल्हादे कालविशेषे विशेषानुग्रहस्तद्वदिति ।।

**श्री भगवानुवाच-**
**ब्रह्मन् सन्तनु शिष्यस्य कर्मच्छिद्रं वितन्वतः ।**
**यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् ।। १४ ।।**

'ब्रह्मन् सन्तनु शिष्यस्य कर्मच्छिद्रं वितन्वतः' इत्यत्रेदं ज्ञातव्यम् । शताश्वमेधयाजिन इन्द्रपदवी इति भगवदनुशासनम् । अद्यैव शततमाश्वमेधस्य समाप्तावद्यैवेन्द्रपदवी स्यात् । सा मा भूदिति भगवता विघ्न आचरितः । शततमस्य पूर्त्यभावे नेन्द्रपदवी स्यादिति गुरुद्वारा पूर्तिरपि सम्पादितेति ।।

**भगवत्कृतप्रसादविशेषस्य वर्णनाद् उपेन्द्रपट्टाभिषेकवर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टमस्कन्धे द्वाविंशोऽध्यायः**

# अथ त्रयोविंशोऽध्यायः

**कालेनागतनिद्रस्य धातुः शिशयिषोर्बली ।**
**मुखतो निःसृतान् वेदान् हयग्रीवोऽन्तिकेऽहरत् ।। ८ ।।**
**ज्ञात्वा तद् दानवेन्द्रस्य हयग्रीवस्य चेष्टितम् ।**

**दधार शफरीरूपं भगवान् हरिरीश्वरः ।। ९ ।।**

**तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् ।**
**नारायणपरोऽतप्यत् तपस्तत्सलिलाशये ।। १० ।।**

हयग्रीवासुरसंहरणाय मत्स्यरूपधारणं वर्णयित्वा अनन्तरं सत्यव्रताञ्जलौ शफरीप्राप्तिर्वर्ण्यते । अत्रायं विवेकः । हयग्रीवसंहार आदिसृष्टौ । सत्यव्रतानुग्रहश्चाक्षुषमन्वन्तप्रलयकाले । वराहावतारद्वयमिव मत्स्यावतारद्वयमपि दुष्टानां मोहनार्थाय सङ्कलय्य वर्णितं नतु विवेचितमिति ।।

**मत्स्यावतारवर्णनेन भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते अष्टमस्कन्धे त्रयोविंशोऽध्यायः ।।**

**।। इति श्रीअष्टमस्कन्धगतप्रमेयसङ्ग्रहः ।।**

# नवमस्कन्धः

## अथ प्रथमोध्यायः

**आस्कन्धसमाप्ति भगवद्भक्तानां पुण्यश्लोकानां कीर्तनेन भगवन्निष्ठत्वं बोध्यम् । विशेषं तु तत्र तत्र प्रदर्शयिष्यामः ।।**

**परावरेषां भूतानामात्मा यः पुरुषः परः ।**
**स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन ।। ८ ।।**

'स एवासीदिदं विश्वम्' इत्यत्र इदमग्रे स एवासीदित्यर्थः । असदेवेदमग्र आसीदिति श्रुतेः । अथवा तदधीनमेवासीदित्यर्थः । अथवा तस्मिन्नेव लीनमासीदिति ।। 'सप्तसु प्रथमा' इति सूत्रात् ।'यस्मिंश्च प्रलीयन्ते' इति हि श्रुतिः । एवञ्च सूर्यचन्द्रवंशप्रस्ताव एव हरिसर्वोत्तमता स्पष्टीकृता ।।

**तस्य नाभेः समभवत्पद्मकोषो हिरण्मयः ।**
**तस्मिन् जज्ञे महाराज स्वयम्भूश्चतुराननः ।। ९।।**

स्वयम्भूरित्यत्र स्वयमिति स्वतन्त्रवाच्यव्ययम् । स्वयं स्वतन्त्रत्वात् विष्णोर्भवतीति स्वयम्भूः ।।

**यूयं ब्रह्मविदो युक्तास्तपसा दग्धकिल्बिषाः ।**
**कुतः सङ्कल्पवैषम्यमनृतं विबुधेष्विव ।। १८।।**

'कुतः सङ्कल्प' इत्यत्र सङ्कल्पवैषम्यं कुत इति नार्थः । तेषां भगवत्सङ्कल्पानुसारित्वेन सङ्कल्पवैषम्याभावात् । किन्तु सङ्कल्पवैषम्यं कुतः। कुतश्चन न सम्भाव्यते । यथा विबुधेष्वनृतमसम्भावितमिति ।।

**भगवदनुगृहीतेन वसिष्ठेनेलायाः पुंस्त्वत्वसाधनस्य वर्णनात् भगवन्निष्ठत्वम् ।।**

## अथ द्वितीयोऽध्यायः

**एवमेव भक्ताग्रेसरस्य शिवेन मासं मासं पुंस्त्वस्त्रीत्ववरदानस्य वर्णनेन भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते नवमस्कन्धे द्वितीयोध्यायः ।।**

## अथ तृतीयोऽध्यायः

**तं शशाप कुलाचार्यः कृतागसमकामतः।**
**न क्षत्रबन्धुः शूद्रस्त्वं कर्मणा भवितोऽमुना ।। ९।।**

'न क्षत्रबन्धुः शूद्रस्त्वम्' इत्यत्रेदं बोध्यम् । गोहननं चण्डालत्वापादकम् । तथाप्यकामतः कृतत्वात् शूद्रत्वमिति । अथवा शुचा द्रवणत्वमेव शूद्रत्वम् । वस्तुतश्चण्डालत्वमिति गुरुपादाः ।।

**पृषध्रस्य ब्रह्मप्राप्तेर्वर्णनात् भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते नवमस्कन्धे तृतीयोध्यायः ।।**

## अथ चतुर्थोऽध्यायः

**दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ ।**
**ऋषिमामन्त्र्य ययतुर्विमानेन त्रिविष्टपम् ।।१७।।**

'पातिव्रत्येन तोषितौ' इत्यत्र सरूपान् सूर्यवर्चसस्त्रीन् दृष्ट्वापि पतिमेव वव्रे इति सुकन्यायाः पातिव्रत्यं बोध्यम् ।।

**ब्रह्मनिष्ठस्य च्यवनस्य माहात्म्यवर्णनात् शुक्लकेशाविष्ठबलरामस्य रेवतीप्राप्तिवर्णनाच्च भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते नवमस्कन्धे चतुर्थोऽध्यायः।।**

नाभागचरितवर्णनमिषेण सत्याख्यभागवतधर्मकथनात् भगवन्निष्ठत्वम् ।।

**।। इति श्रीमद्भागवते नवमस्कन्धे पञ्चमोऽध्यायः ।।**

## अथ षष्ठोऽध्यायः

**स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने ।**
**करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये।।**

'स वै मनः' इत्यादिना ब्रह्मचर्याख्यभागवतधर्मः प्रादर्शि । सर्वात्मभावम्' इत्यनेनात्मनिवेदनम् ।।

**व्रतान्ते कार्तिके मासि त्रिरात्रं समुपोषितः ।**
**स्नातः कदाचित्कालिन्द्यां हरिं मधुवनेऽर्चयत् ।। १८।।**

'त्रिरात्रं समुपोषितः' इत्यत्र त्रिरात्रमिति एकादश्या उपलक्षणम् । तस्या त्रिरात्रसाध्यव्रतत्वात् । अन्यथा दशम्यामप्युपोषणस्यानिष्ठस्य प्राप्तेः ।।

**अम्भसा केवलेनाथ करिष्ये व्रतपारणम् ।**
**आहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तत् ।।**

**इत्यपः प्राश्य राजर्षिश्चिन्तयन्मनसाच्युतम्।**
**प्रत्याख्यातो विरिञ्चेन विष्णुचक्रोपतापितः।।**

'अम्भसा' 'इत्यपः प्राश्य' इत्यत्र 'अम्भसा' इति मन्त्रेणापः प्राश्येत्यर्थः ।।

**प्रत्याख्यातो विरिञ्चेन विष्णुचक्रोपतापितः।**
**दुर्वासाः शरणं यातः शर्वं कैलासवासिनम् ।।**

'यातः शर्वम्' इत्यत्रेदं बोध्यम् । यद्यपि ब्रह्मणः 'अहं भवः' इत्यादिना

भवस्यापि चक्रनिवर्तनासामर्थ्यं प्रकटितम् । तथापि शैवा ब्रह्मणोपि विष्णोरपि शिवो वर इति मन्यन्ते । तन्मतमपाकर्तुं दुर्वासाः शिवं जगामेति ।।

**नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ।**
**श्रियं चात्यन्तिकीं ब्रह्मन् येषां गतिरहं परा ।।**

नाहमात्मानमाशासे श्रियं चेति भक्तस्तुत्यर्थम् ।।

**त्वमग्निर्भगवान्सूर्यस्त्वं सोमो ज्योतिषां पतिः।**
**त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाणि च।। ६२ ।।**

'त्वमग्निः' इत्यद्यन्तर्याम्यपेक्षया । 'अहं मनुरभवं सूर्यश्च' इत्यदिवत् ।।

**एवं विधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ।**
**क्रियाकलापैः समुवाह भक्तिं यया विरिञ्चादिमधश्चकार ।।८४ ।।**

'यया विरिञ्चादि' इत्यत्र विरिञ्चकारणकं मानुषप्रपञ्चमित्यर्थः ।।

**विष्णुचक्रमहिमाप्रतिपादनेन विष्णुभक्ताम्बरीषचरित्रवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे षष्ठोऽध्यायः**

**विष्ण्वाविष्टपुरञ्जयस्य धुन्धुमारस्य च चरित्रयोर्वर्णनात् भगवत्प्रसादेन युवनाश्वभूपतावेव मान्धातृजननस्य वर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे सप्तमोऽध्यायः**

## अथ अष्टमोऽध्यायः

त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु।
**भ्रमन्ति कामलोभेर्ष्यामोहविभ्रान्तचेतसः।। २६।।**

वस्तुबुध्या स्वतन्त्रबुध्या । वस्तु स्वतन्त्रमुद्दिष्टमित्यभिधानात् ।।

**श्रीभगीरथ उवाच**

**साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोकपावनाः।**
**हरन्त्यघं तेऽङ्गसङ्गात् य प्राप्ताः स्वहृदा हरिम्।। ३७ ।।**

'ये प्राप्ताः स्वहृदा' इत्यत्र 'तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता' इति प्रथमस्कन्धोक्तमनुसन्धेयम् ।। 'तीर्थकं विष्णुतीर्थश्च विष्णुतीर्थश्च तीर्थकम्' इति सुमध्वविजये ।।

**तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः।**
**कथं वधं यथा बभ्रोर्मन्यते सन्मतो भवान् ।। ६३ ।।**

'भ्रूणस्य ब्रह्मवादिनः' इत्यत्र भ्रूणस्य चतुर्वेदज्ञस्य ।।

**अश्मकाद्बालिको जज्ञे यः स्त्रीभिः परिरक्षितः ।।**

**नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत्।।**

'यः स्त्रीभिः परिरक्षितः' इत्यत्र परशुरामो क्षत्रियहननार्थमागते अन्तःपुरस्त्रियो विवस्त्रा भूत्वा मध्ये कुमारं मूलकं स्थापयित्वोपविष्ठाः । परशुरामस्ततो निवृत्त इति विष्णुपुराणगकथा अनुसन्धेया ।।

एतेन शत्रावागतो मूलको नारीणां पृष्ठतः स्थितः तदा शत्रुर्न्यवर्ततेति केनचित् प्रलपितमसाधु ।।

**यो देवैरर्थितो दैत्यानवधीद्युधि दुर्जयः।**
**मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं सन्दधे मनः।। ७५।।**

'मुहूर्तमायुर्ज्ञात्वा' इत्यादिना 'मुहूर्तमपि यो ध्यायेन्नारायणमतन्द्रितः ।

सोपि सिद्धिमवाप्नोति किं पुनस्तत्परायणः' इत्येतन्निदर्शितम् ।।

**गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः**
**पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरीन्द्रानुजाभ्याम्।**
**वैरूप्याच्छूर्पणख्याः प्रियविरहरुषारोपितभ्रूविजृम्भः**
**त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवतान्नः।।८६ ।।**

गुर्वर्थे पित्रर्थे । वस्तुतो रक्षोवधाख्यमहाप्रयोजनार्थी ।।

**भ्रात्रा वने कृपणवत्प्रियया वियुक्तः**
**स्त्रीसङ्गिनां गतिमिति प्रथयंश्चचार।**
**दग्ध्वात्मकृत्यहतकृत्यमहन्कबन्धं**
**सख्यं विधाय कपिभिर्दयितागतिं तैः ।। ९३ ।।**

'प्रियया वियुक्तः' इत्यत्र वियुक्तः अयुक्तः । विप्रिय इतिवत् ।अथवा अवियुक्त इत्येव पदच्छेदः । द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः इति वचनात् संयुक्त इत्यर्थः । अत एव 'कृपणवत्' इत्युवाच । स्त्रीसङ्गेनेदृशं दुःखं भवति, तद्वियोगे इति दर्शयामास । ये रामः सीतावियुक्त इति मंस्यन्ते त एवं रुदन्तीति दर्शयामासेति गुरुपादाः ।।

**एवं क्षिपन्धनुषि सन्धितमुत्ससर्ज**
**बाणं स वज्रमिव तद्धृदयं बिभेद ।।**
**सोऽसृग्वमन् दशमुखैर्न्यपतद्विमानाद्**
**हाहेति जल्पति जने सुकृतीव रिक्तः ।।१०५ ।।**

'न्यपतद्विमानात्' इत्यत्र यद्यपि रामशरः अमोघः । तथापि पुष्पकस्थो न म्रियत इतीश्वरक्लृप्तेर्विमानात् पतित्वा ममारेति बोध्यम् ।।

**स्वानां विभीषणश्चक्रे कोसलेन्द्रानुमोदितः ।**
**पितृमेधविधानेन यदुक्तं साम्परायिकम् ।।१११।।**

'स्वानां विभीषणः--साम्परायिकम्' इत्यत्र रावणकुम्भकर्णयोर्द्वारपालकत्वात् कोसलेन्द्रानुमोदनमिति ज्ञेयम् । यथा हिरण्यकशिपोः साम्परायिके प्रल्हादस्यानुज्ञा दत्ता नारसिंहवपुषैवम् ।।

**भगवत्पादरजःपूतगङ्गामहिमावर्णनेन पवित्ररामचरित्रवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे अष्टमोऽध्यायः**

## अथ नवमोऽध्यायः

**सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः ।**
**गन्धर्वान्कोटिशो जघ्ने भरतो विजये दिशाम् ।।**

'गन्धर्वान् राक्षसगन्धर्वान्। देवमनुष्यगन्धर्ववत् राक्षसगन्धर्वा अपि सन्ति । निर्णयाचार्यैस्तथोक्तेरिति ।।

**शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ।**
**हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ।।१३।।**

लवणं हत्वा रामदत्तशरविशेषेणेति शेषः ।।

**तत ऊर्ध्वं ब्रह्मचर्यं धार्यन्नजुहोत्प्रभुः ।**
**त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम्।। १४।।**

'तत ऊर्ध्वं त्रयोदशाब्दसाहस्रम्' इत्यत्र सीतातिरोधानानन्तरं त्रयोदशसाहस्रवर्षमिति नार्थः । किन्तु अवतारकालमारभ्य तावत्काल-समाप्तिपर्यन्तमित्यर्थः ।। तथाहि अवतारानन्तर-एकादशसहस्रवर्षेषु गतेषु

सीताया यज्ञवाटे अदर्शनम् । ततः परं सप्तशतसमा भूलोके रामराज्यभारः । मिलित्वा सप्तशतोत्तरैकादशसहस्रवर्षाणि रामावतारकालपरिमाणम् । एतत् नक्षत्रमासगणितं त्रयोदशसहस्रवर्षाणि भवन्ति इति ज्ञेयम् ।।

**बुभुजे च यथाकालं कामं धर्ममपीडयन्।**
**वर्षपूगान्बहून्नृणामभिध्याताङ्घ्रिपल्लवः।। ३६।।**

कामं धर्ममपीडयन् इत्यत्र यद्यपि मुक्तेशस्य नित्ययुक्तस्य धर्मकामसम्बन्धो नास्ति । तथापि धर्ममपीडयित्वा कामचरणं सतां शिक्षंस्तथा चचारेत्यर्थः ।।

**इति श्रीमद्भागवते नवमस्कन्धे नवमोऽध्यायः**

**श्रीरामसन्ततिवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे दशमोऽध्यायः**

**योगेश्वरप्रसादपात्रभूतनिमिवंशवर्णनेन भगवत्प्रियसीताया जन्मनो वर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे एकादशोऽध्यायः**

**यस्मिन् कुले भगवान् श्रीकृष्णो जातस्तत्सोमकुलवर्णनेन पुरूरवः-कथामिषेण वैराग्याख्यभागवतधर्मबोधनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे द्वादशोऽध्यायः**

**परमपावनपरशुरामचरितवर्णनात् जमदग्निवचनमिषेण क्षमाख्य-भागवतधर्मबोधनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे त्रयोदशोऽध्यायः**

**तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहाम् ।**
**हेतुं कृत्वा पितृवधं क्षत्रेऽमङ्गलकारिणि ।।१८।।**

'क्षत्रे अमङ्गलकारणि' इत्यत्रेदं बोध्यम् । परशुरामः स्वपितरि हते सर्वक्षत्रियसंहारशपथं चक्रे । ब्राह्मणैः प्रार्थितः सन् मध्ये हननादुपरराम । रामो हतप्रतिज्ञ इति दृप्तक्षत्रियैरपहासे कृते पुनः निःक्षत्रियां महीं चकारेति ।।

**परशुरामचरितशेषवर्णनेन धन्वन्तरिजन्मवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे चतुर्दशोऽध्यायः**

**पुण्यश्लोकस्य ययातेश्चरितस्य वर्णनाद्भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे पञ्चदशोऽध्यायः**

**कामगीतया वैराग्याख्यभगवद्धर्मवर्णनेन भगवन्निष्ठत्वम् ।।**

**ओमित्युक्ते यथाधर्ममुपयेमे शकुन्तलाम् ।**
**गान्धर्वविधिना राजा देशकालविधानवित् ।।**

ओमित्युक्ते इत्यत्र ओमित्यस्य अङ्गीकारवचनमित्यर्थः । नहि शकुन्तला प्रणवोच्चरणं कृतवती ।।

**यस्य दक्षिणकरे चक्ररेखा पादयोः पद्मरेखा च तस्य भगवदाविष्ठस्य भरतस्य चरित्रवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते नवमस्कन्धे सप्तदशोऽध्यायः**

**भगवन्महिमोपचितरन्तिदेवकथावर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते नवमस्कन्धे अष्टादशोऽध्यायः**

**परमपवित्रपाण्डवसन्ततिवर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते नवमस्कन्धे एकोनविंशोऽध्यायः**

**यस्मिन् कुले भगवान् श्रीकृष्णः प्रादुर्भूतस्तद्धर्मशीलयदुकुलवर्णनेन भगवन्निष्ठत्वम् ।।**

# अथ एकविंशोऽध्यायः

**सुभद्रा च महाभागा तव राजन्पितामही ।।१६।।**

'सुभद्रा च महाभागा' इत्यत्र सुभद्रा देवकीपुत्री रोहिण्यापालितेति ज्ञेयम् । अतः क्वचित् रोहिणीपुत्रीत्वकथनमविरुद्धम् ।।

**जातो गतः पितृगृहाद्व्रजमेधितार्थो**
**हत्वा रिपून्सुतशतानि कृतोरुदारः ।**
**उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे**
**आत्मानमात्मनिगमं प्रथयन्जनेषु ।।**

'सुतशतानि' इत्यत्र शतशब्दो बहुवाची । तेन गोपकन्यासु जाता दशलक्षपुत्रा नारायणसंज्ञाः अष्टोत्तरशताधिकषोडशसहस्रपत्नीषु जाता अशीत्यधिकैकषष्टिसहस्राधिकलक्षपुत्रा अपि सङ्गृहीताः । सुतेत्युपलक्षणम् । एकैकत्वेन पत्नीषु जाता पुत्र्योऽपि ग्राह्याः । हरिवंशे कासुचित् पत्नीषु अनेकपुत्र्युत्पादनकथनं कल्पान्तरविषयमिति भाति ।।

**पृथ्व्याः स वै गुरुभरं क्षपयन्कुरूणाम्**
**अन्तःसमुत्थकलिना युधि भूपबन्धम् ।**
**दृष्ट्या विधूय विजये जयमुद्विघोष्य**
**प्रोच्योद्धवाय च परं समगात्स्वधाम ।। ६७ ।।**

'भूपबन्धं दृष्ट्या विधूय' इत्यनेन परसैनिकायुरक्ष्णा हृतवानिति भीष्मस्तुतिगतं प्रमेयं स्मारितम् ।।

**यदुवंशावतीर्णश्रीकृष्णभगवतश्चरितससङ्ग्रहणेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते नवमस्कन्धे एकविंशोऽध्यायः**

**।। इति नवमस्कन्धः समाप्तः ।।**

# दशमस्कन्धः

## प्रथमोध्यायः

**आस्कन्धसमाप्ति श्रीकृष्णचरित्रवर्णनेन स्फुटं भगवन्निष्ठत्वम् ।। तत्र तत्र तत्तद्विशेषं दर्शयिष्यामः ।।**

**यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ।**
**तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ।। २ ।।**

'यदोश्च धर्मशीलस्य' इत्यत्र धर्मशीलस्येति हेतुगर्भविशेषणम् । धर्मशीलत्वादेव तद्वंशे भगवानवतीर्ण इति भावः । कथं तस्य धर्मशीलत्वं, पित्राज्ञोल्लङ्घनादित्याशङ्क्य कैश्चित् यदुक्तं 'मम यौवनेन मम पितरि मम मात्रा संयुक्ते मम मातृगमनदोषः स्यादिति विचिन्तयन् यदुः यौवनं न ददौ । अतोस्य धर्मशीलत्व' मिति तन्न बुध्यामहे । एवं सति तादृशदोषो व्यक्रामिष्यत् पूरुम् । भवत्विति चेत् तर्ह्यधर्मिणस्तस्य वंशे कथं महाधर्मिष्टस्य भीमस्य जननम् । कथं च नहि पौरवाणां मतिरधर्मे रमत इति दुष्यन्तवचनं सङ्गच्छेत । अतो धर्मशीलेनापि यदुना कर्मविशेषप्रतिबद्धेन पित्राज्ञोल्लङ्घनमिति सन्तोष्टव्यम् । यथा धर्मराजस्यापि देवनादौ क्वचिदधर्मबुद्धिः ।।

**निवृत्ततर्षैरुपगीयमानात् भवौषधात् श्रोत्रमनोभिरामात् ।**
**क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विनातिमुग्धात्।।५।।**

'विना पशुघ्नात्' इति पाठे पातीति पः । सुखरूपत्वात् शुः । पश्चासौ शुश्च । तं हन्तीति ईश्वराभावं वदन् नास्तिकः पशुघ्नः ।अथवा आत्महननाख्यमिथ्याज्ञानवान् अद्वैत्यादिः पशुघ्नः ।।

**द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानाम् ।**
**जुगोप कुक्षिङ्गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ।। ६ ।।**

'सन्तानबीजं कुरुपाण्डवानाम्' इत्यत्र पाण्डवानां सन्तानबीजं कुरु इति शरणं गतायाः मातुः इति साम्प्रदायिकानामन्वयान्तरः ।।

**रोहिण्यास्तनयः प्रोक्तो रामः सङ्कर्षणस्त्वया ।**
**देवक्या गर्भसम्बन्धः कुतो देहान्तरं विना ।। ८ ।।**

'कुतो देहान्तरं विना' इत्यत्र देहान्तरं विना स्त्रीद्वयगर्भसम्बन्धः कथमिति प्रश्नाशयः ।।

**कृष्णावतारविषयकप्रश्नोत्तरत्वात् कृष्णजन्मस्थानदेवकीवसुदेवविवाहवर्णनाच्च भगवन्निष्ठत्वं बोध्यम् ।।**

**।। इति श्रीमद्भागवते दशमस्कन्धे प्रथमोध्यायः ।।**

**कीर्तिमन्तं प्रथमजं कंसायानकदुन्दुभिः ।**
**अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ।। ३ ।।**

'कीर्तिमन्तं प्रथमजम्' इत्यत्र जन्मनाम्ना कीर्तिमन्तमिति विजयध्वजीये । तत्र नाम योकरोदिति माशङ्कि । जातकर्मणि करिष्यमाणनाम्नः स्मरणं विहितमिति तत्काले वसुदेवेन स्मृतं नामेति परिहारसम्भवात् ।।

**नारदकृतदेवकार्यवर्णनेन श्रीकृष्णावतारपीठिकारचनेन च भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते दशमस्कन्धे द्वितीयोध्यायः ।।**

**सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते ।**
**गर्भो बभूव देवक्या हर्षशोकविवर्धनः ।। ५ ।।**

'देवक्या हर्षशोकविवर्धनः' इत्यत्र विष्ण्वाविष्टशेषस्य गर्भगतत्वात् हर्षः । पूर्वहतशिशुस्मरणेन कंसः किं वा करोतीति शोकः ।।

**दुर्गेति भद्रकालीति विजया वैष्णवीति च ।**
**कुमुदा चण्डिका कृष्णा माधवी कन्यकेति च ।। १२ ।।**

दुर्गेति ।। विजयध्वजीये 'दुर्ज्ञेयत्वात्' इति यः श्लोक उदाहृतो दुर्गाशब्दनिर्वचनामकः स एव तीर्थप्रबन्धे उद्धृत इति ज्ञेयम् ।।

**किमद्य तस्मिन् घटनीयमाशु मे यथार्थतन्त्रो न विहन्ति विक्रमम् ।**
**स्त्रियः स्वसुर्गुरुमत्या वधोऽयं यशः श्रियं हन्त्यनुकूलमायुः ।। २२ ।।**

'स्त्रियः स्वसुर्गुरुमत्या' इत्यत्र स्त्रीवध एव जुगुप्सितः । तत्रापिः स्वसुः । तत्रापि गर्भिण्या इति भावः ।।

**शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्**
**नामानि रूपाणि च मङ्गलानि ते ।**
**क्रियासु यस्त्वच्चरणारविन्दयो-**
**राविष्टचित्तो न भवाय कल्प्यते ।। ३८ ।।**

'शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्' इत्यत्र णिजन्ताणिजन्तयोः समावेशनात् शृण्वन् श्रावयन् गृणन् गार्णयन् संस्मरन् संस्मारयन् चिन्तयन् अन्यांश्च चिन्तयन् इति व्याख्येयम् ।।

**मत्स्याश्वकच्छपनृसिंहवराहहंस-**
**राजन्यविप्रविबुधेषु कृतावतारः ।**
**त्वं पासि नस्त्रिभुवनं च तथाऽधुनेश**
**भारं भुवो हर यदूत्तम वन्दनं ते ।।४१।।**

पासीति ।। अपा इति वक्तव्ये पासीति लट्प्रयोगः रक्षणस्य सार्वकीलीनत्वस्य द्योतनार्थम् । क्रियासातत्ये लट् ।।

गर्भस्तुतिवर्णनात् भगवन्निष्ठत्वम् ॥

**॥ इति श्रीमद्भागवते दशमस्कन्धे तृतीयोध्यायः ॥**

**तमद्भुतं बालकमम्बुजेक्षणं**
**चतुर्भुजं शङ्खगदाद्युदायुधम् ।**
**श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं**
**पीताम्बरं सान्द्रपयोदसौभगम् ॥ १० ॥**

तमद्भुतमति ॥ बालकं बालः कः ब्रह्मा यस्य तम् । अम्बुजेक्षणम् इत्यनेन निर्भयत्वमाह । चतुर्भुजं चतुर्धा सर्वभोक्तारमिति केचित् । शङ्खगदाद्युदायुधम् इत्यनेन मात्रा दिदासितक्रीडनकसाहित्यं श्रीवत्सलक्ष्ममित्यनेन दिदृक्षितपत्नी-साहित्यं गलशोभिकौस्तुभमित्यनेन दिदृक्षितपौत्रसाहित्यं बीताम्बरमित्यनेन महार्हेत्यादिना च बुभूषयितवस्त्रादिसाहित्यं च द्योतयतीति साम्प्रदायिकाः ॥ अनेन लोकविलक्षणजन्म वर्णितं भवति । विस्तरस्तु रुग्मिणीशविजये ॥

**अयं तमस्यस्तव जन्म मे गृहे**
**श्रुत्वाऽग्रजांस्ते न्यहनत् सुरेश्वर ।**
**स तेऽवतारं पुरुषैः समर्पितं**
**श्रुत्वाऽधुनैवाभिसरत्युदायुधः ॥ २३ ॥**

'न्यहनत्' इत्यत्र हन्तेर्लङि अहन् इति स्यात् ।, लुङि वधादेशे अवधीत् इति स्यात् । अतः ठान्दसः शप् इति ज्ञेयम् ॥ एतदनुसृत्यैवपण्डिताचार्यैः 'दैत्यान् गोवपुषोऽहनत्' इति प्रायोजि ॥

**तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषाऽनघे ।**
**जातो भूयस्तयोरेवं सत्यं मे व्याहृतं सति ॥ ४४ ॥**

तृतीयेऽस्मिन्निति ।। प्रथमं पृश्निगर्भं, द्वितीयं वामनमुक्त्वा तृतीयत्वेन कृष्णस्य कथनात् कौसल्यादशरथवदिति कश्यपादितिवदिति वदन्तो निरस्ताः ।।

**ततश्च शौरिर्भगवत्प्रचोदितः**
**सुतं समादाय स सूतिकागृहात् ।**
**यदा बहिर्गन्तुमियेष तर्ह्यजा**
**या योगमायाऽजनि नन्दजायया ।। ४८ ।।**

**तया हृतप्रत्ययसर्ववृत्तिषु**
**द्वाःस्थेषु पौरेषु च यापितेष्वथ ।**
**द्वारस्तु सर्वाः पिहिता दुरत्ययाः**
**बृहत्कपाटायसकीलशृङ्खलैः ।। ४९ ।।**

'योगमायाऽजनि' इत्युक्त्वा 'तया हृतप्रत्ययसर्ववृत्तिषु' इति कथनेनेदं ज्ञायत् । मूलरूपेणैव मोहयितुं समर्थाऽपि दुर्गा लीलयाऽवतीर्य मोहयामासेति ।। तत्र हेतूत्प्रेक्षणायं नालं वयम् ।।

**मघो निवर्षत्यसकृद् यमानुजा**
**गम्भीरतोयौघजवोर्मिफेनिला ।**
**भयानकावर्तशताकुला नदी**
**मार्गं ददौ सिन्धुरिव श्रियः पतेः ।। ५१ ।।**

'मार्गं ददौ सिन्धुरिव' इत्यत्र वर्धिः जालस्तम्भनेन रामस्य यदा मार्गं ददौ सेतुमार्गेण गन्तुं तथा नदी जलस्थम्भनेन कृष्णवाहस्य वसुदेवस्य कटिदघ्नजले गन्तुं मार्गं ददावित्यर्थः ।।।

**श्रीकृष्णजन्मवर्णनेन नदीस्तम्भनाद्यद्भुतमहिमावर्णनेन च भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते दशमस्कन्धे चतुर्थोऽध्यायः।।**

**तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुताम् ।**
**अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ।। ८ ।।**

'तां गृहीत्वा चरणयोः' इत्यत्र कंसः शिलापृष्ठे पोथयितुं जग्राह । तदाविष्ठो भृगुः स्वकृतपादताडनोत्थपापपरिहाराय जग्राहेति सम्प्रदायविदः ।।

**इति प्रभाष्य तं देवी माया भगवती भुवि ।**
**बहुनामनिकेतेषु बहुनामा बभूव ह ।। १३ ।।**

'बहुनामनिकेतनेषु' इत्यत्र बहुमन्दिरेषु दुर्गेत्याद्यभिधाना बभूव । एकेन रूपेण पुराणान्तरोक्तप्रकारेण विन्ध्यपर्वतं जगाम, अपररूपेण हरिवंशोक्तप्रकारेण देवकीवसुदेवयोरेव दृष्टिगोचरा तच्छयने अशेतेति ज्ञेयम् ।।

**मा शोचेथां महाभागावात्मजान् स्वकृतम्भुजः ।**
**जन्तवो न सदैकत्र दैवाधीनाः सहासते ।। १८ ।।**

'मा शोचेथाम्' इत्यादि तत्वकथनं तदाविष्ठभृगोः कार्यम् ।।

**एवं चेत् तर्हि भोजेन्द्र पुरग्रामव्रजादिषु ।**
**अनिर्दशान् निर्दशांश्च हनिष्यामोऽद्य बालकान् ।। ३१ ।।**

'अनिर्दशान् निर्दशांश्च' इत्यत्र शिशुहननं यथा दैत्यबुद्धिः तथा अतितरुणशाकादिभक्षणमपि दैत्यबुद्धिरिति गुरुपादाः ।।

**किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः ।**
**रहोजुषा किं हरिणा शम्भुना वा वनौकसा ।। ३६ ।।**

'रहोजुषां किं हरिणा' इत्यादिना दैत्यानां मूढत्वं सम्प्रकाशितम् । अत

एव दैतेया नातिकोविदा इत्युक्तम् । कथमन्यथा अतिनिषिद्धशिशुहत्यया स्वश्रेयस्साधनचिन्ता ।।

**मूलं विष्णुर्हि देवानां यत्र धर्मः सनातनः ।**
**तस्य च ब्रह्मगोविप्रास्तपो यज्ञाः सदक्षिणाः ।। ३९ ।।**

'मूलं विष्णुर्हि देवानाम्' इत्यत्र यद्यपि सर्वस्य विष्णुरेव मूलम्, तथापि दैत्या विष्णुर्यज्ञमूल इति भ्रान्ता इत्यवधेयम् ।।

**कृष्णभगिन्या दुर्गाया महिम्नो वर्णनात् भगवदायत्तदेवदैत्यस्वभावस्य वर्णनाच्च भगवन्निष्ठत्वम् ।।**

**।। इति श्रीमद्भागवते दशमस्कन्धे पञ्चमोऽध्यायः ।।**

**गोपाः परस्परं हृष्टा दधिक्षीरघृताम्बुभिः ।**
**आसिञ्चन्तो विलिम्पन्तो नवनीतैश्च चिक्षिपुः ।। १४ ।।**

'नवनीतैश्च चिक्षिपुः' इत्यत्र गोकुले कृष्णजन्मदिन इदानीमपीदृश उत्सवः प्रचलतीति शृणुमः ।।

**नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणाम् ।**
**ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा ।। २५ ।।**

'नैकत्र प्रियसंवासः' इति कृष्णवियोगं स्मरतो वसुदेवस्य वचनम् ।।

**श्रीकृष्णजन्मोत्सववर्णनेन वसुदेववचनमिषेणासङ्गाख्यभागवतधर्मo ार्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे षष्ठोऽध्यायः**

**न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु ।**
**कुर्वन्ति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि ।। ३ ।।**

'न यत्र श्रवणादीनि' इत्यत्र अत एव शिष्टाः शिशुजजनात् दशदिनपर्यन्तं दुर्गास्तवनादि कारयन्तीति बोध्यम् ।।

**तां केशपाशव्यतिषक्तमल्लिकां**
**बृहन्नितम्बस्तनकृच्छ्रमध्यमाम् ।**
**सुवाससं कम्पितकर्णभूषण-**
**त्विषोसत्कुन्तलमण्डिताननाम् ।। ९ ।।**

'तां केशपाश' इत्यादिसौन्दर्यवर्णनेन तत्रोर्वश्यावेशं ध्वनयति ।।

**तां तीक्ष्णचित्तामतिवामचेष्टितां**
**वीक्ष्यान्तराकोशपरिच्छदासिवत् ।**
**वरस्त्रियं तत्प्रभया च धर्षिते**
**निरीक्षमाणे जननी अतिष्ठताम् ।। १० ।।**

'तत्प्रभया च' इति चकारेण दैत्यमायया चेति अनुक्तसमुच्चयः ।।

**यशोदारोहिणीभ्यां ताः समं बालस्य सर्वशः ।**
**रक्षां विदधिरे सम्यग् गोपुच्छभ्रमणादिभिः ।। २० ।।**

'रक्षां विदधिरे' इत्यत्र रक्षाविधानं वात्सल्येन कृष्णमाहात्म्याज्ञानेन च । अत एव 'अकुतोभय'मित्युक्तं पूर्वत्र ।।

इदानीमपि शिष्टाः बालानां भीत्यादौ बालरक्षास्तोत्रेण रक्षां कुर्वन्ति ।।

**अव्यादजोऽङ्घ्रिं मणिमांस्तव जान्वथोरू**
**यज्ञोऽच्युतः कटितटं जठरं हयास्यः ।**
**हृत् केशवस्त्वदुर ईश इनस्तु कण्ठं**
**विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम् ।। २३। ।**

‘अव्यादजोऽङ्घ्रिम् मणिमान्’ इति पाठे मणिमान् कौस्तुभधरः ।।

**भगवत्कृतपूतनामोक्षवर्णनेन भगवन्निष्ठत्वं स्पष्टम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे सप्तमोऽध्यायः**

**श्रीशुक उवाच -**

**कदाचिदौत्थानिककौतुकाप्लवे**
**जन्मर्क्षयोगे समवेतयोषिताम् ।**
**वादित्रगीतद्विजमन्त्रवाचकै-**
**श्चकार सूनोरभिषेचनं सती ।। ६ ।।**

जन्मर्क्षयोगे । चतुर्थे तत्र निष्क्रमणस्य विहितत्वात् । निष्क्रमणं देवालयं नदीतीरं प्रति वा गत्वा स्यात् । अत्र तु यमुनातीरं प्रति ।।

**तमश्मानं मन्यमान आत्मनो गुरुमत्तया ।**
**गले गृहीत उत्स्रष्टुं नाशक्नोदुतार्भकम् ।। २९ ।।**

‘गले गृहीत’ इत्यत्र कृष्णो मारणाय गले गृण्हाति चेन्नैव मुञ्चति । उद्धरणाय पाणौ गृण्हाति चेत् तदापि नैव मुञ्चतीति गुरुपादाः ।। कपिमुष्टिरिति लोके प्रवादः ।। इयं तु कपीन्द्रेशमुष्टिरिति ।।

**किं नस्तपश्चीर्णमधोक्षजार्चनं**
**पूर्तेष्टदत्तं किमु भूतसौहृदम् ।**
**यः सम्परेतः पुनरेव बालको**
**दिष्ट्या स्वबन्धून् प्रणयन्नुपस्थितः ।। ३४ ।।**

किं न स्तपश्चीर्णमित्याद्यप्यज्ञानेन ।।

**खं रोदसी ज्योतिरनीकमाशाः सूर्येन्दुवह्निश्वसनाम्बुधींश्च ।**

**द्वीपान् नगांस्तद्दुहितॄर्वनानि**
**भूतानि यानि स्थिरजङ्गमानि ।। ३८ ।।**

खं रोदसीति ।। आजानजादयः सहस्रादिवर्षकाले क्वचिदेव व्याप्तरूपं पश्यन्तीति भगवत्पादैर्यदुक्तमन्यत्र तस्य निदर्शनमिदम् ।।

**शकट-तृणावर्तसंहारवर्णनेन जगद्दर्शनाख्यमाहात्म्यवर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे अष्टमोऽध्यायः**

**श्रीकृष्णनामकरणवर्णनेन बालकेलीवर्णनेन मृद्भक्षण,विश्व-दर्शनमहिमावर्णनेन धराद्रोणतपोवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे नवमोऽध्यायः**

**सञ्जातकोपः स्फुरितारुणाधरं**
**सन्दश्य दद्भिर्दधिमण्डभाजनम् ।**
**भित्त्वा मृषाश्रुर्दृषदश्मना रहो**
**जघास हैयङ्गवमन्तरं गतः ।। ६ ।।**

'भित्वा मृषाश्रुः' इत्यत्र मृषा व्यर्थम् । यत्र त्रिसर्गो मृषा इत्यत्र मृषा इत्यस्य व्यर्थमित्यर्थमुक्त्वा भगवत्पादैः भित्त्वा मृषाश्रुः इति उदाहृतत्वात् ।।

**उलूखलाङ्घ्रेरुपरि व्यविस्थितं**
**मर्काय कामं ददतं यथेप्सितम् ।**
**हैयङ्गवं चौर्यविशङ्कितेक्षणं**
**निरीक्ष्य पश्चात् सुतमागमच्छनैः ।। ८ ।।**

'मर्काय कामं ददतम्' इत्यत्र मार्जाररूपिणे वायवे इति भाति ।। 'मर्को मनसि वायौ च तोके मार्जारकीरयोरिति यादवः ।।

**नैनं विरिञ्चिर्न भवो न श्रीरप्यङ्गसंश्रया ।**
**प्रसादं लेभिरे गोप्यो यत् तत् प्राप विमुक्तिदात् ।। २० ।।**

'नैनं विरिञ्चिः' इत्यत्र गोपीनां तात्कालिकोपचेयत्वं ज्ञातव्यम् । यथा प्रल्हादे ।।

**यमलार्जुनभङ्गोपोद्घातरूपश्रीकृष्णबाललीलावर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे दशमोऽध्यायः ।**

**नारदशापेन महदवज्ञावर्जनरूपः वाणीगुणानुकथन इत्यादिना षडङ्ग-सेवापरपर्यायब्रह्मचर्यरूपः, नलकूबरमणिग्रीवस्तुत्या कीर्तनरूपः भागवतधर्मो वर्णितः । नलकूबरमणिग्रीवशापमोचनेन भगवद्दया वर्णितेति भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकादशोऽध्यायः**

**कृष्ण कृष्णारविन्दाक्ष तात एहि स्तनं पिब ।**
**अलं विहारैः क्षुत्क्षान्तस्तद् भवान् भोक्तुमर्हति ।। २३ ।।**

'अलं विहारैः' इत्यादि । एतदेव दासार्यैः 'आट साकेले मैयेल्ल धूळो ऊट माडेलो कृष्ण कृपालो' इति कीर्तितम् ।।

वृन्दावनगमनात् पूर्वं वृकोत्पादनमनुसन्धेयम् ।

**विविधबाललीलावर्णनेन वत्सासुरबकासुरसंहारवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे द्वादशोऽध्यायः ।।**

**श्रीभगवानुवाच-**

**अहो अमी देववरामरार्चितं**
**पदाम्बुजं ते सुमनःफलार्हणम् ।**

**नमन्त्युपादाय शिखाभिरात्मन-**
**स्तमोपहत्यै तरुजन्म यत्कृतम् ।। ५ ।।**

‘नमन्त्युपादाय’ इत्यत्रेदं बोध्यम् । स्वशिखाभिर्भूमिं स्पृशतो वक्षान् दृष्ट्वा खलु भगवतैवमुक्तम् । इदानीमपि वृन्दावने ताटकवृक्षा उपलभ्यन्ते । तत्रस्थमार्गदर्शका एवमेव वदन्ति ।।

**क्वचिच्च कलहंसानामनु कूजति कूजितम् ।**
**अभिनृत्यति नृत्यन्तं बर्हिणं हासयन् क्वचित् ।। १० ।।**

‘क्वचिच्च कलहंसानाम्’ इत्यादि। एतदेव दासवर्यैः ‘हंसियन्ते नलिव नविलन्ते कुणिव मरिकोगिलेयन्ते कूगुव’ इति कीर्तितम् ।।

**एवं स भगवान् कृष्णो वृन्दावनचरः क्वचित् ।**
**ययौ राममृते राजन् कालिन्दीं सखिभिर्वृतः ।। ४७ ।।**

‘ययौ राममृते’ इत्यत्र भीतान् गोपालकान् समाधातुं बलं विहाय गतवानिति द्रष्टव्यम् ।।

**विविधलीलावर्णनेन बलाविष्टेन भगवता धेनुकासुरसंहारस्य वर्णनेन विषपानेन मृतानामुज्जीवनस्य वर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे त्रयोदशोऽध्यायः**

**तं नर्तुमुद्यतमवेक्ष्य तदा तदीय-**
**गन्धर्वसिद्धासुरचारणदेववध्वः ।**
**प्रीत्या मृदङ्गपणवानकवाद्यगीत-**
**पुष्पोपहारनुतिभिः सहसोपसेदुः ।। २७ ।।**

‘तं नर्तुमुद्यतम्’ इत्यत्र कृष्णनर्तनकाले ब्रह्मादीनां मृदङ्गादिना सेवाकरणात्

कृष्णस्य सर्वोत्तमत्वं प्रतिपादितं भवतीति श्रीमद्वादिराजश्रीमच्चरणाः । तदेव कनकदासैः ‘बरमप्प डोल् मेले कैयन्नु हाक्यानु शिवप्प ताळव तट्टानु । हनुमप्प ओळ्ळोळ्ळे हाड्गळ हाड्यानु कनकप्प कुणिकुणिदाड्यानु’ इति कीर्तितम् । तत्र कनकप्पशप्देन नात्मसङ्कीर्तनं कृतम् । किन्तु कृष्णस्यैव । तथाहि कनकेति हिरण्यगर्भ उक्तो नामैकदेशग्रहणन्यायेन । तत्पिता कृष्ण एव ।।

**न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ।**
**न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति त्वत्पादरजःप्रपन्नाः।।३७।।**

अपुनर्भवं सामान्यमोक्षम् ।।

**नमः कृष्णाय रामाय वसुदेवसुताय च ।**
**प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ।। ४५ ।।**

‘नमः कृष्णाय’ इत्यत्र भगवतो वासुदेवादिव्यूहचतुष्टयः प्रणतः । कृष्णो वासुदेवः । रामप्रद्युम्नानिरुद्धेषु सङ्कर्षणादित्रयाणामावेश इति प्रसिद्धम् । तेन नागपत्नीनां भविष्यज्ज्ञानमप्यस्तीति सूचितम् । वसुदेवसुताय इत्यनेन भूतज्ञानमपि ।।

**कालियमर्दनवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे चतुर्दशोऽध्यायः ।।**

**राजोवाच**

**नागालयं रमणकं कस्मात् तत्याज कालियः ।**
**कृतं किं वा सुपर्णस्य तेनैकेनासमञ्जसम् ।। १ ।।**

**श्रीशुक उवाच-**

**उपहार्यैः सर्पजनैर्मासिमासीह यो बलिः ।**
**वानस्पत्यो महाबाहो नागानां प्राङ् निरूपितः ।। २ ।।**
**स्वं स्वं भागं प्रयच्छन्ति नागाः पर्वणिपर्वणि ।**
**गोपीथायात्मनः सर्वे सुपर्णाय महात्मने ।। ३ ।।**

वानस्पत्यो बलिः, स्वं स्वं भागं प्रयच्छन्तीत्यनेन, नागाः सर्पजनैर्यो बलिः स्वेभ्यो दीयते तं तं स्वभागं गरुडाय प्रयच्छन्ति स्मेति ज्ञायते । तथा च एक एकः सर्प एव गरुडाय पर्वणि पर्वणि कल्पितः । कालियस्य अवसरे स गरुडं न गतवानिति वार्ता न साध्वीति ज्ञायते ।।

**अत्र प्रविश्य गरुडो यदि मत्स्यान् स खादति ।**
**सद्यः प्राणैर्वियुज्येत सत्यमेतद् ब्रवीम्यहम् ।। ११ ।।**

'अत्र प्रविश्य गरुडः' इत्यत्र महाभागवतो गरुडः भगवन्तमनुसृत्य विप्र-शापं मानितवानिति ज्ञेयम् ।।

**कालियमर्दनशेषवर्णनेन दावाग्निपानवर्णनेन च भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे पञ्चदशोऽध्यायः**

**तमुद्वहन् धरणिधरेन्द्रगौरवं**
**महासुरो विगतरयो निजं वपुः ।**
**स आस्थितः पुरटपरिच्छदो बभौ**
**तटिद्युमानुडुपतिमानिवाम्बुदः ।। २५ ।।**

'उडुपतिमानिवाम्बुद' इत्यत्र शुक्लाल्पपरिमाणचन्द्रारूढकालमेघ इव शुक्लकेशाविष्टबालबलारूढकृष्णवर्णबृहत्परिमाणप्रलम्बोऽदृश्यतेति भावः ।।

विविधबाललीलावर्णनेन शुक्लकेशाविष्टबलभद्रेण प्रलम्बसंहारस्य वर्णनेन च भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे षोडशोऽध्यायः**

**कृष्णकृष्ण महावीर्य हे रामामोघविक्रम ।**
**दावाग्निना दह्यमानान् प्रपन्नांस्त्रातुमर्हथः ।। ९ ।।**

'कृष्ण कृष्ण' इत्यनेन कृष्णमहिमान्तरं दृष्टवतां गोपालकानां कृष्णसामर्थ्ये विश्वासो जात इति द्योत्यते ।।

मुञ्जाटव्यां पुनर्दावाग्निपानवर्णनेन भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे सप्तदशोऽध्यायः ।।**

भगवच्छक्त्युपबृंहितवर्षशरदृतुवर्णनेन तद्व्याजेनानेकभगवत्प्रियधर्म-वर्णनेन च भगवन्निष्ठत्वम्

**इति श्रीमद्भागवते दशमस्कन्धे अष्टादशोऽध्यायः**

'श्रीदेवी वेणुमाविश्य रेमे कृष्णमुखाम्बुजे' इत्यदि वेणुगीतावर्णनेन भगवन्निष्ठत्वम्

**इति श्रीमद्भागवते दशमस्कन्धे एकोनविंशोऽध्यायः**

**तस्य तत् क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः ।**
**व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः ।। १२ ।।**

श्रीभगवानुवाच-

**ततो जलाशयात् सर्वा दारिकाः शीतवेपिताः ।**
**पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुस्तीरमङ्गनाः ।। १७ ।।**

'व्रीडिताः' इति 'योनिमाच्छाद्य' इति श्रीकृष्णस्य सर्वसाक्षित्वस्य

विस्मरणेन । स्मरणे सति व्रीडाऽपि न आच्छादनमपि न । अत एवोत्तरत्र अशेषकर्मणां साक्षात्कृतमित्युक्तम् ।।

**जलक्रीडासमासक्तगोपीवस्त्रापहरणाख्यमहिमावर्णनेन परोपकारस्यावश्यं कर्तव्यत्वोपदेशेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे विंशोऽध्यायः**

**प्राणबुद्धिमनःखात्मदारापत्यधनादयः ।**
**यत्सम्पर्कात् प्रिया आसंस्ततः को न्वपरः प्रियः।। २७ ।।**

'यत्संपर्कात् प्रिया' इति । 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' इत्यादिश्रुतेः ।।

**यज्ञपत्न्य ऊचुः -**

**मैवं विभोऽर्हति भवान् गदितुं नृशंसं**
**सत्यं कुरुष्व निगमं तव पादमूलम् ।**
**प्राप्ता वयं तुलसिदाम पदावसृष्टं**
**केशैर्निर्वोढुमतिलङ्घ्य समस्तबन्धून् ।। २९ ।।**
**गृह्णन्ति नो न पतयः पितरौ सुता वा**
**न भ्रातृबन्धुसुहृदः कुत एव चान्ये ।**
**तस्मात् प्रसीद पदयोः पतितात्मनां नो**
**नान्या भवेद् गतिररिन्दम तद् विधेहि ।। ३० ।।**

**श्रीभगवानुवाच -**

**पतयो नाभ्यसूयेरन् नित्यं भ्रातृसुतादयः ।**
**लोकाश्च वो मयोपेता देवा अप्यनुमन्वते ।। ३१ ।।**

**न प्रीतयेऽनुरागाय ह्यङ्गसङ्गो नृणामिह ।**
**तन्मनो मयि युञ्जाना अचिरान्मामवाप्स्यथ ।। ३२ ।।**

'कैशैर्निर्वोढुम्' 'तद्विधेहि' इति च विप्रपत्नीभिरङ्गसङ्ग एव याचितः, अत एव तज्जानन् भगवान् 'न प्रीतयेऽनुरागाय ह्यङ्गसङ्ग' इत्युत्तरं दत्तवान् ।।

**इति कृष्णमनुस्सृत्य विप्रास्ते कृतहेलनाः ।**
**दिदृक्षवोऽप्यच्युतयोः कंसाद् भीता न चाचलन् ।। ५१ ।।**

'कंसाद् भीता न चाचलन्' इत्यत्र भगवन्माया मोहिका इति भावः ।।

**विप्रपत्नीदत्तान्नभोजनाख्यमहिमावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकविंशोऽध्यायः**

**श्रीकृष्णप्रेरिताद्रिमुखानुवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे द्वाविंशोऽध्यायः ।**

**गणं सांवर्तकं नाम मेघानां चान्तकारिणाम् ।**
**इन्द्रः प्राचोदयत् क्रुद्धो वाक्यं चाहेशमन्युना ।। २ ।।**

सांवर्तकं प्रलयकालीनम् । सांवर्तकगणो बन्धनविशेषे स्थितः । काले बन्धनमुन्मुच्येन्द्रः प्रेषयतीति गुरुपादाः ।।

**गोवर्धनोद्धरणमहिमावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते तृतयस्कन्धे त्रयोविंशोऽध्यायः**

**गोपलकसङ्गृहीतानेकमहिमकथनेन गर्गोक्तकृष्णमहिमास्मारणेन गो० ार्धनोद्धारसङ्ग्राहकश्लोकनिबन्धनेन च भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे चतुर्विंशोऽध्यायः**

इन्द्रस्तवेन गोविन्दपट्टाभिषेकेण च भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे पञ्चविंशोऽध्यायः**

**तं गृहीत्वाऽनयद् भृत्यो वरुणस्यासुरोऽन्तिकम् ।**
**अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि ।। २ ।।**

'अविज्ञायासुरीं वेलाम्' इत्यनेनेदं ज्ञायते । द्वादश्यामपि साधनीं विना अरुणोदयात् पूर्वं न स्नातव्यमिति ।।

**इति सञ्चिन्त्य भगवान् महाकारुणिको विभुः ।**
**दर्शयामास लोकं स्वं गोपानां तमसः परम् ।। १४ ।।**

'दर्शयामास लोकम्' इत्यत्र गोलोकमिति सम्प्रदायविदः ।।

वरुणपाशात् नन्दगोपमोचनस्य वर्णनेन गोलोकप्रदर्शनेन च भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे षड्विंशोऽध्यायः**

इतः परं पञ्चाध्यायी रासविलास इत्युच्यते । तत्रास्मिन्नध्याये वेणुगानाकृष्टगोपीनामागमनस्य ताभिः कृष्णस्य संवादस्य रासारम्भस्य सौन्दर्यमदापहरणार्थं श्रीकृष्णतिरोधानस्य च वर्णनेन भगवन्निष्ठत्वम्

**तदोडुराजः ककुभः करैर्मुखं**
**प्राच्या विलिम्पन्नरुणेन शन्तमैः ।**
**स चर्षणीनामुदगाच्छुचो मृजन्**
**प्रियः प्रियाया इव दीर्घदर्शनः ।। २ ।।**

प्रियः कृष्णः प्रियाया गोपिकाया इव ।।

**दुश्शीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा ।**

**पतिः स्त्रीभिर्न हातव्यो लोकेऽशुचिरपातकी ।। २९ ।।**

'पतिः स्त्रीभिर्न हातव्यः' इत्यत्रेदं बोध्यम् । पतिः दैवाभिः स्त्रीभिरपि पातकी पातकीपतिः त्याज्यः ।। अतोऽवश्यं पतितसङ्गस्त्याज्य इति । पतितादपि नीचस्य मिथ्याज्ञानिनः सङ्गस्त्याज्य इति किमु वक्तव्यमिति ।।

**इति श्रीमद्भागवते दशमस्कन्धे सप्तविंशोऽध्यायः**

**गायन्त्य उच्चैरमुमेव सङ्गता विचेरुरुन्मत्तकवद् वनाद् वनम् ।**
**पप्रच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषं वनस्पतीन् ।। ४ ।।**

'वनस्पतीन् पप्रच्छुः' इत्यत्र न केवलमुन्मत्तत्वेन पप्रच्छुः, किन्तु ज्ञानित्वादश्वत्थादिदेवताः पप्रच्छुरिति गुरुपादाः ।।

**गोपीनां कामभक्तिविशेषवर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे अष्टाविंशोऽध्यायः**

**गोप्य ऊचुः-**

**जयति तेऽधिकं जन्मना व्रजः**
**श्रयत इन्दिरा साधु तत्र हि ।**
**दयित दृश्यतां त्वां दिदृक्षतां**
**त्वयि धृतासवस्त्वा विचिन्वते ।। १ ।।**

'श्रयत इन्दिरा' इत्यत्र सम्पद्रूपेण श्रयत इत्येकोऽर्थः । राधारूपेणास्त इत्यपरोऽर्थः । राधाया लक्ष्मीत्वस्य प्रमितत्वात् । दामोदरस्य पत्नी इन्दिरेति प्रसिद्धा । कार्तिके दामोदरं राधया सहार्चयन्ति किल । भगवत्पादा अपि 'इन्दिरापतिरानन्दपूर्णो वृन्दावने प्रभुः' इति जगुः । एतत्पर्यालोचनया इन्दिरा राधेति भाति ।।

**विषजलाश्रयाद् व्यालराक्षसाद् वर्षमारुताद् वैद्युतानलात् ।**
**वृषमयाद् भयाद् विश्वतोमुखाद् वृषभ ते वयं रक्षिता मुहुः ।। ४ ।।**

'वृषमयाद्भयाद्' इत्यनेन स्वासामागामिज्ञानं प्रकटितम् । उत्तरत्र वेणुगीतायां देवकीजठरभूरुडुराज इत्यनेनातीतज्ञानमप्याविष्कृतमिति ध्येयम् ।।

**सुप्रसिद्धगोपिगीतावर्णनेन भगवन्निष्ठत्वम् ।।**

**इयं गोपस्त्रीभिर्गीतेति स्त्रीभिर्न गेया । गोपीनां मनुष्यस्त्रीत्वाभावादिति गुरुपादाः ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकोनत्रिंशोऽध्यायः ।**

**न पारयेऽहं निरवद्यसंयुजां सुसाधुकृत्यं विबुधायुषाऽपि वः ।**
**यो मां भजेद् दुर्जरदेहशृङ्खलाः संवृश्च्य वृद्धिं प्रतियाति सोऽधुना ।।**

'न पारयेयं --विबुधायुषाऽपि' इत्यत्र कृष्णो गोपीः स्तुतिव्याजेन समाधातुमेवमुक्तवान् इति प्रतीयते । तन्न । गोपीकृतकामभक्तेर्मोक्षदानमेव फलम् । मुक्तिश्चानन्तकालीना । अतो विबुधायुषाऽपि इति सम्यग् लग्नमिति गुरुपादाः ।। **२३ ।।**

**श्रीकृष्णाविर्भाव-गोपीकृष्णसंल्लापवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे त्रिंशोऽध्यायः ।**

**योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ।**
**प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ।। ३ ।।**

रासोत्सवो नाम क इत्यपेक्षायां योगेश्वरेणेत्यादि । परस्परगृहीतहस्तानां श्रीकृष्णानेकमूर्तिगोपीनां मण्डलीभूय मध्यस्थकृष्णवेणुगानानुसारेण नर्तनमेव रासो नाम महोत्सव इति ।।

श्रीशुक उवाच-

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ।
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ।। ३० ।।

नैतत् समाचरेज्जातु मनसाऽपि ह्यनीश्वरः ।
नश्यत्याश्वाचरन् मौढ्याद् यथा रुद्रोऽपिबद् विषम् ।। ३१ ।।

ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ।
तेषां यत् स्ववचोयुक्तं बुद्धिमान् नैतदाचरेत् ।। ३२ ।।

कुशलाचरितेनैषामिह चार्थो न विद्यते ।
विपर्ययेण चानर्थो निरहङ्कारिणां प्रभो ।। ३३ ।।

किमुताखिलसत्वानां तिर्यङ्मर्त्यदिवौकसाम् ।
ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ।। ३४ ।।

यत्पादपङ्कजपरागनिषेवतृप्ता
योगप्रभावविधुताखिलकर्मबन्धाः ।
स्वैरं चरन्ति मुनयोऽपि न नह्यमाना-
स्तस्येच्छयाऽऽत्तवपुषः कुत एव बन्धः ।।३५।।

गोपीनां तत्पतीनां च सर्वेषामपि देहिनाम् ।
योऽन्तश्चरति सोऽध्यक्ष एष क्रीडनदेहभाक् ।। ३६ ।।

'धर्मव्यतिकरो दृष्ट' इत्यारभ्य 'एष क्रीडनदेहभाक्' इत्यन्तेन कृष्णस्य दोषलेशो नास्तीत्युपपादितम् ।।

अनुग्रहाय भक्तानां मानुषं देहमाश्रितः ।

**भजते तादृशीं क्रडां यां श्रुत्वा तत्परो भवेत् ।। ३७ ।।**

राज्ञा पृष्टस्य किमभिप्राय इति प्रश्नस्योत्तरम्‘अनुग्रहाये’ति ।। इदानीं कलियुग आरब्धः । कलिमलकलुषितानां जारचोरादिवार्तैव रुचिमुत्पादयति । सज्जनानां तत् परिहृत्य स्वजारचोरवार्ताश्रवणादिना कलिमलापनोदलक्षणानुग्रहाय श्रीकृष्णस्य नवनीतचौर्यगोपीजारत्वादि लीलेति ।। अत एव कामं हृद्रोगमाश्वपहिनोति इत्युत्तरत्रोक्तम् । अतो दुष्टकामपरिहारेच्छुभिः रासलीलाश्रवणादि कार्यमित्यभिप्रायः ।।

**रासलीलावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकत्रिंशोऽध्यायः**

**अजगरशापविमोचन-शङ्खचूडवधवर्णनेन भगवन्निष्ठत्वम् ।।।**

**इति श्रीमद्भागवते दशमस्कन्धे द्वात्रिंशोऽध्यायः ।**

**महदतिक्रमणशङ्कितचेता मन्दमन्दमनुगर्जति मेघः ।**
**सुहृदमभ्यवर्षत् सुमनोभिश्छायया च विदधे वितपत्रम् ।। १३ ।।**

सुहृदं सावर्ण्येन मित्रम् ।।

**सुमनसस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ।**
**कवय आनतकन्धरगात्राः विस्मयं ययुरनिश्चिततत्त्वाः ।। १५ ।।**

‘अनिश्चिततत्वा’ इत्यस्य कोऽयं रागः, किमिदं तालमिति निश्चयहीना इत्यर्थः । एतच्चापूर्वगीतश्रवणेनेति भावः ।।

**वेणुगानवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे त्रयस्त्रिंशोऽध्यायः**

**इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् ।**

**सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ।। ८ ।।**

सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः इत्यनेन भयाभावो द्योत्यते ।।

**निवारितो नारदेन तत्सुतौ मृत्युमात्मनः ।**
**ज्ञात्वा लोहमयैः पाशैर्बबन्ध सह भार्यया ।। १९ ।।**

'निवारितो नारदेन' इत्यत्र किमनेन वसुदेवेन हतेन । वासुदेवं जहि । पश्यतु वसुदेवः स्वतनयहननं विवृतनेत्रेणेत्युक्त्वोपायेन निवारित इत्यर्थः । अत एव 'पश्यन्तु विवृतैर्नेत्रैः हन्यमानौ स्वदारकौ' इति कंसवचनमुत्तरत्र ।।

**इत्युक्तस्तेन कंसस्तु महामात्रेण दुर्मतिः ।**
**उवाच भूयो वचनं समेतान् श्रावयन् नृप ।। २८ ।।**

'उवाच भूयो वचनम्' इत्यनेन कंसस्य निर्लज्जत्वं द्योत्यते । जारजातत्वरूपस्वजन्मरहस्यस्य विवृतत्वात् ।।

**तत्रैव कश्चिद् गन्धर्वो द्रुमिलो नाम नामतः ।**
**चरन्नन्तर्हितः काले दृष्ट्वा तामेकचारिणीम् ।। ३४ ।।**

'गन्धर्वो द्रुमिलो नामतः' इत्यत्र द्रुमिलनामकगन्धर्वस्य पुत्रोऽयं कितव इति ज्ञातव्यम् । तात्पर्यनिर्णये तथोक्तेः । वयं हि गन्धर्वकुलोद्भवा इत्यत्राप्युत्तरत्र ।।

**आहूयन्तां जनपदाः पश्यन्तु मम पौरुषम् ।**
**महामात्र त्वया भद्र रङ्गद्वार्यपनीयताम् ।। ५७ ।।**

'पश्यन्तु मम पौरुषम्' इत्यत्र बालयोरपि बलिपृष्टयोर्हननेन स्वपौरुषमिति कंसस्याकूतम् । अन्यथा को नाम स्वस्थात्मा बालहननं पौरुषं मन्यते ।।

**घातयिष्य इहानीतौ कालकल्पेन हस्तिना ।**
**यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ।। ६४ ।।**

कालकल्पेन हस्तिना, मल्लैर्घातय इत्युपलक्षणम् । ततो मुक्तौ चेत् विंशत्यक्षौहिणीकसैन्येन घातये । ततोऽपि कथञ्चिन्मुक्तौ चेत् स्वयमेव घातये इति हृदयम् ।।

**अरिष्टासुरसंहारवर्णनेन श्रीकृष्णवैरिणः कंसस्य अजानतोऽपि कृष्णकर्तृकस्वसंहारोद्यमस्य च वर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे चतुस्त्रिंशोऽध्यायः ।।**

**दिष्ट्या ते निहतो दैत्यो लीलयाऽयं हयाकृतिः ।**
**अस्य ह्रेषितसंत्रस्तास्त्यजन्त्यनिमिषा दिवम् ।। १५ ।।**

'दिष्ट्या ते --हयाकृतिः' इति वदतो नारदस्येदमाकूतम् । मया पुरुषयोर्हययोर्वा युद्धं दृष्टपूर्वम् । नतु हयपुरुषयोः। अतो दिष्ट्या महानन्द इति ।।

**केशिवधवर्णनेन नारदकृतभविष्यच्चरित्रवर्णनेन च भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे पंचत्रिंशोऽध्यायः**

**ध्वजवज्राङ्कुशाम्भोजैश्चिह्नितैरङ्घ्रिभिर्व्रजम् ।**
**शोभमानौ महात्मानौ सानुक्रोशस्मितेक्षणौ ।। २८ ।।**

'ध्वजवज्राङ्कुश--र्व्रजम्' इत्यत्र बलरामस्य शुक्लकेशावेशबलात् ध्वजादिचिन्हिताङ्घ्रित्वं बोध्यम् । यथा पृथौ चक्ररेखाङ्कितपाणिमत्वम् ।

**भक्ताग्रेसराक्रूरागमन-कृष्णकृतातिथ्यवर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे षट्त्रिंशोऽध्यायः**

**भूयस्तत्रापि सोऽद्राक्षीत् स्तूयमानमहीश्वरम् ।**
**सिद्धैर्भुजङ्गपतिभिरसुरैर्नतकन्धरैः ।। ४१ ।।**

**सहस्रशिरसं देवं सहस्रफणमौलिनम् ।**
**नीलाम्बरं बिसश्वेतं शृङ्गैः श्वेतमिव स्थितम् ।। ४२ ।।**

**तस्योत्सङ्गे घनश्यामं पीतकौशेयवाससम् ।**
**पुरुषं चतुर्भुजं शान्तं पद्मपत्रारुणेक्षणम् ।। ४३ ।।**

'अद्राक्षीत् स्तूयमानः' 'तस्योत्सङ्गे घनश्यामम्' इत्यत्रैदमनुसन्धेयम् । तात्पर्यनिर्णयोक्तदिशा । सिद्धपुरुषोऽक्रूरः प्रतिदिनं स्नानकाले शेषं पश्यति स्म । इदानीं तु शेषं शेषशायिनं च ददर्शेति ।।

**भगवल्लीनमनसां गोपीनां प्रलापस्य वर्णनेन श्रीकृष्णदर्शनवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे सप्तत्रिंशोऽध्यायः**

**नैते स्वरूपं विदुरात्मनस्ते**
**अजादयोऽन्यात्मतया गृहीताः ।**
**अजोऽनुबद्धः स गुणैरजाया**
**गुणात् परं वेद न ते स्वरूपम् ।। ४ ।।**

'अजो गुणात् परं वेद' इत्यत्र अजो ब्रह्मा गुणात् त्रिगुणात् परं अव्याकृताकाशे व्याप्तं वेद, नतु साकल्येन ते स्वरूपं वेदेत्यर्थः । तस्य अनन्तरूपेष्वनन्तगुणोपसंहारेऽपि अनन्तक्रियोपसंहाराभावात् ।।

**त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ।**
**बह्वाचार्यविभेदेन भगवन् समुपासते ।। ९ ।।**

‘त्वामेवान्ये शिवोक्तेन’ इत्यत्र शिववाक्येन मोहिता असुराः पाशुपतागमानुरोधेन शिवमेव सर्वोत्तमं मत्वोपासते । सात्विकास्तु शिवान्तर्यामिणं शिवरूपिणमुपासत इति द्रष्टव्यम् ।।

**नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।**
**प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ।। २२ ।।**

‘नमस्ते वासुदेवाय’ इत्यत्र रामावतारे रामो वासुदेवः लक्ष्मणादित्रये सङ्कर्षणादित्रयावेशः । कृष्णावतारे कृष्णो वासुदेवः बलरामप्रद्युम्नानिरुद्धेषु सङ्कर्षणादीनामावेश इत्युभयसङ्ग्राहकोऽयं श्लोक इति ज्ञातव्यम् । वासुदेवायेत्यादिनां रघुवर्याय सात्वतां पतय इत्युभयत्रान्वयो देहलीदीपन्यायेन ।।

**सोऽहं तवाङ्घ्र्युपगतोऽस्म्यसतां दुरापं**
**यच्चाप्यहं भवदनुग्रहमीश मन्ये ।**
**पुंसो भवेद् यर्हि संसरणापवर्ग-**
**स्त्वय्यब्जनाभ सदुपासनयाऽऽमतिः स्यात् ।। २९ ।।**

‘यर्हि संसरणापवर्गः--स्यात्’ इत्यत्र यदा सतामुपासनया मतिर्मननं स्यात् तदा ध्यान-अपरोक्ष-अत्यर्थप्रसादप्रणाड्या संसारात् अपवर्गो मोक्षः स्यात् । यदा संसरणादपवर्गः सन्निहितस्तदा सदुपासनया मतिः स्यादित्युभयविधा योजना ।।

**अक्रूरकृतस्तोत्रेण भगवन्निष्ठत्वं स्पष्टम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे अष्टत्रिंशोऽध्यायः**

**तावद् व्रजौकसस्तात नन्दगोपादयोऽग्रतः ।**
**पुरोपवनमासाद्य प्रतीक्षन्तोऽवतस्थिरे ।। ८ ।।**

'पुरोपवनमासाद्य' इत्यत्रेदं बोध्यम् । पुरप्रवेशात् पूर्वं बाह्यालीप्रदेशे किञ्चित्कालं स्थित्वा अनन्तरं पुरप्रवेशः कार्य इति ।।

**वसित्वाऽऽत्मप्रिये वस्त्रे कृष्णः सङ्कर्षणस्तथा ।**
**शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ।। ३८ ।।**

'विसृज्य भुवि कानिचित्' इत्यस्य 'नेलमुडि हासुवुदु' इत्यपभ्रष्टसंज्ञा ।।

**तस्य प्रसन्नो भगवान् प्रादात् सारूप्यमात्मनः ।**
**श्रियं च परमां लोके बलैश्वर्यस्मृतीन्द्रियम् ।। ४१ ।।**

'प्रादात् सारूप्यमात्मनः' इत्यत्र वायकसुदामानौ विष्णुपार्षदाविति ज्ञेयम् ।।

**मधुराप्रवेश-रजकसंहार-वायक,सुदामानुग्रहकरणवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकोनचत्वारिंशोऽध्यायः**

**सैरन्ध्र्युवाच-**

**दास्यस्म्यहं ते सुरवर्य सम्मता त्रिवक्रनाम्नी ह्यनुलेपकर्मणि ।**
**मावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति ।। ३ ।।**

'दास्यास्मि' इत्यत्र का त्वमित्यस्य त्रिवक्रनाम्नी इति, कस्यासि इत्यस्य ते दासीत्युत्तरम् । कंसस्य दासीति नोक्तवती, किन्तु ते दासीत्यहो तस्याः सुबुद्धित्वम् ।।

**ततस्तावङ्गरागेण सुवर्णेतरशोभिना ।**
**सम्प्राप्तापरभोगेन शुशुभातेऽनुरञ्जितौ ।। ५ ।।**

'सम्प्राप्तापरभोगेन' इत्येतत् 'अङ्गराङ्गेण' इत्यस्य विशेषणम् । परभोगो

नाम वर्णान्तरसंयोगजन्योत्कर्षविशेषः । कृष्णरामयोः श्यामश्वेतवर्णयोः संयोगेन सुवर्णवर्णगन्धस्यैव शोभा प्राप्ता । नतु गन्धसंयोगेन तयोः ।।

**अवनिज्याङ्घ्रियुगलं भुक्त्वा क्षीरोपसेचनम् ।**
**ऊषतुस्तां वृतौ गोपैः पुराच्छकटमीयतुः ।। २३ ।।**

'भुक्त्वा क्षीरोपसेचनम्' इत्यत्र दुष्टहनननानन्तरं क्षीरान्नभोजनं कार्यमिति ज्ञेयम् ।।

**त्रिवक्रावक्रीकरण-धनुर्भङ्ग-कंसत्रासोत्पादनमहिमावर्णनेनभगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे चत्वारिंशोऽध्यायः ।।**

**साम्बष्टकुवलयापीडहननेन मञ्चस्थजनकृतगुणवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकचत्वारिंशोऽध्यायः**

**चाणूरमुष्टिकादिमल्लमर्दनेन कंससंहारेण स्त्रीकृतसानुकम्पस्तवनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे द्विचत्वारिंशोऽध्यायः**

**श्रीकृष्णबन्धकशक्तिवर्णनेन उपनयन-गुरुकुलवास-मृतपुत्रप्रदान-वर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे त्रयश्चत्वारिंशोऽध्यायः**

**गोपीगोपवत्सलेन कृष्णेनोद्धवप्रेषणस्य वर्णनेनोद्धवनन्दगोपसंवाद-व्याजेन कृष्णमहिम्नो वर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे चतुश्चत्वारिंशोऽध्यायः**

**निस्स्वं त्यजन्ति गणिका अकल्पं नृपतिं प्रजाः ।**

**अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणम् ।। ७ ।।**

**खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहम् ।**
**दग्धं मृगास्तथाऽरण्यं जारो भुक्त्वा परस्त्रियम् ।। ८ ।।**

'निःस्वं त्यजन्ति--' इत्यादि । जारो भुक्त्वा परस्त्रियम् इत्यत्र दृष्टान्तरूपम् । अन्यथा असङ्गतेः ।।

**गोप्युवाच-**

**मधुप कितवबन्धो मा स्पृशास्मान् सपत्न्याः**
**कुचविलुलितमालाकुङ्कुमश्मश्रुभिस्त्वम् ।**
**वहतु मधुपतिस्तन्मानिनीनां प्रसादं**
**यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ।। १२ ।।**

मधुप भ्रमर । मधुकुलोत्पन्नोद्धव । ईदृक् कृष्णसदृशश्चाञ्चल्ये । तदेव विवृतं 'सकृददधरसुधाम्' इत्युत्तरश्लोकेन ।

**यदनुचरितलीलाकर्णपीयूषविप्रुट्-**
**सकृददनविधूतद्वन्द्वधर्मा विनष्टाः ।**
**सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना**
**बहव इह विहङ्गा भैक्षचर्यां चरन्ति ।। १८ ।।**

'यदनुचरित' इत्यत्र कृष्णलीलाकृष्टसंन्यासिनां भगवत्प्राप्तिस्तुतिः , कृष्णोऽनेकसंसारिणो नाशयामासेत्याक्रोशश्च ।।

**भगवत्युत्तमश्लोके भवतीभिरनुत्तमा ।**
**भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा ।। २५ ।।**

'मुनीनामपि दुर्लभा' इत्यत्र शतोनशतकोटिऋषीणां दुर्लभेत्यर्थः । नतु शतानाम् ।।

**गोप्य ऊचुः-**

**दिष्ट्या हतो हतः कंसो यदूनां सानुगोऽघकृत् ।**
**दिष्ट्याऽऽप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना ।। ३९ ।।**

'दिष्ट्या हतो कंसः' इत्यत्र पूर्वं कृष्णे गोपीनामसमाधानं तत्सन्देशागतस्मृतीनामिदानीमनुरागविशेषश्च द्योत्यते ।।

**गोपीनां वचनेषु मध्ये मध्ये ज्ञानपूर्वकत्वम्,**
**अज्ञानपूर्वकत्वं च द्रष्टव्यम् ।**

**भ्रमरगीतावर्णनेन गोप्युद्धवसंवादमुखेन कृष्णमहिम्नो वर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते सप्तमस्कन्धे पञ्चचत्वारिंशोऽध्यायः**

**उद्धवकृतश्रीकृष्णदयितगोपीशंसनेन नन्दादिभक्त्युद्रेकवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे षट्चत्वारिंशोऽध्यायः**

**स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः**
**स्वांशेन भारमपनेतुमिहासि भूमेः ।**
**अक्षोहिणीशतवधेन सुरेतराणां**
**राज्ञाममुष्य च कुलस्य यशो वितन्वन् ।। २५ ।।**

'अक्षौहिणीशतवधेन' इत्यत्र शतशब्दो बहुवाची ।।

**सैरन्ध्रीवरदानेनाक्रूरगृहगमनादिवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे सप्तचत्वारिंशोऽध्यायः ।**

**कुन्तीकृतकृष्णस्मरणवर्णनेनोक्रूरोक्तकृष्णसन्देशवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे अष्टाचत्वारिंशोऽध्यायः**

**इति दशमस्कन्धपूर्वार्धः समाप्तः ।।**

# अथ उत्तरार्धः

**अस्तिप्रास्तीति कंसस्य महिष्यौ भरतर्षभ ।**
**हते भर्तरि दुःखार्ते ईयतुः स्वपितुर्गृहान् ।। १ ।।**

श्रीकृष्णजरासन्धयुद्धं सदसच्छास्त्रयुद्धेन साकं वर्णितमिति श्रीमद्विजयध्वजतीर्थश्रीमच्चरणाः । तदेव विशदीकृतं रुग्मिणीशविजये ।।

**अक्षौहिणीभिर्विंशद्भिस्तिसृभिश्चापि संवृतः ।**
**यदुराजधानीं मधुरां न्यरुणत् सर्वतो दिशम् ।। ४ ।।**

'अक्षौहिणीभिर्विंशद्भिः' इत्यत्रेदं बोध्यम् । उत्तराध्याये वक्ष्यमाणरीत्या मत्स्यादिपार्वतेयान्ता द्वाविंशतिभूपालास्तत्पक्षे आसन् । एतैः सह मागधानां गणने त्रयोविशतिसङ्ख्या पूर्यते । एकैकेनैकैकाक्षौहिण्यामानीतायां त्रयोविंशतिअक्षौहिण्यो भवन्तीति ।।

**पूर्वद्वारं समासाद्य रुरुधुर्मागधाज्ञया ।**
**विन्दानुविन्दावावन्त्यौ विराटो दरदस्तथा ।। १३ ।।**

पूर्वद्वारमित्यादि । एकैकस्मिन् द्वारे जरासन्धपक्षीया अष्टावष्टौ । कृष्णपक्षीयाः वक्ष्यमाणरीत्या चत्वारश्चत्वारः । जरासन्धाक्रान्तोत्तरद्वारे तु

कृष्णरामौ द्वावेव । अनेन कृष्णरामयोः प्रतापविशेषः सूचितो भवति ।। किञ्च उत्तरद्वारे स्वयं जरासन्ध आगतः । रामायणयुद्धेपि उत्तरद्वारे स्वयं रावण आगतः । अत्र किञ्चिद्राजनीत्या भवितव्यमिति भाति ।।

**गदा कौमोदकी गुर्वी नाम्ना कौमोदकी शुभा ।**
**त्रिनतं कार्मुकश्रेष्ठं शार्ङ्गसञ्ज्ञं गुणान्वितम् ।। २४ ।।**

'गदा कौमोदकी गुर्वी नाम्ना कौमोदिकी' इत्यत्र प्रथमः कौमोदकीशब्दः यौगिकः । कुः पृथ्वी तां मोदयतीति कुमोदकः कृष्णः । तत्सम्बन्धिनी कौमोदिकी इति । द्वितीयो रूढः । अत एव नाम्नेति ।।

**ततः शशाङ्ककृतिपाञ्चजन्यं महारवं दैत्यकुलापचारम् ।**
**मुखे निधायाशु पुपूर यादवानाश्वासयन् क्षत्रियकूटघट्टितान् ।।**

'क्षत्रियकूटघट्टितान्' इत्यत्र कूटाश्च ते क्षत्रियाश्चेति परनिपातः । तैर्घट्टितान् चालितान् । घट्ट चलने इति धातोः । तादृशान् यादवानाश्वासयन् शङ्खं दध्मौ ।। ५०।।

**वक्षस्यास्ये ललाटे च विव्याध यदुनन्दनः ।**
**ततश्च त्रिंशतां राज्ञां त्रिंशत्कार्मुकमाहवे ।। ६१ ।**

'वक्षस्यास्ये ललाटे च विव्याध' इत्यत्र कृष्णास्मरण-कृष्णनामाकीर्तन-ऊर्ध्वपुण्ड्राहित्याख्यापराधानुसारेण स्थलत्रये वेध इति रुग्मिणीशविजयोक्त-मनुसन्धेयम् ।।

**श्रीकृष्णेन प्रथमजरासन्धपराजयस्य वर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकोनपञ्चाशदध्यायः**

**स्वयं कतिपयैर्युक्तो रथैः कमललोचनः ।**
**अग्रे मगधराजस्य प्रविवेश महद्बलम् ।। १३ ।।**

'स्वयं कतिपयैर्युक्तः' इत्यत्रापि कृष्णस्य प्रतापविशेषो द्योत्यते ।।

**केचिद् विसृज्य शिबिरं विविशुर्गहनं वनम् ।**
**केचिन्मागधमासाद्य विजयस्वेति चाब्रुवन् ।। २५ ।।**

'केचित्--- चाब्रुवन्' इत्यत्र चात् स्वयं दुद्रुवुरिति ज्ञेयम् ।।

**रथेनैकेन गोविन्दः प्रविश्य रिपुवाहिनीम् ।**
**जघान सुबहून् वीरान् सायुधान् सरणोद्यमान् ।। २६ ।।**

जघान सायुधान् सरणोद्यमान् नतु निरायुधान् अरणोद्यमान् । अनेन युद्धस्य धर्म्यत्वं सूचितम् ।।

**श्रीकृष्णस्य द्वितीयविजयवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति इति श्रीमद्भागवते दशमस्कन्धे पञ्चाशोऽध्यायः**

**तं तथाऽऽयान्तमाकर्ण्य वृतराजन्यमण्डलम् ।**
**मित्रं पराजितं युद्धे विष्णुना दानवेश्वरः ।। २ ।।**
**अलङ्कृतैर्गजैरश्वैर्विचित्रस्यन्दनैर्भटैः ।**
**वारकान्ताकदम्बैश्च सूतमागधवन्दिभिः ।। ३ ।।**
**उपतस्थे जरासन्धं बाणो बाहुसहस्रवान् ।**
**तौ दृष्ट्वा परमस्निग्धौ परस्परमनोनुगौ ।। ५ ।।**

'मित्रं पराजितम्' 'अलङ्कृतैः गजैः' इत्यादिभिः 'उपतस्थे' इति हास्योक्तिः ।।

**दानवेन्द्र निबोधेदं गोपेनाधर्मचारिणा ।**
**रात्रौ चौर्यप्रतापेन वञ्चितोऽस्मि दुरात्मना ।। ७ ।।**

'रात्रौ चौर्यप्रतापेन वञ्चितोऽस्मि' इति भृशमिति सूचयितुं पूर्वाध्याये श्रीकृष्णप्रस्थानमुहूर्तं वर्णितम् ।।

**तैलाक्ता नतपर्वाणः स्वर्णपुङ्खा अयोमुखाः ।**
**एकैकस्मिन् दशदश भटे चाश्वे शतंशतम् ।। ३७ ।।**

**रथे रथे च साहस्रमयुतं च गजे गजे ।**
**अदृश्यन्त परानीके तदद्भुतमिवाभवत् ।। ३८ ।।**

'एकैकस्मिन् दश दश' इत्यादिना जरासन्धसैन्यं कृष्णबाणेभ्यो नालमिति सूचयति ।।

**श्रीकृष्णरामकृततृतीययुद्धवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे द्विपञ्चाशोऽध्यायः**

**ततोऽन्तरिक्षे घनघोषघर्घरां शुश्राव वाणीं विशदाशरीरिणीम् ।**
**न राम वध्यो भवता जरासुतः सुखी निवर्तस्व रणादिति स्फुटम् ।। ४ ।।**

'ततोऽन्तरिक्षे घनघोष' इत्यत्र कालव्यत्यासो ज्ञेयः । तात्पर्यनिर्णयोक्त-रीत्या अशरीरवाणिश्रवणेन जरासन्धमोचनं गोमन्तारोहणोत्तरभावियुद्धे । किञ्च भागवते सृगालवासुदेवसंहारानन्तरं गोमन्तारोहणमुक्तम् । अत्रापि कालव्यत्यासः । निर्णयोक्तदिशा गोमन्तारोहणानन्तरं सृगालवासुदेवसंहारः ।। अपिच भागवते कालयवनभस्मीकरणानन्तरं पुनर्गोमन्तारोहणमुक्तम् । निर्णये तु कालयवनभस्मीकरणानन्तरं जरासन्धजयपूर्वकं द्वारकागमनमेवोक्तम् । अत्र सर्वविषये भगवत्पादा एव महाप्रमाणम् ।।

**सृगालवासुदेवसंहारवर्णनेन भगवन्निष्ठत्वम् ।।**

**तस्य मूर्ध्नि निधायाशु किरीटं दिव्यभूषणम् ।**
**प्रणम्य पादयोर्मूर्ध्ना स्तोतुं तमुपचक्रमे ।। १३ ।।**

'तस्य मूर्ध्नि निधायाशु' इत्यत्र लक्षयोजनपरिमितक्षीरसागर-शायिनोनन्तशयनस्य नवसाहस्रयोजनपरिमितकिरीटं गोमन्तगकृष्णशिरसि कथं लग्नमित्याशङ्का अनयोरत्यन्ताभेदादिति परिहृता ज्ञेया ।।

**अन्तः समुद्रे नगरं कृष्णोऽद्भुतमचीकरत् ।**
**दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शिल्पनैपुणम् ।। ३४ ।।**

'अन्तःसमुद्रे नगरम्' इत्यत्र कालयवनागमने तत्काल एव द्वारकानिर्माणं तत्र बन्धूनां स्थापनं किञ्चित्कालानन्तरं हरिवंशोक्तदिशा द्वारावत्याः परिष्करणं चानुसन्धेयम् ।।

**गरुडानीतकिरीटधारण-जरासन्धपराजय-द्वारकानिर्माणवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते तृतयस्कन्धे त्रिपञ्चाशत्तमोऽध्यायः**

**पलायनं यदुकुले जातस्य तव नोचितम् ।**
**इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ।। ८ ।।**

'नैनं प्राप्याहताशुभः' इत्यत्र अहताशुभत्वं प्राप्त्यभावे हेतुः ।।

**नन्वसौ दूरमानीय शेते मामिह साधुवत् ।**
**इति मत्वाऽच्युतं मूढस्तं पदा समताडयत् ।। १० ।।**

'इति मत्वाऽच्युतं मूढः' इत्यत्र कश्चिद्राजानं कृष्णमिति मन्वानं मूढ इचि निन्दन् श्रीशुकः जीवेश्वराभेदवादिनं मूढं मन्यते ।।

**स तावत् तस्य रुष्टस्य दृष्टिपातेन भारत ।**
**देहजेनाग्निना दग्धो भस्मसादभवत् क्षणात् ।। १२ ।।**

'अग्निना दग्ध' इत्यत्र अगं नयतीति व्युत्पत्त्या अग्निशब्दवाच्येन अग्निगेन कृष्णेनेत्यर्थः ।। अन्यथा रुद्रवररक्षितस्य दहनासम्भवात् ।।

**एवमुक्तः स वै देवानभिवाद्य महायशाः ।**
**अयाचत गुहाविष्टो निद्रां तु बहुकालिकीम् ।। २१ ।।**

'अयाचत निद्रां बहुकालिकीम्' इत्यत्र स्वनिद्राभङ्गं करिष्यतः स्ववीक्षणेन दहनमपि याचितवान् इति द्रष्टव्यम् ।।

**तथेत्युक्तस्तु तैर्देवैर्मुचुकुन्दो महामनाः ।**
**अशयिष्ट गुहाविष्टो निद्रया देवदत्तया ।। २२ ।।**

'अयशिष्ट गुहाविष्टः' इत्येतदनन्तरं स्वतोषणस्यावैययर्थ्याय दैवैर्विष्णुः स्वदत्तवरसार्थक्याय याचित इत्यनुसन्धेयम् ।।

**मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभम् ।**
**यद् भाससे गुहाध्वान्तं प्रदीपः प्रभया यथा ।। ३० ।।**

'देवदेवानां त्रयाणाम्' इत्यत्र त्रयाणां ब्रह्मरुद्रेन्द्राणां त्रेताग्नीनां वेति विजयध्वजीये । तत्र 'वा' उपमाने ।।

**वयं तु पुरुषव्याघ्र ऐक्ष्वाकाः क्षत्रबन्धवः ।**
**मुचुकुन्द इति ख्यातो यौवनाश्वात्मजः प्रभो ।। ३२ ।।**

'वयं तु' इत्यत्र गुरावात्मनि बहुवचनमिति बहुवचनम् ।।

**जन्मकर्माभिधानानि सन्ति मेऽङ्ग सहस्रशः ।**

**न शक्यन्तेऽनुसङ्ख्यातुमनन्तत्वान्ममापि हि ।। ३७ ।।**

'न शक्यतेऽनुसङ्ख्यातुम्' इत्यत्र एके चोदयन्ति ।भगवान् स्वगुणसङ्ख्यां जानाति वा न वा । आद्ये न शक्यतेऽनुसन्धातुमिति कथं घटते । द्वितीये सार्वज्ञ्यहानिरिति । तत्र ब्रूमः । द्वितीयपक्षमङ्गीकुर्मः । न तत्रोक्तो दोषः । अनन्तगुणान् अनन्तत्वेन जानाति । सङ्ख्याभावादेव सङ्ख्यां न जानातीति । नहि शशविषाणमजानन् असर्वज्ञो भवति ।।

**भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ।**
**सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ।। ५५ ।।**

'भवापवर्गो भ्रमतो यदा' इत्यत्र यदा भवापवर्गकालो भवेत् तदा सत्समागमो भवेत् । यदा सत्समागमो भवेत् तदा श्रवणादिद्वारा भवापवर्गो भवेत् इत्युभयथा योजनीयम् ।।

**कालयवनसंहार-मुचुकुन्दवरदानवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे चतुः पञ्चाशत्तमोऽध्यायः ।**

**ततो विलोक्य गोविन्दो वृक्षमुत्पाट्य रंहसा ।**
**गजान् रथान् हयान् युद्धे पोथयामास दुर्मदः ।। ८ ।।**

'गोविन्दो वृक्षमुत्पाट्य' इत्यनेन भीमेन वृक्षमुत्पाट्य उपकीचकादिपोथनं बिम्बक्रियानुसारीति कथितं भवति ।।

**तं चापतन्तमालोक्य सहितं सबलैर्नृपैः ।**
**कीर्यमाणौ शरौघेण वृष्ट्येव करिपोतकौ ।। १५ ।।**

'वृष्ट्येव करिपोतकौ' इत्युपमानेन शरवृष्टिः कृष्णरामयोः अकिञ्चित्करी इति सूचितं भवति ।।

**दशैकयोजनोत्तुङ्गान्निपेततुरधो भुवि ।**
**अरक्ष्यमाणौ रिपुणा सानुगेन यदूत्तमौ ।। ३७ ।।**

'अरक्ष्यमाणौ रिपुणा' इत्यत्र वक्तव्यं पूर्वमेवोक्तम् ।।

**बलमाकृष्य सुमहन्मगधान् मागधो ययौ ।**
**अष्टादशे तु सङ्ग्रामे जित्वा यादवसत्तमौ ।**
**दृप्तः स्वराष्ट्रे न्यवसज्जितदिङ्मण्डलो नृप ।। ३९ ।।**

'जित्वा यादवसत्तमौ' इत्यत्रापि मृषा मन्वान इति पूर्वश्लोकस्थितमाकृष्य योजनीयम् । तथाच यादवसत्तमौ जित्वेति मृषा मन्वानः, अत एव दृप्त इति उत्तरश्लोकस्थेनान्वयः ।।

**माधवौ तु महात्मानौ प्रविश्य द्वारकां पुरीम् ।**
**स्तूयमानौ दिवारात्रं सूतमागधबन्दिभिः ।**
**वृतावानन्दबहुलैर्बन्धुभिः सुखमूषतुः ।। ४१ ।।**

'महात्मानौ स्तूयमानौ' इत्यनेन माधवयोरेवाष्टादशे सङ्ग्रामेऽपि विजय इति सूचितम् ।। नहि पराजितौ स्तूयेते ।।

**गोमन्तारोहणवर्णनेनाष्टादशसङ्ग्रामे जयस्य वर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे पञ्चपञ्चाशत्तमोऽध्यायः**

अस्मिन्नध्याये विजयध्वजीयोक्तदीपकन्यायस्त्वित्थम् ।। पूर्वाध्याये जरासन्धपराजयवर्णनेन 'पूर्वेषां सख्यं वृणक्ति' इति दर्शितम् । अत्राध्याये पाण्डवप्रीतिवर्णनेन 'अपरेभिरेति' इति दर्शितम् । अतः श्रुत्यर्थो देहलीस्थदीपकवद्भातीति ।।

**तदाकर्ण्य हरिः सर्वं वृत्तान्तं जगदीश्वरः ।**

**पौरुषं पाण्डुपुत्राणां बभूवानन्दनिर्भरः ।। १६ ।।**

'बभूवानन्दनिर्भरः' इत्यत्र सदानन्दपूर्णस्यानन्दोक्तिः लोकदृष्टिव्यपेक्षयेति मन्तव्यम् । तात्पर्यनिर्णयोऽत्र मानम् ।।

**श्रीकृष्णपाण्डवयोर्मिथः प्रीतिवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे षट्पञ्चाशत्तमोऽध्यायः**

**अनुजस्य विवाहात् प्राक् अग्रजस्य विवाहेन भवितव्यमिति दर्शयितुं प्रथमतो बलभद्रविवाहमाहास्मिन्नध्याये ।।**

**रेवतो नाम राजाऽऽसीत् पुरा धर्मार्थतत्त्ववित् ।**
**रेवती नाम तस्यैका जज्ञे कन्या यशस्विनी ।। ३ ।।**

'रेवतो नाम राजा आसीत्' इत्यत्र प्रकृतरेवतीपिता ककुद्मिनामकः । तत्पिता रेवतः । यत् पितुस्तत् पुत्रस्येति न्यायेन ककुद्म्येवात्र रेवत इत्युक्त इति ज्ञातव्यम् । नवमस्कन्धे तथैव वंशोक्तेः ।।

**क्षणमात्रमिवाश्राव्यं शृण्वतो गीतमेतयोः ।**
**क्वेदानीं तव ते भूपाः सुतायाः सदृशा वराः ।।१० ।।**

'क्षणमात्रमिवाश्राव्यं' इत्यत्र निर्णयोक्तदिशा तद्गानस्याश्राव्यत्वात् ककुद्मिनं मूर्छा आवृणोदिति ज्ञातव्यम् ।।

**इत्युक्तस्तेन भूपालस्तं प्रणम्य पुरं गतः ।**
**रामाय प्रददौ कन्यां रूपिणीं बाहुशालिने ।। १२ ।।**

'रूपिणीं बाहुशालिने' इत्यत्र रूपित्वात् रेवती गुणवती । बाहुशालित्वात् बलभद्रो गुणवान् । अतस्तयोस्संयोगो गुणोचित इत्युक्तं भवति । भागवतस्त्रीपुरुषयो रूपबलयोर्गुणानुमापकत्वात् ।।

**तामादियुगसम्भूतां दीर्घदेहां महाभुजः ।**
**आकृष्य लाङ्गलेनांसे समां चक्रे हलायुधः ।। १३ ।।**

'तामादियुगसम्भूतां....समां चक्रे' इत्यत्र तादृशसमीकरणमद्भुतं दिव्यमिति मन्तव्यम् । अत एव वयोधिकां कथमुवाहेति शङ्का निरस्ता । देवताव्यापारस्य मनुष्यव्यापाराद्भिन्नत्वात् । मनुष्यधर्मः पशुधर्मादनावृत-मैथुनादेर्यथा विलक्षणस्तथेति । ब्रह्मणा अनुमतत्वाच्च।।

**भगवानपि गोविन्द उपयेमे कुरूद्वह ।**
**वैदर्भीं भीष्मकसुतामिन्दिरांशां स्वयंवरे ।। १४ ।।**

'भगवान् गोविन्दो इन्दिरांशामुपयेमे' इत्यनेन रमानारायणांशयो रुग्मिणीकृष्णयोर्योगो नित्यः, उपयमो लोकविडम्बनमित्यसूचि ।।

**भगवान् भीष्मकसुतां रुग्मिणीं रुचिराननाम् ।**
**राक्षसेन विवाहेन उपयेम इति श्रुतम् ।। १६ ।।**

'राक्षसेन विवाहेन' इत्यत्र राक्षसविवाहो नाम स्वासक्तवध्वा बन्धुमध्याद् वीर्येणापग्हरणं विवक्षितम् । नतु रुदन्त्या बलात्कारेणाहरणम् ।।

**ब्रह्मन् विष्णुकथाः पुण्या माध्वीर्लोकमलापहाः ।**
**को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ।। १८ ।।**

'माध्वीर्लोकमलापहाः' इत्यत्र मध्वसम्बन्धिन्यो लोकमलापहा इत्यर्थः । भगवत्पादीयनिर्णयरहितानां लोकमलापहतत्वाभावात् । प्रत्युत मलापादकत्वात् । प्रष्टा राजा कथमेतदभिप्रैतीति नाशङ्कनीयम् । राजमुखेनैवैतच्छब्द-मुच्चारयितुर्भगवतो बादरायणस्यायमभिप्राय इति हृदयात् ।।

**रुग्म्यग्रजो रुग्मरथो रुग्मबाहुरनन्तरः ।**

**रुग्मकेशो रुग्ममाली रुग्मिण्येषां स्वसा सती ।। २० ।।**

'रुग्मिणी' इत्यत्र गकार एव नतु ककारः । श्रीमद्वादिराजश्रीमच्चरणैः तथैव बन्धकरणात् ।।

**तदवेत्यासितापाङ्गी वैदर्भी दुर्मना भृशम् ।**
**विचिन्त्याप्तं द्विजं कञ्चित् कृष्णाय प्राहिणोद् द्रुतम् ।। २४ ।।**

'द्विजं कञ्चित्' इत्यत्र कशब्दो ब्रह्मवाची । तथाच ब्रह्मपदयोग्यं ब्राह्मणमित्यर्थ इत्यहुः । स एव जन्मान्तरे वादिराजतीर्थः अभवदिति च । अत एवोत्तरत्र द्विजवरश्रेष्ठ इति श्रैष्ठ्यवाचिशब्दप्रयोगोऽपि सङ्गच्छते ।।

**यस्याङ्घ्रिपङ्कजरजःस्तवनं महान्तो**
**वाञ्छन्त्युमापतिरिवात्मतमोपहत्यै ।**
**यद्यम्बुजाक्ष न लभेय भवत्प्रसादं**
**जह्यामसून् व्रतकृशा शतजन्मभिः स्याम् ।।४४।।**

'जह्यामसून्' इत्यादि लोकविडम्बनाय ।।

**शुक्लकेशाविष्ठबलभद्रपरिणयवर्णनेन रुग्मिणीपरिणयोपक्रमेण च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे सप्तपञ्चाशत्तमोऽध्यायः**

**तथाऽहमपि तच्चित्तो निद्रां नाध्यगमं निशि ।**
**वेदाहं रुग्मिणा द्वेषान्ममोद्वाहो निवारितः ।। २ ।।**

'तथाहमपि' इत्यत्र यथा रुग्मिणी मच्चित्ता तथा अहमपि तच्चित्तः । यथा तस्या निद्राधिगमाभावो विडम्बनं तथा ममापीति हार्दम् ।।

**चक्रुः सामर्ग्यजुर्मन्त्रैर्वध्वा रक्षां द्विजोत्तमाः ।**

**पुरोहितोऽथर्वमन्त्रैर्जुहाव ग्रहशान्तये ।। १२ ।।**

'वध्वा रक्षां द्विजोत्तमाः चक्रुः' इत्यत्रेयमाशङ्का । द्विजोत्तमकृतरक्षाया अपि कथं हरणमिति । तत्रेदं समाधानम् । द्विजकृतरक्षात्वात् शिशुपालो नास्पृशदिति । वस्तुतस्तु कटाक्षमात्रेण जगद्दहनसमर्थाया रक्षा अनपेक्षितैव ।।

**एवं चेदिपती राजा दमघोषः सुताय वै ।**
**कारयामास मन्त्रज्ञैः सर्वमभ्युदयोचितम् ।। १४ ।।**

'दमघोषः....अभ्युदयोचितं कारयामास' इत्यत्रेवमनुसन्धेयम् । मन्त्रज्ञैरभ्युदयोचितस्य कृतत्वादेव शिशुपालस्य रुग्मिणीस्पर्शो विघटितः । अन्यथा सुमहन्महत्तरपातकापत्तेः ।। एतच्च तत्राविष्ठजयापेक्षया । हिरण्य-कशिपुरूपदैत्यस्य तु जगज्जननीकामनेनैवान्धतमःप्राप्तिरिति ।।

**एवं चेदिपती राजा दमघोषः सुताय वै ।**
**कारयामास मन्त्रज्ञैः सर्वमभ्युदयोचितम् ।। १४ ।।**

'भ्रातृस्नेहपरिप्लुतः' इत्यनेनैतत् सूचितम् । बलरामेण कृष्णस्नेह-वशादेवागमनम् । नतु कृष्णस्यैकाकिनः कन्याहरणासामर्थ्यादिति ।।

**एवं चिन्तयती बाला गोविन्दहृतमानसा ।**
**न्यमीलयत कालज्ञा नेत्रे अश्रुकलाकुले ।। २६ ।।**

'न्यमीलयत कालज्ञा नेत्रे अश्रुकुलाकुले' इत्यत्र कालं व्याप्तं परमात्मानं अपरोक्षतो जानती रुग्मिणी आनन्दाश्रुकुलाकुले न्यमीलयतेत्यर्थः । नतु दुःखाश्रुकुलाकुले । तस्या दुःखलेशस्याप्यभावात् ।।

**आवेद्य पूर्णं नगरं जरासन्धादिभिर्नृपैः ।**
**ससैन्ययोः सानुगयोरातिथ्यं विदधे यथा ।। ३५ ।।**

'आवेद्य पूर्णं नगरम्' इत्यत्र नगरे स्थलसङ्कोचाभावेऽपि नगरं प्रविष्टः श्रीकृष्णः कन्याहरणं कुर्यादिति बुध्या नगरं पूर्णमिति मिथ्येवावैद्येत्यर्थः । बाह्यत एव कन्यामबहरतः कृष्णस्यैदमनुकूलमेव जातमिति श्रीमद्वादिराजश्रीमच्चरणाः ।।

**यतवाङ् मातृभिः सार्धं सखिभिः परिवारिता ।**
**गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ।। ४२ ।।**

'परिवारिता' इत्यत्रान्यत्रेक्तदिशा प्रथमं मातृभिरनन्तरं सखीभिरनन्तरं पुरुषवेषधारिणीभिः योधवद्दृश्यमानाभिर्युवतिभिरनन्तरं वेत्रझर्झरपाणिभिर्वृद्धैः तद्बाह्यतः सन्नद्धैः शूरैः परिवारितेत्यर्थः ।।

**नमस्ये त्वाऽम्बिकेऽभीक्ष्णं स्वसन्तानयुतां शिवाम् ।**
**भूयात्पतिर्मे भगवान् कृष्णस्तदनुमोदताम् ।। ४८ ।।**

'भूयात्पतिर्मे भगवान्' इति कृष्णः स्वां हरेत् इति जानन्त्या रुग्मिण्या वचनम् ।।

**उत्सार्य वामकरजैरलकानपाङ्गैः**
**प्राप्तह्रियैक्षत नृपान् ददृशेऽच्युतं सा ।**
**तां राजकन्यां रथमारुरुक्षतीं**
**जहार कृष्णो द्विषतां समीक्षताम् ।। ५९ ।।**

'ह्रियैक्षत नृपान् ददृशेऽच्युतम् सा' इत्यत्र लज्जाविहीना एते मामपेक्षन्त इति नृपान् तिरस्कारेण दृष्ट्वा अच्युतमेव लज्जयैक्षतेत्यर्थः ।।

**रुग्मिणीहरणवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे अष्टापञ्चाशत्तमोऽध्यायः**

**प्रहस्य भगवानाह मा भैस्त्वं वामलोचने ।**
**विनङ्क्ष्यत्यधुनैवैतत् तावकैः शात्रवं बलम् ।। ६ ।।**

'तापकैः शात्रवं बलम्' इत्यत्र कृष्णपक्षीयत्वात् तावकैः कृष्णपक्षीयैः शात्रवं रुग्मिसम्बन्धि बलं विनङ्क्ष्यतीत्यर्थः ।।

**हस्ताः सासिगदेष्वासाः करभा ऊरवोऽङ्घ्रयः ।**
**अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च ।। ९ ।।**

'करभाः' इति 'ऊरवः' इत्यस्य विशेषणम् । करवद्भान्तीति करभाः ।।

**शौरेः सप्तदशाहं वै संयुगानि पराजितः ।**
**त्रयोविंशतिभिः सैन्यैर्जिग्य एकमहं परम् ।। १४ ।**

'शौरेः सप्तदशाहम्' इत्यत्र अहं सप्तदशवारं पराजितोपि न शोचामि । एकवारं पराजितस्त्वं किमर्थं शोचसीति मागधस्य हृदयम् ।।

**दृष्ट्वा भ्रातृवधोद्योगं रुग्मिणी भयविह्वला ।**
**पतित्वा पादयोः पत्युरुवाच करुणं सती ।। ३४ ।।**

'पतित्वा पादयोः' इत्यत्र रुग्मिणीकृष्णावेकमनस्कावपि रुग्मिणा चिक्रीडतुरिति ज्ञेयम् ।।

**असाध्विदं त्वया कृष्ण कृतमस्मिन् जुगुप्सितम् ।**
**वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधम् ।। ४१ ।।**
**मैवास्मान् साध्व्यसूयेथा भ्रातुर्वैरुप्यचिन्तया ।**
**सुखदुःखदो न चान्योऽस्ति यतः स्वकृतभुक् पुमान् ।।४२**

'असाध्विदम्' इति 'मैवास्मान्' इति च बलभद्रवचनमीशाज्ज्ञान-तिरोधाननिमित्तमिति ज्ञेयम् ।।

**क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः ।**
**भ्राताऽपि भ्रातरं हन्याद् येन घोरतरस्ततः ।। ४४ ।।**

'भ्रातापि भ्रातरं हन्यात्' इत्यत्र किमु भामस्यालकाविति हार्दम् ।।

**स्मरन् विरूपकरणं वितथात्ममनोरथः ।**
**चक्रे भोजकटं नाम निवासाय महत्पुरम् ।। ५२ ।।**

'चक्रे भोजकटं निवासाय' इत्यत्र कृष्णमहत्वा भगिनीमनादाय कुण्डिनं न प्रवेक्ष्यामीति प्रतिज्ञापालनाय अन्यत्र पुरे न्यवसत् । अहो अस्य प्रतिज्ञापालनमिति हास्योक्तिः ।।

**नरा नार्यश्च मुदिताः प्रमृष्टमणिकुण्डलाः ।**
**पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ।। ५६ ।।**

'नरा नार्यश्च' इत्यत्र अन्यत्रोक्तदिशा स्त्रीपुरुषा रुग्मिणीकृष्णवत् अलङ्कृता विचेरुरिति ध्येयम् ।।

**रुग्मिजयपूर्वकं रुग्मिणीविवाहवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकोनषष्ठितमोऽध्यायः ।**

**प्रसेनो हयमारुह्य मृगयां व्यचरद् वने ।**
**प्रसेनं सहयं हत्वा मणिमाच्छिद्य केसरी ।। १४ ।।**

'प्रसेनं सहयं हत्वा' इत्यत्र मणिः शुचिभूतेन धार्यम् । मृगयासमये अशुचित्वस्य प्राप्तत्वात् प्रसेनो हत इत्यन्यत्रोक्तदिशा द्रष्टव्यम् ।।

**अभिमृष्यारविन्दाक्षः पाणिना शङ्करेण तम् ।**
**कृपया परया भक्तं मेघगम्भीरया गिरा ।। ३० ।।**

'अभिमृष्यारविन्दाक्षः' इत्यत्र तात्पर्यनिर्णयोक्तदिशा व्यथा यथा न स्यात् तथा जीर्णदेहं चक्रेण विदार्य नूतनं देहं दत्तवान् इति ज्ञेयम् ।।

**सत्राजितं शपन्तस्ते दुःखिता द्वारकौकसः ।**
**उपतस्थुर्महामायां दुर्गां कृष्णोपलब्धये ।। ३५ ।।**

'उपतस्थुर्महामायाम्' इत्यनेन कृष्णमनिर्गतं श्रुत्वा उत्तरक्रियां चक्रुरित्यन्यत्रोक्तं सम्यग् व्याख्यातम् । नहि द्वादशदिनमदृष्टस्यापरक्रियां कुर्वन्ति ।।

**भगवानाह न मणिं प्रतीच्छामो वयं नृप ।**
**तवास्तु देवभक्तस्य वयं हि फलभागिनः ।। ४५ ।।**

'वयं हि फलभागिनः' इत्यत्र मणिना प्रत्यहं दीयमानस्य सुवर्णाष्टभाररूपफलस्य भागिन इत्यर्थः ।।

**जाम्बवती-सत्यभावाविवाहवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे षष्टितमोऽध्यायः**

**भीष्मं नृपं सविदुरं गान्धारीं द्रोणमेव च ।**
**समदुःखौ समागम्य हा कष्टमिति होचतुः ।। २ ।।**

'समदुःखौ' इत्यत्र विदुरादीनां सदृशदुःखावित्यर्थः । विदुरस्य पाण्डवदहनस्य ज्ञातत्वात् तेनैव भीष्मं प्रति तज्जीवसनस्य कथितत्वात् अन्येषां दुखभावेऽपि तैर्दुःखस्य प्रदर्शितत्वात् कृष्णरामवपि दुःखं प्रदर्शयामासुरिति भावः ।।

**सत्यभामा च पितरं हतं वीक्ष्य शुचार्पिता ।**
**व्यलपत् तात तातेति हा हताऽस्मीति मुह्यती ।। ७ ।।**

'मुह्यती' मोहयती । अन्तर्णीतणिच् ।।

**ततः पाञ्चालनगराद् याज्ञसेन्याः स्वयंवरम् ।**
**घुष्यता यज्ञसेनेन प्रेषितो दूत आगतः ।। ११ ।।**

'ततः पाञ्चालनगरात्' इत्यत्रेयं शङ्का । सत्राजित् मृतः । तद्देहः तैलद्रोण्यां स्थापितः । एतत्समये याज्ञसेन्याः स्वयंवरं श्रुत्वा कृष्णरामो द्रष्टुं जग्मतुः । ततो निवर्त्य शतधन्वानं जघ्नतुः । ततो मृतस्योत्तरक्रिया कारिता । एतत्सर्वं मूलश्लोकैरेव सिद्धम् । बन्धौ मृतरि लोकदृष्ट्आ आशौचस्यप्राप्तत्वात् कथमेतत् सर्वं घटत इति । तत्रेदं समाधानम् । मतेऽपि बन्धौ शवालङ्कारानन्तरमेव आशौचारम्भः । आहिताग्नेस्तु शवदाहानन्तरमेव । अतः का कथन्तेति ।। अहो श्रीकृष्णस्य पाण्डवेषु स्नेहो यतो मृतं बन्धुं परित्यज् तान् द्रष्टुं गतवान् ।।

**अदृष्टपूर्वान् सुव्यक्तं ब्रह्मरूपधरान् नृपान् ।**
**तैर्विद्धलक्ष्यैः पौरुष्यप्रतिलब्धमनोरथैः ।। १३ ।।**

'अदृष्टपूर्वान्' बहुकालेनादृष्टान् । उभयत्रादृष्टाख्यगुणयोगात् गौण-प्रयोगः ।।

**जरासन्धः सप्तदशसंयुगाद् विरथो गतः ।**
**प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत ।। १८।।**

**सोऽप्याह को विरुध्येत विद्वानीश्वरयोर्बलम् ।**
**यं कैलासाश्रयः शम्भुर्ननाम शिरसा हरिम् ।। १९ ।।**

**यो हंसडिभिकौ युद्धे जितवान् वरदुर्मदौ ।**
**आशीविषो महानागो येन निर्वासितो ह्रदात् ।। २० ।।**

**य इदं लीलया विश्वं सृजत्यवति हन्ति च ।**
**चेष्टां विश्वसृजो यस्य न विदुर्मोहिता यया: ।।२१ ।।**

**यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना ।**
**दधार लीलया बाल उच्छिलीन्द्रमिवार्भकः ।। २२ ।।**

**नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे ।**
**अनन्तायादिभूताय कूटस्थायात्मने नमः ।। २३ ।।**

**प्रत्याख्यातः स तेनापि शतधन्वा महामणिम् ।**
**तस्मिन् न्यस्याश्वमारुह्य शतयोजनगं ययौ।। २४ ।।**

'प्रत्याख्यातः प्रत्याख्यातः स तेनापि' इत्यनेनेदं ज्ञायते । सत्रजिद्धनने प्रयोजकावप्यक्रूरकृतवर्माणौ शतधन्वानं साहाय्ये प्रत्याख्यातवन्तौ । तत्र हेतुः कृष्णभक्तिः ।साहाय्यकरणे अशक्तिश्चेति तद्वाक्यादेव गम्यते । अतः पूर्वं दैत्यावेशात् कृष्णविरोधमगणय्य प्रेरयामासुः । इदानीं दैत्यावेशराहित्येनसाहाय्यं निराकृतवन्त इति वक्तव्यम् । शतधन्वा तु निर्णयोक्तदिशा स्वभावादेव दैत्य इति द्रष्टव्यम् ।।

**पदातेर्धावतस्तस्य पदातिस्तिग्मनेमिना ।**
**चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिम् ।। २७ ।।**

'पदातेर्धावतस्तस्य' इत्यनेन पादेन धावन्तं रथेनानुगमनमधर्म इति पदातिरेवानुगतवान् इति सूच्यते ।।

**अहं वैदेहमिच्छमि द्रष्टुं प्रियतरं मम ।**
**इत्युक्त्वा स ययौ राजन् मिथिलां यदुनन्दनः ।। ३० ।।**

'अहं वैदेहमिच्छामि' इत्यत्र बलभद्रो मणिर्लब्धः, किन्तु कृष्णेन मम

न दीयते इति वैमनस्येन मिथिलां ययौ । तत्र अहं वैदेहं द्रष्टुमिच्छामि इति हेतुमुक्तवानिति ज्ञेयम् ।।

**ततोऽशिक्षद् गदां काले धार्तराष्ट्रः सुयोधनः ।**
**मानितः प्रीतियुक्तेन जनकेन महात्मना ।। ३२ ।।**

'ततोऽशिक्षद् गदां काल' इत्यत्र कृष्णवियोगकाल एव मम गदाशिक्षणाय सुभद्रायाचनाय चानुकूल इति मन्वानो दुर्योधनः कृष्णवियोगकाले गदामशिक्षदिति भावः ।।

**स्यमन्तकोपाख्यानशेषवर्णनेन** भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे एकषष्टितमोऽध्यायः ।**

**पाण्डवसैन्यवर्णनेन पञ्चमहिषीपरिणयवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे द्विषष्टितमोऽध्यायः**

**तस्यात्मजाः सप्त पितुर्वधातुरा-**
**श्चिकीर्षवस्तस्य रणे प्रतिक्रियाम् ।**
**ध्रुवश्चरिष्णुः श्रवणो विभावसु-**
**र्नभो वसुस्वानरुणश्च सप्तः ।। १६ ।।**

'तस्यात्मजाः सप्त' इत्यत्रेदं बोध्यम् । अन्यत्रोक्तदिशा नरको मुरादीन् दिक्पालकत्वेन प्रकल्प्य स्वयं सर्वाधीश इति च कल्पयित्वा आस्ते स्म । तत्र मुरादिपञ्चानां संहारानन्तरं तेषां सप्त सप्त पुत्रा युद्धायागता इति ।।

**वरुथिनी दैत्यपतेः सुघोरान् शरान् ववर्षाच्युतमूर्ध्नि दुर्जया ।**
**कृष्णे स भौमो व्यसृजच्छतघ्नीं लोहायसीं तेन भृशं स विव्यथे ।।**

'विव्यथे' इत्यत्र चतुर्मुखस्य बहुमानसिद्ध्यर्थं तद्दत्तशतघ्न्या ताडितो व्यथामदर्शयत् । निर्णयोक्तदिशा देवी तन्मध्ये नरकं व्यायुधं विरथंचकार । नरकः पलायितवान् । भगवान् देवकीमालिङ्ग्य प्रशंसितवान् । अनन्तरं नरकः पुनर्युद्धार्थमाजगामेति द्रष्टव्यम् ।। **२४ ।।**

**नरकजयवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे त्रिषष्टितमोऽध्यायः**

**नमः पङ्कजनाभाय नमः पङ्कजमालिने ।**
**नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ।। २० ।।**

'पङ्कजनाभाय पङ्कजमालिने' इत्यत्र पङ्कजशब्दः पद्मवाची इति न प्रत्येकं वक्तव्यम् । पद्म इति चतुर्मुखस्य नाम । पद्मेति रमायाः । अत ईषद्विकृतन्यायेन पद्मश्चतुर्मुखो नाभौ यस्येति पद्मा रमैव माला अस्येति च व्युत्पत्तिः ।।।।

**भगदत्ताय दत्त्वैकं सुप्रतीकं ततोऽपरान् ।**
**पाण्डुरांश्च चतुःषष्टिं प्रेषयामास केशवः ।। ३३ ।।**

'चतुःषष्टिम्' इत्यत्र निर्णयोक्तदिशा सङ्ख्याव्यत्यासेन षट्सहस्रमिति ज्ञेयम् ।।

**नरकसंहार-शताधिकव्यष्टसाहस्रकन्यावरणवर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे चतुःषष्टितमोऽध्यायः**

**न ते जरा न वैरूप्यं कान्तेन सह विप्रियम् ।**
**भूयात् कल्याणि सुव्यक्तं मत्प्रसादात् कदाचन ।। १०।।**

'नते जरा' इत्याद्याशीर्वचमं किञ्चिद्दैत्यावेशादिति निर्णये । मत्प्रसादाति

व्याहरणादवश्यमेतदेवम् । देवक्यादय आशीर्दानं कुर्वन्त्योपि नैवमुक्ताः । अतो ज्ञायत आशीर्दानं नासुरावेशेन व्याप्तमिति ।।

**अथावरुह्य गरुडात् तस्या वचनगौरवात् ।**
**प्रविवेश वनं कृष्णः पालितं शक्रकिङ्करैः ।। १४ ।।**

'अथावरुह्य गरुडात्' इत्यादिना पतिना पत्न्याशापूरणं कर्तव्यमिति गृहस्थधर्मं बोधयतीति गुरुपादाः ।।

**इत्युक्तो देवदेवेन सत्यभामा पुनर्हरिम् ।**
**प्राह भीषयसे किं मां व्यलीकैः कंसमर्दन ।। २७ ।।**

'कंसमर्दन' इति सम्बोधनं हेतुगर्भम् । कंसमर्दनसमर्थस्य तव सङ्ग्रामो जायत इति वचनं व्यलीकं भीषणकरं चेति ।।

**इत्याकर्ण्याप्रियं शक्रो दण्डाहत इवोरगः ।**
**शचीं विलोक्य पार्श्वस्थां नामृष्यत् तत्पराभवम् ।। ३७ ।।**

'शचीं विलोक्य पार्श्वस्थाम्' इत्यनेन पत्नीपुरतः जातमवमानमसह्यमिति द्योतयति ।।

**ऐरावतं चतुर्दन्तमारुह्य वरवारणम् ।**
**गृहीतवज्रं गच्छन्तमनुजग्मुर्दिवौकसः ।। ३९ ।।**

'अनुजग्मुर्दिवौकसः' इत्यत्र केचन श्रीकृष्णसामर्थ्यं प्रकटीकर्तुं केचन दैत्यावेशेनानुजग्मुरित्याचार्या भगवत्पादाः ।।

**वैश्वानरस्तु तुरगमारुह्य दृढदंशितः ।**
**घोरां शतघ्नीमादाय स्रुवपुच्छां ययौ रणम् ।। ४० ।।**
**यमस्त्वारुह्य महिषं दण्डमादाय वीर्यवान् ।**

**मृत्युकालादिभिर्युक्तो युद्धार्थी शक्रमन्वगात् ।। ४१ ।।**

**निर्ऋतिश्च महातेजा घोरमारुह्य पौरुषम् ।**
**असिहस्तो महाबाहुर्युद्धाय प्रययौ नृप ।। ४२ ।।**

**मकरं भीषणाकारमारुह्य वरुणस्त्वरन् ।**
**पाशोद्यतकरः प्रायाद् युद्धायानुशचीपतिम् ।। ४३ ।।**

**वायुः कृष्णमृगारूढो दंशितस्तोमरायुधः ।**
**सुरेश्वरमनुप्रायाद् योद्धुं चक्रभृता सह ।। ४४ ।।**

'वायुः कृष्णमृगारूढः' इत्यनेन क्वचिदुक्तं तुरगवाहनत्वं व्याख्यातम्। तुरग इति वाहनसामान्यस्य निर्देशात् । 'वैश्वानरस्तु तुरगम्' (४०श्लो) इत्यत्राप्येवमेवानुसन्धेयम् ।।

**पारिजातहरणाख्यमहिमावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे पञ्चषष्टितमोऽध्यायः ।**

**तं मुद्गरं महाघोरमायान्तं कुरुपुङ्गव ।**
**वामेन पाणिना कृष्णो जग्राहोच्चैर्जहास च ।। १९ ।।**

'वामेन पाणिना जग्राह' इत्यत्र मम वामार्धाङ्गी सत्यभामैव तन्निवारणे शक्तेति सूचयितुं वामेन जग्राहेति गुरुपादाः । एवमेवोत्तरत्रेन्द्रप्रयुक्तवज्र-ग्रहणेऽप्यनुसन्धेयम् ।।

**तूर्णं गृहीत्वा पाणिभ्यां विषाणे तस्य नन्दिनः ।**
**सशूलपाणिं चिक्षेप वैनतेयो धनुश्शतम् ।। ४८ ।।**

'सशूलपाणिं' इत्यत्र यदि भगवदनुगृहीतवैनतेयस्यैवेदृशी शक्तिः किमु वाच्यं भगवत इति द्योत्यते ।।

दिक्पालजयवर्णनेन भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे षट्षष्टितमोऽध्यायः ।**

देवेन्द्रजयपूर्वकं पारिजातहरणस्य वर्णनेन भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे सप्तषष्टितमोऽध्यायः ।**

**दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयत् ।**
**नारदोऽकथयत् सर्वं तस्याः शङ्कितचेतसः ।। ८ ।।**

'मायावत्यै' इत्यत्र मायावती नाम रतिः कामपत्नी द्रौपद्याः पञ्चभर्तृकत्वं श्रुत्वा अपहसितवती इति ब्रह्मणा शप्ता शम्बराधीना बभूव ।। निजरूपमाच्छाद्य रूपान्तरेण तं भजति स्मेति निर्णयोक्तदिशा अवगन्तव्यम् ।।

**सा तं पतिं पद्मदलायतोक्षणं प्रलम्बबाहुं नरलोकसुन्दरम् ।**
**सव्रीडहासोत्तमविभ्रमेक्षितैः प्रीत्योपतस्थे रतिरात्मनो धनैः ।।१३।।**

आत्मनो धनैः स्वशरीराख्यधनैः ।।

**स च शम्बरमभ्येत्य संयुगाय समाह्वयत् ।**
**अवष्टभ्यौष्ठमाक्षेपैः क्षिपन् सञ्जनयन् कलिम् ।।२०।।**

'सञ्जनयन् कलिम्' इत्यत्र हरिवंशोक्तरीत्या शम्बरनिवासस्य ध्वजस्य च्छेदनेन कलहमुत्पादयन् इत्यर्थः ।।

**यं वै मुहुः पितृसरूपनिजेशभावा**
**तन्मातरो मनसिजार्द्रहृदोरुभावाः ।**
**चित्रं न तत् खलु रमास्पदबिम्बभूते**
**कामे स्मरेतेऽक्षविषये किमुतान्यनार्यः ।। ४३ ।।**

'तन्मातरः' अष्टमहिषिभ्यः अन्याः ।।

**इति श्रीमद्भागवते दशमस्कन्धे अष्टषष्टितमोऽध्यायः**

**पौण्ड्रको नाम राजा वै तस्मिन् काले कुरूद्वह ।**
**द्वारकां वृष्णिनिलयां निरुध्य बहुसैनिकः ।। १ ।।**

'तस्मिन् काले' श्रीकृष्णकैलासयात्राकाले ।।

**अपुत्रः काशिराजो वै कन्यां सुतनुसञ्ज्ञिताम् ।**
**प्रायच्छद् वसुदेवाय राज्यशुल्कां कुरूद्वह ।। ५ ।।**
**तत्र जज्ञे महाबाहुर्दिवाकरसमद्युतिः ।**
**कुमारः पौण्ड्रको नाम बलवीर्यमदान्वितः ।। ६ ।।**

पौण्ड्रको वेनः सुतनुः दितिः इति हृदयम् ।।

**त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः ।**
**इति प्रस्तोभितो बालैर्मेने स्वात्मानमच्युतम् ।। १६ ।।**

'मेने स्वात्मानम्' इत्यत्र मूढैः प्रस्तोभितत्वमात्रेण स्वानुभवविरुद्धमपि स्वात्मनोच्युतत्वं मन्यमानस्य मौढ्यमहो इति द्रष्टव्यम् ।।

**शङ्खार्यसिगदाशार्ङ्ग श्रीवत्साद्युपलक्षितम् ।**
**बिभ्राणं कौस्तुभमणिं वनमालाविभूषितम् ।। २६ ।।**

'श्रीवत्साद्युपलक्षितम्' इत्यत्र निर्णयोक्तदिशा श्रीवत्सार्थे दग्धवक्षस्त्वं द्रष्टव्यम् ।।

**प्रीतोऽविमुक्ते भगवांस्तस्मै वरमदाद् भवः ।**
**पितृहन्तुर्वधोपायं स वव्रे वरमीप्सितम् ।। ४३ ।।**

'तस्मै वरमदाद्भवः' इत्यत्र शिवेन कृष्णविरोधिवरदानमीषद्दैत्याविष्टतयेति ज्ञातव्यम् ।।

**कृत्यानलः प्रतिहतः स रथाङ्गपाणे-**
**रस्त्रौजसा नृप विभग्नमुखो निवृत्तः ।**
**वाराणसीं प्रतिसमेत्य सुदक्षिणं तं**
**सन्निर्जितं समदहत् स्वकृतोभिचारः ।। ५४ ।।**

**दग्ध्वा वाराणसीं सर्वां विष्णुचक्रं सुदर्शनम् ।**
**भूयः पार्श्वमुपातिष्ठत् कृष्णस्याक्लिष्टकर्मणः ।। ५६ ।।-**

चक्रप्रतिहतः कृत्याग्निः सुदक्षिणं समदहत् । तदनुधावच्चक्रं वाराणसीमदहदिति विवेकः ।

**पौण्ड्रकवध-काशीदहनवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकोनसप्ततितमोऽध्यायः ।**

अत्र अवतारिकायां 'तीर्थयात्रायां बहुविधं पुण्यं निमित्तमिति विजयध्वजीये । निमित्तमिति अस्पष्टमित्येक् । तन्न बुध्यामहे ।। बहुविधपुण्यार्थं तीर्थयात्रेति स्पष्टत्वात् ।।

**महत्यां तीर्थयात्रायां तत्रागुर्भारतीः प्रजाः ।**
**कृष्णः षोडशसाहस्रमहिषीशिबिकान्वितः ।। ५ ।।**

'भारतीः प्रजाः' इत्यत्र दीर्घाज्जसि च इत्यनादृतम् । एवमेव बहवः पौराणिकप्रयोगाः ।।

**भगवत्कृततीर्थयात्रावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे सप्ततितमोऽध्यायः ।**

'तच्छ्रीनिकेतचरणाब्ज' इत्यादिषु रुग्मिण्यादिवचनेषु कापि महिषी 'अहं कृष्णस्या महिषी' इति न वक्ति । किन्तु 'अहं कृष्णस्य दासी' इत्येव

वक्तीति अहो तासां विनयः । 'विनयो हि भूषयति सर्वरसम्' ।।

**यथा स्वयंवरे राज्ञि मत्स्यः पार्थेच्छया कृतः ।**
**अयं तु बहिराच्छन्नो दृश्यते स जले परम् ।। १९ ।।**

'अहं तु बहिराच्छन्नो--' इत्यत्र छिन्नेषुणा पातितव्यमित्यपि विशेषो द्रष्टव्यः ।। अत एवोत्तरे छिन्नेषुणा आपातयदिति वक्ष्यते ।।

**सज्यं कृत्वा परे वीराः प्राग्ज्योतिमगधेश्वरौ ।**
**भीमो दुर्योधनः कर्णो नविन्दंस्तदवस्थितिम् ।। २३ ।।**

'भीमो दुर्योधनः' इत्यत्र भीमो भयङ्कर इति विशेषणम् । नतु महाभागवत ाधर्मनिरतभिमसेननामकीर्तनम् ।। भीमस्तु कृष्णभागम् इत्यवेत्य द्रष्टुं वा स्प्रश्टुं वा धनुर्नैच्छत् । पार्थस्तु स्वसामर्थ्यमाविष्कृत्य नाच्छिनदिति भागवतत्वेपि विशेषः अनयोर्द्रष्टव्यं निर्णयोक्त्यनुसारेण ।।

**श्रीकृष्णमहिषीकृतस्वस्वविवाहवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकसप्ततितमोऽध्यायः ।**

**यस्यात्मबुद्धिः कुणपे त्रिधातुके**
**स्वधीः कलत्रादिषु भौम इज्यधीः ।**
**यत्तीर्थबुद्धिश्च जले न कर्हिचित्**
**जनेष्वभिज्ञेषु स एव गोखरः ।। १३ ।।**

गोखरः अस्थिभक्षकः प्राणिविशेषः । अपभ्रष्टभाषायां 'कत्ते किरुब' इति सञ्ज्ञकः ।।

**चिरं विमृश्य मुनय ईश्वरस्येशितव्यताम् ।**
**जनसङ्गह इत्यूचुः स्मयन्तस्तं जगद्गुरुम् ।। १५ ।।**

'जनसङ्गह' इत्यस्य व्याख्या 'उन्मत्तप्रवृत्तिरिवाचारलक्षणः' इति विजयध्वजीये । तत्रोदिति उत्तमवाचि । 'यद्यदाचरति श्रेष्ठः' इति गीतोक्तेः ।

**तं क्लेशकर्मपरिपाकगुणप्रवाहै-**
**रव्याहतानुभवमीश्वरमद्वितीयम् ।**
**प्राणादिभिः स्वविषयैरुपगूढमज्ञो**
**मेने स सूर्यमिव मेघहिमोपरागैः ।। ३१ ।।**

'सूर्यमिव मेघहिमोपरागैः' इत्यत्र मेघादयोधिकमधिकं सूर्यमाच्छादयन्ति । एवमज्ञानामपि सात्विकादित्रयाणामज्ञानं भगवन्तमधिकमधिकमाच्छादयतीति द्रष्टव्यम् । 'धूमेनाव्रियते वह्निः' इति श्लोके तथा व्याख्यातत्वात् ।।

**श्रीकृष्णब्रह्मण्यतावर्णनेन भगवद्भक्तिसाधनऋणत्रयमोचनविधान-वर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे द्विसप्ततितमोऽध्यायः**

**भगवदनुगृहीतवसुदेवयज्ञवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे त्रिसप्ततितमोऽध्यायः**

**केचनोद्बद्धवैरेण भक्ताः केचन कामतः ।**
**न तथा सत्वसंरब्धाः सन्निकृष्टाः सुरादयः ।। ४३ ।।**

'न तथा सत्वसंरब्धा' इत्यत्र सप्तमतात्पर्योक्तदिशा वैरभक्ता यथा निरन्तरचिन्तनयुक्ता न तथा केवलभक्ता सुरादय ति द्रष्टव्यम् ।।

**तेनासुरीमगुर्योनिममुनाऽवद्यकर्मणा ।**
**हिरण्यकशिपोः शापात् पुत्रास्ते योगमायया ।। ४८ ।।**

'हिरण्यकशिपोः शापात्' इत्यत्र स्वंविहाय ब्रह्मणो वरं लब्धवन्त इति हिरण्यकशिपुराजे कालनेमिसुतत्वेन जातान् मरीचिपुत्रान् हिरण्यकशिपुः

शशापेत्यवगन्तव्यम् । ब्रह्मणः अवध्यत्वं लब्धम् । स्वपित्रैव हता भवेतेति हिरण्यकशिपुः शप्तवान् । तदुभयघटनाय दुर्गा तद्देहतः अनुवत्सरमेकमेकमिति क्रमेणाकृष्य देहं रक्षित्वा जीवं देवकीगर्भे प्रवेश्य पुत्रे जाते कालनेमिस्वरूपेण कंसेन हते पुनस्तद्देह एव प्रावेशयत् इत्यपि द्रष्टव्यम् ।।

**पीत्वाऽमृतं पयस्तस्या पीतशेषं गदाभृतः ।**
**नारायणाङ्गसंस्पर्शप्रतिलब्धात्मदर्शनाः ।। ५५ ।।**

'पीतशेषं गदाभृतः' इत्यत्र 'कृद्योगे षष्ठी' इति विजयध्वजीये । अनेन कर्तरि षष्ठी । साच कृद्योगलक्षणेत्युक्तं भवति ।।

**वसुदेवकृतस्तोत्रेण चिरमृतपुत्रानयमहिमावर्णनेन च भगवन्निष्ठत्वम्।**

**इति श्रीमद्भागवते दशमस्कन्धे चतुःसप्ततितमोऽध्यायः**

**राजोवाच—**

**सर्वासां महिषीणां तु गोविन्दासक्तचेतसाम् ।**
**मय्येव प्रेमवान् विष्णुरिति निश्चितचेतसाम् ।। १ ।।**

'महिषीणां तु सर्वासां' इत्यत्र भैष्मीसत्ये समे । तदनन्तरं षण्महिष्यः । तत्रापि जाम्बवती वरा । रमावेशविशेषे बलभद्रसमाना । ततः अवरा शताधिकषोडशसहस्रमहिष्यः । तत्रापि कशेरुर्वरा इति निर्णयोक्तप्रकारेण तारतम्यमनुसन्धेयम् ।।

**तां रुग्मिणीं श्रियमनन्यगतिं निरीक्ष्य**
**या लीलया धृततनोरनुरूपरूपा ।**
**प्रीतः स्मयन्नलककुण्डलनिष्ककण्ठ-**
**वक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ।। १३ ।।**

'श्रियमनन्यगतिम्' इति विशेषणद्वयेन भगवद्वचनं लोकविडम्बनमिति द्योतयति ।। अत एव तद्दर्षघ्न इति वक्ष्यमाणं तथोन्नेयम् ।। देव्या भयप्रदर्शनं स्त्रिया भेतव्यमिति धर्मदर्शनाय । भगवता सान्त्वनं पत्न्या व्याधितायं पत्या सान्त्वनं कार्यमिति धर्मदर्शनार्थमिति निर्णयोक्तमनुसन्धेयम् ।।

**रुग्मिण्युवाच—**

**नन्वेतदेवमरविन्दविलोचनाह**
**यद् वै भवान् न भवतः सदृशो विभूम्नः ।**
**क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः**
**क्वाहं गुणप्रकृतिरन्यगृहीतपादा ।। ३८ ।।**

'क्व स्वे महिम्न्यभिरतो भगवान्' इत्यादि सर्वत्र सरसभारतीविलासप्रदर्शित ाकृष्णवचनानुकूल्यमनुसन्धेयम् ।। विस्तरभिया नेहोच्यते ।।

**नैवालीकं भवत्येव वचस्ते मधुसूदन ।**
**अम्बाया इव हि प्रायः कन्यावादरतिः क्वचित् ।। ५१ ।।**

'अम्बाया अव हि प्रायः' इत्यत्र कन्यादानसमये यथा मातुर्वचनं नालीकं भवति, अलीकवचने पुत्र्या उत्तरत्र क्लेशो भवतीति मन्यमानायास्तथा तव वचनं नैवालीकं भवतीत्यर्थः ।।

**तथान्यासामपि स्त्रीणां गृहेषु गृहवानिव ।**
**आस्थितो गृहमेधीयान् धर्मांल्लोकगुरुर्जुषन् ।। ६३ ।।**

'तथा अन्यासामपि स्त्रीणाम्' इत्यनेनेदं सूचयति । एकस्मिन् दिवसे रुग्मिण्या सह कृतस्य प्रेमकलहस्य वर्णनमकारि । श्रीकृष्णस्याष्टोत्तरशताधिक षोडशसहस्रमहिष्य आसन् । श्रीकृष्णस्य गृहस्थधर्मानुचरणमशीत्यधिकतिपय समेषु । अतः श्रीकृष्णाचरितक्ष्वेलनलीला वर्णयितुमशक्येति ।।

रुग्मिणीकृष्णप्रेमकलहवर्णनेन भगवन्निष्ठत्वम् ॥

**इति श्रीमद्भागवते दशमस्कन्धे पञ्चसप्ततितमोऽध्यायः**

**श्रीशुक उवाच—**

**यद्यप्यनुस्मरन् वैरं रुग्मी कृष्णावमानितः ।**
**व्यतरद् भागिनेयाय सुतां कुर्वन् स्वसुः प्रियम् ॥ २२ ॥**

'यद्यप्यनुस्मरन्' इत्यादि । भागिनेयाय पुत्रीदाने स्वसुः प्रियाचरणं न मुख्यकारणं किन्तु धनुर्लोभ एवेति द्रष्टव्यम् ॥

**तदाऽब्रवीन्नभोवाणी बलेनैव जितो ग्लहः ।**
**धर्मतो वचनेनैव रुग्मी वदति वै मृषा ॥ ४४ ॥**

'तदाऽब्रवीन्नभो वाणी' इत्यत्र दुष्टहननार्थमेवाशरीर उवाचेति द्रष्टव्यम् ॥ अन्यथा कतरस्मिन् जिते कोस्य लाभो वचनेन ॥

श्वेतकेशाविष्टबलेन रुग्मिवधस्य वर्णनेन भगवन्निष्ठत्वम् ॥

**इति श्रीमद्भागवते दशमस्कन्धे षट्सप्ततितमोऽध्यायः**

नारददृष्टबहुरूपकृष्णवैभववर्णनेन भगवन्निष्ठत्वम् ॥

**इति श्रीमद्भागवते दशमस्कन्धे सप्तसप्ततितमोऽध्यायः**

**एक परं ज्योतिरनन्यमद्वयं**
**स्वसंस्थया नित्यनिरस्तकल्मषम् ।**
**ब्रह्माख्यमस्योद्भवनादिहेतुभिः**
**स्वलक्षणैर्लक्षितभावनिर्वृतिम् ॥ ५ ॥**

'स्वलक्षणैः' इत्यनेनोपलक्षणत्वं निवारयति ॥

**अथाप्लुतोऽम्भस्यमले यथाविधि**
**क्रियाकलापं परिधाय वाससी ।**
**चकार सन्ध्योपगमादि सत्तमो**
**हुतानलो ब्रह्म जजाप वाग्यतः ।। ६ ।।**

'हुतानलो ब्रह्म जजाप' इत्यनेन श्रीकृष्णस्यानुदितहोमित्वमत एव माध्यन्दिनायत्वमुक्तं भवति ।।

**कालो भवान् जगदिदं कलयाऽवतीर्णः**
**सद्रक्षणाय खलनिग्रहणाय चान्यत् ।**
**कश्चित् त्वदीयमतियाति निदेशमीश**
**किं वा जनः सुकृतमृच्छति तन्न विद्मः ।।२७।।**

'कश्चित् त्वदीयमतियाति' इति वाक्यद्वयस्याभिप्रायो विजयध्वजीये 'एकः सुखच्छेदकं लोकम् एकः सुखकरं गचछतीति भगवात् वेत्तीति वाक्यार्थ' इत्युद्घाटितः । तत्र मूलस्‍ सुकृतशब्दस्य कृतिच्छेदने , डु कृञ् करणे इति धातुद्वयनिष्पन्नत्वं स्वीकृत्य सुखच्छेदकरं सुखकरमिति द्वेधा व्याख्यातम् । अतियातीत्यत्र अतीत्यस्य आधिक्यार्थमतिक्रमार्थं चादाय अतिक्रमन् लोकः सुखच्छेदकरं लोकम्, आधिक्येनानुसरन् सुखकरममृच्छतीति व्याख्यातम् ।। तन्न विद्म इत्यस्याभिप्रायो भगवान् वेत्ति इति।।

**राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः ।**
**बिभ्रत् पिङ्गजटाभारं प्रादुरासीद् यथा रविः ।। ३२ ।।**

'देवर्षिः परमद्युतिः' इत्यनेनात्र धर्मराजात् कश्चन दूत आगत इत्येतद्विशदीकृतं भवति ।।

**यक्ष्यति त्वां मखेन्द्रेण राजसूयेन पाण्डवः ।**
**नृपतिः पारमेष्ठ्येन तद् भवाननुमोदताम् ।। ४२ ।।**

'मखेन्द्रेण' क्रतूत्तमेन ।।

**श्रीकृष्णाह्निकवर्णनेन भगवत्प्रेष्ठ-जरासन्धजयपूर्वकराजसूयोपक्रमवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे अष्टसप्ततितमोऽध्यायः**

**अस्माकं च महानर्थो ह्येतेनैव भविष्यति ।**
**यशश्च तव गोविन्द राज्ञो बन्धाद् विमुच्यतः ।। ४ ।।**

'महानर्थो-- भविष्यति' इत्यत्र राजसूययागनिष्पत्तिः, राज्ञां मोचनम्, पूर्वशत्रुवधः, वैष्णवमतस्थापनं चेति महाप्रयोजनं भवतीत्यर्थः ।।

**द्वैरथे स तु जेतव्यो न शताक्षौहिणीयुतः ।**
**ब्रह्मण्योऽभ्यर्थितो विप्रैर्न प्रत्याख्याति कर्हिचित् ।। ६ ।।**

'द्वैरथे स तु' इत्यत्र द्वन्द्वयुद्धे प्रतियोद्धृत्वेन स्थितो न पलायते हन्तव्यो भवति । सेनामध्यगस्तु पलायते जीवनाकाङ्क्षी । अतो हन्तव्यो भवतीत्यभिप्रायः ।।

**ब्रह्मवेषधरो भूत्वा तं भिक्षेत वृकोदरः ।**
**हनिष्यति न सन्देहो द्वैरथे तव सन्निधौ ।। ७ ।।**

'वृकोदरः' इत्यत्र वृकस्योदरमिवोदरं यस्येति केनचित्प्रलपितमसहमनैः श्रीमद्विजयध्वजश्रीमच्चरणैः वृकोदरनामनिर्वचनं सप्रमाणकं कृतमिति द्रष्टव्यम्।।

**श्रीकृष्णस्य बन्धुकृत्यवर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे एकोनाशीतितमोऽध्यायः**

**श्रुत्वाऽजितं जरासन्धं नृपतेर्ध्यायतो हरिः ।**
**आहोपायं तमेवाद्य उद्धवो यमुवाच ह ।। १५ ।।**

'श्रुत्वाऽजितं जरासन्धम्' इत्यत्र निर्णयोक्तदिशा प्रथमं जरासन्ध-वधः,अनन्तरं दिग्विजय इति द्रष्टव्यम् ।

**न त्वया भीरुणा योत्स्ये युधि विक्लवचेतसा ।**
**मधुरां स्वां पुरीं त्यक्त्वा समुद्रं शरणं गतः ।। ३१ ।।**

'न त्वया भीरुणा योत्स्ये' इति श्रीकृष्णः स्वं संहरिष्यतीति स्वयं भीरुणा जरासन्धेनोदितम् ।।

**अयं तु वयसाऽतुल्यो नातिसत्वो न मे समः ।**
**अर्जुनो नो भवेद् योद्धा भीमस्तुल्यबलो मम ।। ३२ ।।**

'अयं तु वयसाऽतुल्य' इत्यादिना अधिक्षेपेप्यर्जुनस्तर्हि परीक्षाव इति नोक्तवान् नियमेन जयं नेक्षमाणः । तादृशं जरासन्धं हत्वा भीमसेननस्य मह ाकीर्तिर्भवेदित्येवार्जुनं कृष्णो नीतवानिति द्रष्टव्यम् ।।

भीमस्तुल्यो ममेत्याभिमानिकं वचनं स्याद्वेति चिन्तनेन ।।

**एकं पादं पदाऽऽक्रम्य दोर्भ्यामन्यं प्रगृह्य सः ।**
**गुदतः पाटयामास शाखामिव मतङ्गजः ।। ४३ ।।**

'गुदतः पाटयामास' इत्यनेन मर्मण्येव न हन्तव्य इति चिन्तयता भीमसेननामर्मणि पाटयित्वा हत इत्युक्तं भवति ।।

**राजसूयाश्वमेधादपि भगवत्प्रियस्य शैवाग्रणीजरासन्धवधस्य वर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे इत्यशीतितमोऽध्यायः**

**कृष्णाय वासुदेवाय हरये परमात्मने ।**
**प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ।। १६ ।।**

'प्रणतक्लेशनाशाय' इति स्वानुभवारूढस्तवनम् ।।

**राजमोचनमाहात्म्यवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकाशीतितमोऽध्यायः ।**

**नाध्यगच्छन्ननैकान्त्यात् सहदेवस्तदाऽब्रवीत् ।**
**अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान् सात्वतां पतिः।। १९ ।।**

'सहदेवस्तदाऽब्रवीत्' इत्यत्र सहदेवो भीष्मः । देवव्रतनाम्नि देवशब्दसाहित्यस्य विद्यमानत्वात् । अथवा पुरुषव्यत्यासेन भीष्म एव सहदेव इत्युक्तः । अवश्यमेवं द्रष्टव्यम् । भगवत्पादाचार्यैः भीष्मस्यैव पृष्टत्वे हेतूनामनेकेषां वर्णनात् ।। अत्र सहदेवेत्युक्तत्वात् तदुत्रत्रैतदनुसारेणानुजेरितान् इत्युक्तम् ।।

'अर्हति ह्यच्युतः श्रैष्ट्यम्' इत्यत्र सत्सु रामकृष्णवेदव्यासेषु कृष्णस्यैवाग्रपूजार्हत्ववचनस्य हेतवो निर्णयोक्ताअनुसन्धेयाः । विस्तरभिया नेहोच्यन्ते ।।

**एवमादीन्यभद्राणि बभाषे नष्टमङ्गलः ।**
**नोवाच किञ्चिद् भगवान् यथा सिंहः शिवारुतम् ।। ३९ ।।**

'एवमादीन्यभद्राणि' इत्यनेन गोहन्ता स्त्रीहन्तेत्यादि भारतोक्तं गृह्यते । अभद्राणि अमङ्गलकराणि दूषयितुः ।।

**ततः पाण्डुसुताः क्रुद्धा मत्स्यकैकेयसृञ्जयाः ।**
**उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ।। ४२ ।।**

'ततः पाण्डुसुताः' इत्यत्र भीमसेनो जिह्वामुत्पाटयितुमुद्युक्तो भीष्मवचनेन

नववृत इत्यपि द्रष्टव्यम् ।।

**अग्रपूजामहोत्सवपूर्वकशिशुपालवधवर्णनेन भगवन्निष्ठत्वम्**

**इति श्रीमद्भागवते दशमस्कन्धे व्यशीतितमोऽध्यायः ।**

**भगवद्भक्ताग्रेसरधरक्मराजकृतराजसूयावभृथादिवर्णनेन भगवन्निष्ठत्वम् ।**

**एकदाऽन्तःपुरे तस्य वीक्ष्य दुर्योधनः श्रियम् ।**
**अतप्यद् राजसूयस्य महित्वं चाच्युतात्मनः ।। ३१ ।।**

'अतप्यद् राजसूयस्य' इत्युक्तत्वादवश्यमेतदेवम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे त्र्यशीतितमोऽध्यायः ।**

**पूजयित्वा ऋषिं सम्यक् सूनृतैर्गीर्भिरच्युतः ।**
**चिराभिलषितः सोऽपि प्राप्तः साध्वित्यचिन्तयत् ।। २८ ।।**

'चिराभिलषितः' इत्यत्र परशुरामरूपेणाहत्वा कृष्णरूपेणायं हन्तव्य इति भगवत्सङ्कल्पस्यविद्यमानत्वात् चिरकालात् अपेक्षित इत्यर्थः ।।

**कृष्णदृिट्पातवर्णनेन नारदवचनेन निराकुलत्वरूपमाहात्म्य-वर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे चतुरशीतितमोऽध्यायः ।**

**भगवत्पुत्रप्रद्युम्नपराक्रमवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे पञ्चाशीतितमोऽध्यायः ।**

**श्रीकृष्णविज्ञानवर्णनेन साल्वपराजयवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे षडशीतितमोऽध्यायः**

**यावन्त्यः सिकता भूमेर्यावन्त्यो दिवि तारकाः ।**
**यावन्त्यो वर्षधाराश्च तावतीरददां स्म गाः ।। २९ ।।**

'यावत्यः सिकता' इत्यत्र भूस्थितसिकतसङ्ख्यानां गवां भुवि स्थितिः कथमिति चोद्यं तावद्गोदानं नाम तावद्गोदानफलकतन्न्यूनसङ्ख्याकगोदानमिति व्यत्यासेन परिहर्तव्यम् ।।

**इक्ष्वाकुतनयो नृगो श्रीकृष्णावतारपर्यन्तं कृकलासो बभूवेत्यहो ब्रह्मस्वापहारस्य तीव्रता । नहुषशापेप्येवमेव द्रष्टव्यम् ।।**

**वनस्थपाण्डवसमाधानकरणेन नृगमोक्षणेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे सप्ताशीतितमोऽध्यायः ।**

तत्रामृतं पीतवतोर्मैन्दविविदयोर्वधः श्रीकृष्णदत्तवरेण साध्योऽभूदिति द्रष्टव्यम् ।।

**इतः परं शुक्लकेशाविष्ठबलभद्रमहिमावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते अष्टाशीतितम-एकोननवतितम-नवतितमाध्यायाः ।**

भगवान् श्रुतदेव-बहुलाश्वयोरुभयोरप्यनुग्रहं कृतवान् । ऐश्वर्यस्य भगवत्तोषकरत्वे बहुलाश्वस्यैवान्वग्रहीष्यत् । जातेस्तोषकरत्वे श्रुतदेवस्यैव । नैवमथो भक्तेरेव तोषकरत्वमिति तात्पर्यम् ।।

**एवं भक्तप्रियत्वाख्यमहिमावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे एकनवतितमोऽध्यायः**

राजोवाच

देवासुरमनुष्येषु ये भजन्त्यशिवं शिवम् ।

**प्रायस्ते धनिनो ब्रह्मन् न तु लक्ष्मीपतिं हरिम् ।। १ ।।**

**एतद् वेदितुमिच्छामि सन्देहोऽत्र महान् हि नः ।**
**विरुद्धशीलयोः प्रभ्वोर्विरुद्धां भजतोर्गतिम् ।। २ ।।**

**श्रीशुक उवाच**

**शिवः शक्तियुतः शश्वत् त्रिलिङ्गो गुणसंवृतः ।**
**वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ।। ३ ।।**

**ततो विकारा अभवन् षोडशामीषु पञ्चसु ।**
**उपाधावन् विभूतीनां सर्वासामश्नुते फलम् ।। ४ ।।**

**हरिस्तु निर्गुणः साक्षात् पुरुषः प्रकृतेः परः ।**
**स सर्वदृगुपद्रष्टा तं भजन् निर्गुणो भवेत् ।। ५ ।।**

'देवासुरमनुष्येषु' इत्यादिना राजकृतप्रश्नस्य 'शिवस्त्रिगुणबद्धत्वात् त्रिगुणात्मकः वैषयिकफलानि ददाति । हरिस्तु निर्गुणत्वात् निर्गुणमोक्षफलं ददाति' इति परिहारः ।।

**अजानन्तः प्रतिविधिं तूष्णीमासन् सुरेश्वराः ।**
**ततो वैकुण्ठमगमद् भास्वरं तमसः परम् ।। २५ ।।**

'ततो वैकुण्ठम्' इत्यत्र वृकासुरः कतं योगिमात्रप्राप्यवैकुण्ठं गतवानिति शङ्का वैकुण्ठशब्देन यत्किचिद् भूवैकुण्ठं गृह्येत इति परिहर्तव्या । तर्हि भास्वरं तमसः परम् इत्यादि कथमिति चेत् 'वैकुण्ठम्' इत्युक्त्वा वस्तुतो वैकुण्ठस्य लक्षणं वर्णितम् । एवमविवेकेन वर्णनं शतरीतीनां मध्ये एका ।।

**वृकासुराच्छिवमोक्षणाख्यमहिमावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे द्विनवतितमोऽध्यायः**

**श्रीशुक उवाच—**

**सरस्वत्यास्तटे राजन् ऋषयः सत्रमासत ।**
**वितर्कः समभूत् तेषां त्रिष्वधीशेषु को महान् ।। १ ।।**

**सरस्वत्याः नद्याः । गङ्गायाः इति भविष्यत्पुराणोक्तेः ।।**

**तं निशम्याथ मुनयो विस्मिता मुक्तसंशयाः ।**
**भूयांसं श्रद्दधुर्विष्णुं यतः शान्तिर्यतोऽभयम् ।। १६ ।।**

'भूयांसं श्रद्दधुः' इत्यत्र ब्रह्मा चुक्रोध किन्तु क्रोधमशीशमत् । शिवः प्रहर्तुमेवागतः । विष्णुस्तु कृतापराधमपि सान्त्वयामासेति अहोविष्णोः ब्रह्मण्यता भक्तापराधसहिष्णुता सुजनता कृपालुतेति भगवन्तं सर्वोत्तमं विशेषतः श्रद्दधुः इत्यर्थः ।।

**विष्णुसर्वोत्तमत्वनिर्णयेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे त्रिनवतितमोऽध्यायः ।**

**तत्राप्ययमभूत् प्रश्नस्त्वं मां यदनुपृच्छसि ।**
**तुल्यव्रततपःशीलास्तुल्यस्वीयारिमध्यमाः ।। ११ ।।**

'तुल्यव्रतपःशीलाः' इत्यत्र सनत्कुमारः कामवतारत्वादधिक इति द्रष्टव्यम् ।। अन्ये तुल्याः ।।

**अनेकभगवद्गुणवर्णनात्मकश्रुतिगीतावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे चतुर्नवतितमोऽध्यायः ।**

**अक्षौहिण्या विराटोऽपि मत्स्यराजो महामनाः ।**
**युधिष्ठिरमनु प्रायात् सपुत्रः कुरुसत्तम ।। ९ ।।**

**द्रुपदश्च शिखण्डी च धृष्टद्युम्नश्च दुर्जयः ।**
**अक्षौहिणीभिस्तिसृभिरनुजग्मुर्युधिष्ठिरम् ।। १० ।।**

**अक्षौहिण्या परिवृतः सात्यकिर्युद्धलालसः ।**
**नियोगाद् वासुदेवस्य प्रायादनु युधिष्ठिरम् ।। ११ ।।**

**अक्षौहिण्या परिवृताः कैकेयाः पञ्च भूभृतः ।**
**अनुजग्मुर्धर्मपुत्रं राजानं मातृसोदराः ।। १२ ।।**

**धृष्टकेतुस्तदा राजा शैब्यश्च नरपुङ्गवः ।। १३ ।।**

**अन्वयातां नृपश्रेष्ठावक्षौहिण्या युधिष्ठिरम् ।**
**ते गत्वा पाण्डवाः सर्वे नारायणपुरोगमाः ।। १४ ।।**

'अक्षौहिण्या विराटोपि' इत्यादि । विराटस्य १ अक्षौहिणी । द्रुपद-शिखण्डि-धृष्टद्युम्नानां प्रत्येकं १ अक्षौहिणी इति ३ अक्षौहिणअयः । सात्यकेः १ अक्षौहिणी, कैकयानां १अक्षौहिणी । धृष्टकेतुशैब्ययोर्मिलता १ अक्षौहि इत्येवं पाण्यवानां ७ अक्षौहिण्य इति विवेकः ।।

**तस्यां निशायां गोविन्दस्त्वारुह्य गरुडं हरिः ।**
**सुप्तमर्जुनमादाय कैलासमभिजग्मिवान् ।। ३१ ।।**

'सुप्तमर्जुनमादाय' इत्यत्रेदं बोद्धव्यम् । निरंशानां चिच्छरीरमचिन्त्यशक्त्या विभज्य भगवान् स्वशरीर एव स्वप्नस्थाने वासनामयशरीरे प्रवेश्य सञ्चारयति । सांशांस्तु जीवान् बहिरपि नयतीति ।।

**भगवत्कारितमहाभारतयुद्धवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे पञ्चनवतितमोऽध्यायः**

**कस्मादसाविमान् विप्रानध्यास्ते प्रतिलोमजः ।**
**धर्मपालांस्तथैवास्मान् वधमर्हति दुर्मदः ।। १३ ।।**

'प्रतिलोमज' इत्यत्रैवं साम्प्रदायिका वदन्ति । 'ब्राह्मण्या क्षत्रियात् सूतः' इत्युक्तेः सूतः प्रतिलोमजो भवति । 'रोमाश्वात् रोमहर्षणः' इत्युक्तेःसरोमहर्षणो व्यासपुत्रः । ब्राह्मणस्य व्यासमुनेः क्षत्रियस्थानाद् भुजाज्जातत्वात् अस्य सूतत्वमिति ।।

**अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनन्दन ।**
**आयुश्चास्याक्षयं तावद् यावत् सत्रं समाप्यते ।। १९ ।।**

ब्रह्मासनं पुराणवक्तृयोग्यब्राह्मणासनम् । ब्रह्मासने स्थितस्य बधादेव ब्रह्महत्या ।।

**शुक्लकेशावेशिनो बलभद्रस्य चरितं कृष्णचरित एवान्तर्भवतीति भगवन्निष्ठत्वम् ।।। एवमेवोत्तराध्यायेपि ।।**

**इति श्रीमद्भागवते दशमस्कन्धे षण्णवतितमोऽध्यायः**

**सस्मार मुसलं रामः परसैन्यविमर्दनम् ।**
**हलं च दैत्यदमनं तौ तूर्णमुपतस्थतुः ।। ४ ।।**

'सस्मार मुसलं रामः' इत्यत्र रामस्तीर्थयात्रार्थं गतो विना आयुधेन । इदानीं प्रसक्तदुष्टनिधनार्थमायुधं सस्मारेति द्रष्टव्यम् ।।

**गोमतीं गण्डकीं स्नात्वा विपाशां शोणमाप्लुतः ।**
**गयां गत्वा पितॄनिष्ट्वा गङ्गासागरसङ्गमम् ।। ११ ।।**

'गयां गत्वा पितॄनिष्ट्वा' इत्यत्र जीवत्पितृकस्य तीर्थयात्रायां गयाप्राप्तौ पिता येभ्यो ददाति तेभ्यो दद्यात् इति विधेः पितृयज्ञाधिकार इति द्रष्टव्यम् ।

अत एव गयागमन एव पितृयज्ञो वर्णितः ।।

तत्र विरोधोद्धारे रामेण गयाश्राद्धं नानुष्ठितं किन्तु साकमेधन्तर्गतः पितृयज्ञः अनुष्ठित इत्युक्त्वा रामस्याहिताग्नित्वमाक्षिप्य यत्समाधानमुक्तं कृष्णस्याहिताग्नित्वेन तज्ज्येष्ठस्यार्थादाहिताग्नित्वं गम्यते, अन्यथा कृष्णस्य परिवेत्तृत्वापत्तेरिति तन्न बुध्यामहे । रामकृष्णयोर्भिन्नोदरत्वेन परिवेत्तृत्वशङ्काया अनुत्पत्तेः । रामो रेवतीसहितस्तीर्थयात्रां जगामेत्यत्र प्रमाणानुपलब्धेः पत्नीसाहित्याभावे चातुर्मास्यानुष्ठानानुपपत्तेश्च ।।

किञ्च जीवति वासुदेवे कथं कृष्णस्याप्याहिताग्नित्वम् । नहि पितरि जीवति पुत्रस्याग्न्याधानं विहितम् । तर्हि कृष्णस्यैकाहाश्वमेधानुष्ठानं कथमिति चेत् वसुदेवाहिताग्नावेवेति ब्रूमः । पित्राज्ञया पित्राहिताग्नौ क्रत्वनुष्ठानसम्भवात् ।। यथा अर्जुनो वसुदेवदेहमश्वमेधाग्नौ ददाह तथा कृष्णेन त्यक्तत्वेन प्रदर्शितदेहमश्वमेधाग्नौ ददाहेति प्रमाणानुपलब्धेः ।।।

**कामकोष्ठीं पुरीं काञ्चीं कावेरीं च सरिद्वराम् ।**
**श्रीरङ्गाख्यं महापुण्यं यत्र सन्निहितो हरिः ।। १४ ।।**

'कामकोष्ठीम्' इत्यत्र पूर्वं कामकोष्ठी पुण्यस्थलमासीत् । इदानीं मायिजुष्टत्वेन मध्वानुगैर्निषिद्धा शृङ्गगिरिवदिति ध्येयम् ।।

**ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मधुरां तथा ।**
**समुद्रसेतुमगमन्महापातकनाशनम् ।। १५ ।।**

'ऋषभाद्रिं' वृषभशैलम् । 'यस्यान्तकोपि' इति तीर्थप्रबन्धे वर्णितम् ।

**युवां तुल्यबलौ वीरौ हे राजन् हे वृकोदर ।**
**एकं प्राणाधिकं मन्य उतैकं शिक्षयाऽधिकम् ।। २७ ।।**

'युवां तुल्यबलौ' इत्यत्र भीमसेनमधिकं जानन्नपि बलरामो स्वशिष्ययोर्युद्धनिवर्तनेच्छया तथोक्तवानिति मन्यामहे ।।

**इति श्रीमद्भागवते दशमस्कन्धे सप्तनवतितमोऽध्यायः ।**

**महाभारतयुद्धशेषवर्णनेन श्रीकृष्णब्रह्मण्यतावर्णनेन च भगवन्निष्ठत्वम् ।। एवमुत्तरत्रापि ज्ञातव्यम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे अष्टनवतितम-एकोनशततमाध्यायौ ।**

**तदाकर्ण्यार्जुनः प्राह स्मयमान इव द्विजम् ।**
**किं ब्राह्मण त्वन्निवासे इह नास्ति धनुर्धरः ।।**

**राजन्यबन्धोरेते वै ब्राह्मणाः सत्रमासते ।। २२ ।।**

'राजन्यबन्धोः' इत्यत्र कृष्णस्येति विशेषणं प्रकरणाल्लब्धम् । एवं चार्जुनस्येषद्दैत्यावेशवशादीदृशशब्दप्रयोग इति द्रष्टव्यम् ।। तत्परिहारार्थमेव भक्तवत्सलस्य कृष्णस्योद्योगः ।।

**सप्तद्वीपान् सप्तसिन्धून् सप्तसप्तगिरीनथ ।**
**लोकालोकं तथाऽतीत्य विवेश सुमहत् तमः ।। ५५ ।।**

सुमहत् तमः अन्धन्तमो यत्र हरिद्विषः पतन्ति । श्रीकृष्णसाहित्यादेवार्जुनस्य तत्तरणसामर्थ्यमिति बोध्यम् ।।

'तमः सुघोरं विदारयत्' इत्यनेन तमसो द्रव्यत्वं सिद्धमति तर्कताण्डवाचार्याः ।।

**एकाहाश्वमेधे ब्राह्मणपुत्रदानाख्यमहिम्नो वर्णनात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे शततमोऽध्यायः ।**

**दन्तवक्रोऽरुणन्मूढो मृगेन्द्रं जम्बुको यथा ।**

**रुग्मिणः शिशुपालस्य पौण्ड्रकस्य च दुर्मतेः ।**
**परलोकगतानां च कुर्वन् पारोक्ष्यसौहृदम् ।। ५ ।।**

'दन्तवक्त्रोऽरुणन्मूढः' इत्यत्र यद्यपि शिशुपालवधानन्तरं दन्तवक्त्रवधः प्रतीयते । ।अथापि निर्णयोक्तदिशा दन्तवक्त्रवध एव पूर्वं शिशुपालवधः अनन्तरमिति द्रष्टव्यम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे एकोत्तरशततमोऽध्यायः ।**

**रेमे षोडशसाहस्रपत्नीनामेकवल्लभः ।**
**तावन्ति बिभ्रद् रूपाणि तद्गेहेषु महर्द्धिषु ।। ५ ।।**

'षोडशस्त्रीविहारश्च' इत्यनुक्रमणिकोक्तमहिमावर्णनेन भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते दशमस्कन्धे व्यधिकशततमोऽध्यायः ।**

**तेषामुद्दामवीर्याणामष्टादश महारथाः ।**
**आसन्नुदारयशसस्तेषां नामानि मे शृणु ।। १८ ।।**

**प्रद्युम्नश्चारुदेष्णश्च दीप्तिमान् भानुरेव च ।**
**साम्बो मित्रबृहद्भानुर्भानुविन्दो वृकोऽरुणः ।। १९ ।।**

'प्रद्युम्नश्चारुदेष्णश्च' इत्युक्ताष्टादशस्वपि चत्वारः श्रेष्ठाः । रुग्मिणीतनयः प्रद्युम्नः कामांशः ।जाम्बवतीपुत्रः साम्बोपि कामांशः, रुग्मिणीसुनुश्चारुदेष्णो गणपत्यंशः, सत्यभामासुतो भानुस्सवितांश इति । सवितैवान्यत्र पर्जन्य इत्युक्तः ।।

**यो ह्यात्मा जगदादिमध्यनिधनो योऽव्यक्तजीवेश्वरो**

**यः सृष्ट्वेदमनुप्रविष्ट ऋषिणा चक्रे पुनः संहिताम् ।**
**यं सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं यथा**
**तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ।। ३९ ।।**

अव्यक्तजीवेश्वरः लक्ष्मीप्राणनाथः । प्रकृतिपरुषस्वामी ।

**श्रीकृष्णसन्तत्यादिवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते दशमस्कन्धे त्र्यधिकशततमोऽध्यायः ।**

**।। इति श्रीमद्भागवते दशमस्कन्धः समाप्तः ।।**

# अथ एकादशस्कन्धः

## प्रथमोऽध्यायः

**भूभारराजपृतना यदुभिर्निरस्य**
**गुप्तैः स्वबाहुभिरचिन्तयदप्रमेयः ।**
**मन्येऽवनेर्ननु गतोऽप्यगतोऽपि भारो**
**यद् यादवं कुलमहो अविषह्यमास्ते ।। ३ ।।**

'मन्येऽवने'रित्यत्र यदि यदवः शिष्यन्ते तर्हि कालानुसारेण तेषां पापीयसी बुद्धिर्भवेत् । तेषां संहारकान्तराभावाद् भूभारः स्यादिति भावः ।। स्वेन सहैव गमने अदृष्टातिशयः, यदुशेषे देवतानां कुले शतपुरुषपर्यन्तं देवतानामेव जन्यत्वात् कलिप्रवर्तनरोधश्चेति कारणान्तरद्वयमन्यत्रोक्त-मनुसन्धेयम् ।।

**कर्माणि पुण्यनिवहानि सुमङ्गलानि**
**गायज्जगत्कलिमलापहराणि कृत्वा ।**
**कालात्मना निवसता यदुदेवगेहे**
**पिण्डारकं समगमन् मुनयो निसृष्टाः ।। ११ ।।**

'मुनयो निसृष्टाः' इत्यत्र प्रेरिता इत्यर्थः । भगवत्प्रेरणयैवाजग्मुः । अत एवान्यत्र 'भगवन्मतकोविदाः शेपुः' इत्युक्तम् ।।

**भगवान् ज्ञातसर्वार्थ ईश्वरोऽपि तदन्यथा ।**
**कर्तुं नैच्छद् विप्रशापं कालरूप्यन्वमोदत ।। २४ ।।**

'कालरूपी' इत्यत्र कालं रूपयतीति तथोक्तः । कलिकालप्रवर्तनायैव विप्रशापं नान्यथा कर्तुमैच्छदिति भावः ।।

ऋष्यन्तर्यामिश्रीकृष्णकृतस्वकुलसंहारारम्भवर्णनेन भगवन्निष्ठत्वम् । महाभागवता अपि स्वकुलसंहारहेतुभूतां महर्षिप्रलोभरूपचेष्टामाचरन् इत्यहो भगवतः अचिन्त्यप्रेरणाशक्तिरिति ॥

**॥ इति एकादशस्कन्धे प्रथमोऽध्यायः ॥**

## द्वितीयोऽध्यायः

**भूतानां देवचरितं दुःखाय च सुखाय च ।**
**सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम् ॥ ५ ॥**

**भजन्ति ये यथा देवान् देवा अपि तथैव तान् ।**
**छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥ ६ ॥**

'भूतानां' 'भजन्ति' इति श्लोकद्वये देवेभ्योपि साधूनां चरितमेव गरीय इति भात्यापाततः । नैवमवगन्तव्यम् । 'तथापि तेभ्यः प्रवरा देवा एव हरेः प्रियाः'इत्युक्तेः । 'यस्य यो विहितो धर्मो विष्णुना प्रभविष्णुना' इत्युक्तप्रकारेण साधुभिः सर्वेषु दया कार्या । देवैस्तु स्वाश्रितेषु । 'आश्रितेषु दया कार्या कैश्चत्कार्याखिलेष्वपि' इति भगवत्पादोक्तेः ॥

**अहं किल पुराऽनन्तं प्रजार्थे भुवि मुक्तिदम् ।**
**अपूजयं न मोक्षाय मोहितो देवमायया ॥ ८ ॥**

'अहं किल' इत्यत्र कुरुक्षेत्रे पूर्णसूर्यग्रहणावसरे नारदोक्तं कृष्णस्य परब्रह्मत्वमनुसन्दधतो वसुदेवस्य वचनम् ॥

**कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।**
**आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥ २१ ॥**

कविरिति ॥ एतादृशानां पक्वयोगिनां नामोच्चारणमपि तारकमिति भावेन

तत्सौकर्याय श्लोकेनैकेन नामानि सङ्गृहीतानि ।

**धर्मान् भागवतान् ब्रूत यदि नः श्रुतये क्षमम् ।**
**यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ।। ३१ ।।**

**ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ।**
**अञ्जः पुंसामविदुषां विद्धि भागवतान् हि तान् ।। ३४ ।।**

'धर्मान्' इत्यत्र भगवत्प्रीतिकरा धर्माः भगवत्प्राप्तिकराः धर्माः इति भागवतधर्माणां लक्षणद्वयमुक्तं भवति । 'ये वै भागवता प्रोक्ता' इत्युक्त्यनुसारेण भगवत्प्रोक्ताः धर्माः इति लक्षणान्तरमपि ज्ञातव्यम् ।।

**त्रिभुवनविभवहेतुभिर्विकुण्ठ-**
**स्मृतिभिरजेशसुरादिभिर्विमृग्यात् ।**
**न चलति भगवत्पदारविन्दा-**
**ल्लवनिमिषार्धमपि स्म स वैष्णवाग्र्यः ।। ५३ ।।**

'लवनिमिषार्धमपि' इत्यत्र कनिष्ठपक्षे इत्युपस्कर्तव्यम् । एवं चेत् सकलवैष्णवश्रेष्ठेषु लक्षणमनुगतं भवति । अन्यथा ब्रह्मेतरेषु व्यभिचारः स्फुटः ।।

**विसृजति हृदयं न यस्य साक्षाद्**
**हरिरवशाभिहितोऽप्यघोघनाशः ।**
**प्रणयरशनया धृताङ्घ्रिपद्मः**
**स भवति भागवतप्रधान उक्तः ।। ५५ ।।**

'विसृजति हृदयम्' इत्यत्र भगवान् भक्तहृदयं न त्यजतीति 'प्रणयरशनया धृताङ्घ्रिपद्म' इत्यत्र भागवता भगवत्पादं न त्यजन्तीत्युक्तम् । तदुक्तं विजयदासार्यैः 'निन्न नानु बिडुवनल्ल एन्न नीनु बिडलु सल्ल' इति ।।

## तृतीयोऽध्यायः

**इत्थं कर्मगतीर्गच्छन् बह्वभद्रावहः पुमान् ।**
**आभूतसंप्लवात् स्वर्गप्रलयावश्नुतेऽवशः ।। ७ ।।**

'आभूतसंप्लवात् 'इत्यत्र आभूतस्म्प्लवो नाम दिनप्रलयः । तावत्पर्यन्तमेव ब्रह्महत्यादिपापानामश्वमेधादिपुण्यानां चानुभवः । अतः आभूतसंप्लवात् स्वर्गप्रलयावश्नुत इत्युक्तम् । विष्णुद्वेषिणस्ततः पश्चादन्धन्तमःप्राप्तिरिति ज्ञेयम् । अन्यस्तु उत्तरब्रह्मदिने पुनः प्रभवति ।।

**शतवर्षमनावृष्टिर्भविष्यत्युल्बणा भुवि ।**
**तत्कालोपचितोष्णार्को लोकांस्त्रीन् प्रतपिष्यति ।। ९ ।।**

**पातालतलमारभ्य सङ्कर्षणमुखानलः ।**
**दहन्नूर्ध्वशिखो विष्वग्वर्धते वायुनेरितः ।। १० ।।**

**सांवर्तको मेघगणो वर्षति स्म शतं समाः ।**
**धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ।। ११ ।।**

**ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ।**
**अव्यक्तं विशते सूक्ष्मं निरिन्धन इवानिलः ।। १२ ।।**

**वारिणा हृतगन्धा भूः सलिलत्वाय कल्पते ।**
**सलिलं तद् हृतरसं ज्योतिष्ट्वायोपकल्पते ।। १३ ।।**

**हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते ।**
**हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते ।। १४ ।।**

**कालात्मना हृतगुणं नभ आत्मनि लीयते ।**

**इन्द्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ।। १५ ।।**

**प्रविशन्ति ह्यहङ्कारं स्वगुणैरहमात्मनि ।। १६ ।।**

'शतवर्षमनावृष्टिः' इत्यादि श्लोकत्रयोक्तः दैनन्दिनप्रलयः ब्रह्मणः प्रतिदिनान्ते भवति ।।

'ततो विराज'मित्यादिश्लोकपञ्चकोक्तः प्राकृतिको लयः ब्रह्मणः कल्पस्यान्ते भवतीति विवेक्तव्यम् ।।

**श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि ।**
**मनोवाक्कायदण्डं सत्यं शमदमावपि ।। २७ ।।**

'अनिन्दामन्यत्र' इत्यत्र यतिभिः कलाविद्यासु अनिन्दा कर्तव्या । कलाविद्याभ्यासो न कर्तव्यो भगवति तेषां साक्षादप्रवेशात् । गृहिभिः कलाविद्याभ्यासो न दोषाय । किन्तु महाप्रयोजनाय न भवतीति द्रष्यव्यम् ।।

**क्वचिद् रुदन्त्यच्युतचिन्तया क्वचि-**
**द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।**
**नृत्यन्ति गायन्त्यनुशीलयन्त्यजं**
**भवन्ति तूष्णीं परमेत्य निर्वृताः ।। ३३ ।।**

'क्वचिद्रुदन्ति' इत्यत्र रोदनादिबाह्यविक्रियावानेव भागवत इति नोच्यते । किन्तु भागवतस्य यदृच्छया रोदनादि भवतीत्येव । भागवतत्वं दार्ढ्येन मुखविकासादिना च ज्ञातव्यम्, न केवलं रोदनादिना । दम्भेन रोदनादेः स्सम्भवात् । दम्भपरिहारार्थं रोदनादि नियन्त्रणं कार्यमिति ज्ञातव्यम् ।।

**आविर्होत्र उवाच—**
**कर्माकर्म विकर्मेति वेदवादो न लौकिकः ।**

**वेदस्य चेश्वरात्मत्वात् तत्र मुह्यन्ति सूरयः ।। ४४ ।।**

‘कर्माकर्म’ इत्यत्र सनकादयः कर्मादिविवेकस्य दौर्लभ्यसूचनार्थमेव नाब्रुवन् इत्युच्यते ।।

**सृष्टिस्थितिलयकारिभगवन्मायाया मायातरणोपायस्य भगवन्निष्ठायाः भगवत्पूजाविधानस्य चोक्तेः स्फुटं भगवन्निष्ठत्वम् ।।**

**इति तृतीयोऽध्यायः**

## चतुर्थोऽध्यायः

**द्रुमिल उवाच—**

**यो वा अनन्तस्य गुणाननन्ता-**
**ननुक्रमिष्येत् स तु बालबुद्धिः ।**
**रजांसि भूमेर्गणयेत् कथंचित्**
**कालेन नैवाखिलसत्वधाम्नः ।। २ ।।**

रजांसि भूमेर्गणयेत् कथञ्चित् ब्रह्मा न तु विष्णुगुणान् अनन्तत्वात् तेषाम् । ‘विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि’ इति हि श्रुतिः ।

**आदावभूच्छतधृती रजसाऽस्य सर्गे**
**विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः ।**
**रुद्रोऽप्ययाय तमसा पुरुषः स आद्य**
**इत्युद्भवस्थितिलयाः सततं प्रजासु ।। ५ ।।**

‘आदावभूत्’ इत्यत्रेदं ज्ञातव्यम् । ब्रह्माण्डबहिरावणसृष्ट्यनन्तरं ब्रह्माण्ड-सृष्टेः पूर्वं भगवान् लक्ष्म्या प्रार्थितः सन् श्रीभूदुर्गेति त्रिरूपायां लक्ष्म्यां विहारं कृत्वा तासु क्रमेण विष्णुब्रह्मशिवरूपेण प्रादुर्भवति । अयं विष्णुर्वैकुण्ठस्थः

स्थितिकर्ता । ब्रह्मा चतुर्मुखब्रह्माणं प्रविश्य सृष्टिकर्ता । शिवः शिवं प्रविश्य लयकर्तेति ।'ब्रह्मणि ब्रह्मरूपोसौ शिवरूपी शिवे स्थितः' इत्यत्र मानम् । 'पुनश्च माया त्रिविधा बभूव' इत्यादि च तात्पर्यनिर्णये ।।

**हंसस्वरूप्यवददच्युत आत्मयोगं**
**दत्तः कुमार ऋषभो भगवान् पिता नः ।**
**विष्णुः शिवाय जगतां कलयावतीर्णः**
**तेनाहृता मधुभिदा श्रुतयो हयास्ते ।।१३----**

'कुमार आत्मयोगमवदत्' इत्यत्र सनत्कुमारः ब्रह्मचर्यलक्षणमात्मप्राप्त्युपायमवदत् इत्यर्थः । ब्रह्मचर्यशिक्षणार्थमयमवतारः । अतः ब्रह्मचर्यविषये वक्तव्यं बह्वस्तीति ज्ञायत इति गुरुपादः ।।

**देवासुरे युधि स दैत्यपतीन् सुरार्थे**
**हत्वाऽन्तरेषु भवनान्यदधात् कलाभिः ।**
**भूत्वांऽथ वामन इमामहरद् बलेः क्ष्मां**
**याञ्चाछलेन समदाददितेः सुतेभ्यः ।। २० ।।**

'हत्वाऽन्तरेषु' इत्यत्र उपेन्द्ररूपी भगवान् प्रतिमन्वन्तरं देवार्थमसुरान् हन्ति । वैवस्वतमन्वन्तरे तु वामनः याञ्चया क्ष्मामहरदिति द्रष्टव्यम् ।।

**भगवदवतारवर्णनेन स्फुटं भगवन्निष्ठत्वम् ।।**

**इति चतुर्थोऽध्यायः**

## पञ्चमोऽध्यायः

**य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् ।**
**न भजन्त्यवजानन्ति स्थानभ्रष्टाः पतन्त्यधः ।। ३ ।।**

'य एषाम्' इत्यादिना चमसवचनेन भगवत्त्यागिनां निन्दया व्यतिरेकमुखेन भगवानेव स्तुतो भवतीति ज्ञेयम् ।।

**यद् घ्राणभक्षो विहितः सुराया-**
**स्तथा पशोरालभनं न हिंसा ।**
**एवं व्यवायः प्रजया न रत्यै**
**इमं विशुद्धं न विदुः स्वधर्मम् ।। १३ ।।**

'यद् घ्राणभक्षः' इत्यत्र विप्राणां सोमयागे सोमस्य आघ्राणभक्षो विहित इत्यर्थः । 'एवं व्यवायः प्रजया न रत्यै' इत्यत्र मामुषाणां प्रजार्थव्यवायेन हरिप्रीतिः, देवेषु तु रत्यैवेति ज्ञेयम् । अत एव अमोघवीर्या देवादयः नन्दनादि-वनेषु स्त्रीभिर्विहरन्तोऽपि स्तूयन्ते नतु निषिद्धाचाररता इति निन्द्यन्ते ।।

**देवर्षिभूताप्तनृणां पितृणां न किङ्करो नायमृणी च राजन् ।**
**सर्वात्मनाः यः शरणं शरण्यं गतो मुकुन्दं परिचर्यया च ।।४२।।**

'न किङ्करो नायमृणी'इत्यत्र स्वोत्तमान् विना अन्येषां न किङ्करः । न ऋणी चेत्यर्थः ।। अत एव सर्वात्मना शरणं गता यतयोपि दण्डोदकेन नमस्कारेण च देवान् पितृंश्च भावयेयुः ।। किञ्च द्विविधानि ऋणानि । दातव्यानीतराणि चेति । तत्र दातव्येभ्यो मुच्यते । नेतरेभ्यः ।।

**करभाजनवचने युगानुसारेण भगवद्याजनवर्णनेन स्पष्टा भगवन्निष्ठता ।**

**इति पञ्चमोऽध्यायः**

## षष्ठोऽध्यायः

**पर्युष्टया पतितया वनमालयेयं**
**संस्पर्धिनी भगवती प्रतिपक्षवच्छ्रीः ।**

**यः सुप्रणीतममुयाऽर्हणमाददानो**
**भूयात् सदाङ्घ्रिरशुभाशयधूमकेतुः ।। १२ ।।**

‘संस्पर्धिनी भगवती’ इत्यत्र संस्पर्धिनीवेति व्याख्येयम् । भगवत्याः स्पर्धादिदोषदूरत्वात् ।।

**यदुवंशेऽवतीर्णस्य भवतः पुरुषोत्तम ।**
**शरच्छतं व्यतीयाय पञ्चविंशाधिकं प्रभो ।। २५ ।।**

‘शरच्छतं’ इत्यत्र शरच्छतं वत्सराणां शतम् ।पञ्चविंशद्भिः ऋतुभिःरधिकं गतमित्यर्थः । ऋतुषट्कस्य वत्सरमेकम् । एवञ्च चतुरधिकशतवत्सराः ऋतुरेकश्च गत इत्यर्थः । अतःपरं वत्सरद्वयं चातुर्मास्यमेकं च भुवि स्थित्वा भगवान् परं धाम जगाम ।।।

**तेषु दानानि पात्रेषु श्रद्धयार्प्य महान्ति वै ।**
**वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवम् ।। ३९ ।।**

‘वृजिनानि तरिष्यामः’ इत्यत्र प्रापब्धपापानि इत्यर्थः । यादवानामुत्पन्न-ज्ञानत्वात् । नहि कृष्णेन शापतरणोपाय उपदिष्टः । तत्तरणस्यादृष्टत्वात् । कृष्णोपदेशस्य चामोघत्वात् ।।

**वयं त्विह महायोगिन् भ्रमन्तः कर्मवर्त्मसु ।**
**त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ।। ४९ ।।**

कर्ममार्गसु भ्रमन्तः इति नैच्यप्रदर्शनं साधुत्वात् ।।

**देवकृतस्तुतिवर्णनेन उद्धवकृतप्रार्थनाव्याजेन च भगवन्महिमैव वर्णितः ।।**

**इति षष्ठोऽध्यायः**

## सप्तमोऽध्यायः

**उद्धवकृतस्तोत्रेण भगवत्प्राप्तिसाधनोपायकथनेन च आनवमाध्यायमाप्ति भगवन्निष्ठत्वं बोध्यम् ।।**

तत्र कपोताख्यायिकया शिशुरक्षणादिगृहस्थधर्म एव न निषिद्ध्यते । किन्तु तत्र अतिरतिः ।।

**सत्यस्य ते स्वदृश आत्मन आत्मनोऽन्यं**
**वक्तारमीश विबुधेष्वपि नानुचक्षे ।**
**सर्वे विमोहितधियस्तव माययेमे**
**ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ।। १७ ।।**

'ब्रह्मादयः' इत्यत्र अतद्गुणसंविज्ञानबहुव्रीहिः । तथैव श्रीमद्विजयध्वजतीर्थश्रीपादैर्विग्रहदर्शनात् । तात्पर्येपि 'अमूढो मूढ इतिवदुच्यते इति मोहाभावमुक्त्वा मोहशब्दो यदर्थे प्रयुक्तः' इति 'अभावस्त्वापरोक्षस्य मोहो ज्ञानस्य भण्यते' इत्यादिना स्पष्टीकृतः । अतः उपदेशत्वप्रयोजकीभूतमोहाभावो ब्रह्मणो विद्यत इति सिद्धमेव । एवञ्च विजयध्वजीयवाक्यं प्रक्षिप्तमिति मन्यमाना आधुनिकाः साम्प्रदायिकार्थाविद्वांस इत्युपेक्षितव्याः ।।

**तेषु काले व्यजायन्त रचितावयवा हरेः ।**
**शक्तिभिर्दुर्विभाव्याभिः कोमलाङ्गतनूरुहाः ।। ५८ ।।**

'हरेः शक्तिभिः' इत्यनेन अण्डात् शावोत्पत्तिर्भगवदायत्तेत्युच्यते । अण्डान्तःस्थितरसविशेषस्य शावत्वेन परिणामो हरेः शक्त्यैवेति । अन्यथा भागवतशास्त्रे अण्डात् पक्षिण उत्पत्तिः प्राणिशास्त्रविषया नैवोच्येत ।।

**इति सप्तमोऽध्यायः**

## अष्टमोऽध्यायः

**समृद्धकामो हीनो वा नारायणपरो मुनिः ।**
**नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ।। ६ ।।**

'समृद्धकाम' इति श्लोकस्य समाख्यारूपः 'आपूर्यमाणमचलप्रतिष्ठम् ' इति गीतास्थः श्लोकः ।।

**दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः ।**
**प्रलोभितः पतन्त्यन्धे तमस्यग्नौ पतङ्गवत् ।। ७ ।।**

'दृष्ट्वा स्त्रियम्' इत्यत्र स्त्रीशब्दो महतां वनिताया वाचकः । महद्वनिता-कामस्यैव अन्धे तमसि पतनस्य प्रयोजकत्वात् । अन्यत्र परस्त्रियां कामेन नरकाद्यनर्थप्राप्तिरेव । नत्वन्धन्तमःप्राप्तिः । अत्र विशेषस्तु 'न तथास्य' इति चतुर्दशाध्यायगतश्लोकस्य तात्पर्ये अवलोकितव्यः ।। एवं यत्र तत्र स्त्रीकामो निषिद्ध्यते तत्र तत्र परस्त्रीविषयककाम एव निषिद्धो ज्ञातव्यः । स्वस्त्रीकामस्यानिषेधात् । स्वस्त्रियामपि अतिशयितकामो वा निषिद्ध्यते ।।

**स्तोकं स्तोकं ग्रसेद् ग्रासं देहो वर्तेत यावता ।**
**गृहाद् व्रजेत् समातिष्ठन् वृत्तिं माधुकरीं मुनिः ।। ९ ।।**

'स्तोकं स्तोकम्' इत्यत्र माधुकरीवृत्तिरुक्ता किल । एवंविधभिक्षान्नजीविनो यतेर्ज्ञानमभिवर्धते । एकग्रासभिक्षान्नेन मासं कुशाग्रस्थबिन्दुपानेन लभ्यं पुण्यं लभ्यते ।।

**इन्द्रियाणि जयन्त्याशु निराहारा मनीषिणः ।**
**वर्जयित्वा तु रसनमसौ रस्ये हि वर्धते ।। १९ ।।**

'इन्द्रियाणि' इति श्लोको 'विषया विनिवर्तन्ते' इति गीतास्थस्य समाख्यारूपः ।।

**सुहृत् प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ।**
**तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ।। ३४ ।।**

'रमेऽनेन' इत्यत्रेदमवगन्तव्यम् । काश्चनाप्सरसो रमावेशाद् भगवदङ्ग-सङ्ग्योग्याः । तासां मध्ये पिङ्गलैका । अतस्तस्या एवं चिन्तनं युज्यते । अन्यासामेवं चिन्तनं महादोषकरमेवेति। पिङ्गलाख्यानेनेदमुच्यते । योषित एव कामबद्धाः । तत्रापि वेश्या । एवंविधापि निर्वेदमाययौ । अतः मुमुक्षुणा निर्वेदोऽवश्यं प्राप्य इति ।।

**इत्यष्टमोऽध्यायः**

## नवमोऽध्यायः

**द्वावेव चिन्तया मुक्तौ परमानन्द आप्लुतौ ।**
**यो विमूढो जडो बालो यो गुणेभ्यः परं गतः ।। ४ ।।**

'द्वावेव' इत्यस्य समाख्यारूपः श्लोकः 'यश्च मूढतमो लोके यश्च बुद्धेः परंगतः । द्वाविमौ सुखमेधेते क्लिश्यत्यन्तरितो जनः' इति मैत्रेयविदुरसंवादे।।

**गृहारम्भो हि दुःखाय विफलश्चाध्रुवात्मनः ।**
**सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ।। १५ ।।**

'गृहारम्भो हि दुःखाय' इति यतिविषयकम् । गृही तु भार्यादिरक्षणार्थम् अतिथिसत्कारार्थं च गृहं निर्मिमीतैव ।।

**कीटः पेशस्करं ध्यायन् कुड्यां तेन प्रवेशितः ।**
**याति तत्साम्यतां राजन् पूर्वरूपमसन्त्यजन् ।। २३ ।।**

'पूर्वरूपमसन्त्यजन्' इत्यनेन जीवोऽपि जीवरूपमत्यजन्नेव दुःख-राहित्यादिसाम्यं यातीति सूच्यते ।।

**नह्येकस्माद् गुरोर्ज्ञानं सुस्थिरं स्यात् सुपुष्कलम् ।**
**ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ।। ३१ ।।**

'नह्येकस्माद्गुरोः' इत्यत्रेदमवगन्तव्यम् । यदि ब्रह्मैवोपदिशति तदा एकस्मात् तस्मात् स्थिरं ज्ञानं स्यात् । अथवा ब्रह्मपदयोगिनि भगवदुपदेशेऽपि एकस्मात् भगवतः स्थिरं ज्ञानं स्यात् । अन्यत्रैकस्मान्न स्यादिति ।।

**इति नवमोऽध्यायः**

## दशमोऽध्यायः

**आचार्योऽरणिराद्या स्यादन्तेवास्युत्तराररणिः ।**
**तत्सन्धानं प्रवचनं विद्यावह्निः सुखावहः ।। १२ ।।**

'आचार्यः' इति श्लोकः 'आचार्यः पूर्वरूपम्' इत्यादिसमाख्यारूपः । अरणी-मथनेनाग्न्युत्पत्तिरिव गुरुशिष्यकर्तृकविचारलक्षणमथनेन विद्योत्पत्तिः ।।

**वैशारदी साऽतिविशुद्धबुद्धि-**
**र्धुनोति मायां गुणसम्प्रसूतिम् ।**
**गुणांश्च संदह्य यदात्म्यमेतत्**
**स्वयं च शाम्यत्यसमिद् यथाग्निः ।। १३ ।।**

'स्वयं च शाम्यति' इत्यत्र यथा इन्धनजातोऽग्निरिन्धनं दग्ध्वा स्वयं शाम्यत्येवं बाह्यमनोजातं ज्ञानं वृत्तिरूपं मनो दग्ध्वा स्वयं च शाम्यतीति द्रष्टव्यम् ।।

**एतदच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर ।**
**नित्यमुक्तो नित्यबद्ध एक एवेति मे मतिः ।। ३७ ।।**

'नित्यमुक्तः' इत्यत्र उद्धवः पूर्वपक्षमाश्रित्य पृच्छचीति ज्ञातव्यम् । शिष्येण तत्वबुभुत्सयैवंविधप्रश्नो न दोषाय ।।

**अपरोक्षज्ञानसाधनस्य वर्णनात् तद्विरुद्धकाम्यकर्मनिन्दनाच्च भगवन्निष्ठत्वं बोध्यम् ।।**

**इति दशमोऽध्यायः**

## एकादशोऽध्यायः

**श्रीभगवानुवाच—**

**बद्धो मुक्त इति ह्याख्या गुणतो मे न वस्तुतः ।**
**गुणस्य मायामूलत्वान्न मे बन्धो न मोक्षणम् ।। १ ।।**

'बद्धो मुक्तः'इत्यत्र मे ममेति नार्थः । श्रीकृष्णस्य बद्धत्वमुक्तत्वयोरभावात् । 'द्वावेतौ नित्यमुक्तौ' इत्यादिना तस्य नित्यमुक्तत्वात् । किन्तु मे मम सकाशादित्यर्थः । जीवस्येति शेषः ।।

**शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि ।**
**श्रमस्तत्र श्रमफलो ह्यधेनुमिव रक्षतः ।। १८ ।।**

'अधेनुमिव रक्षतः' इत्यत्र क्षीरमात्रप्रयोजनस्य पुरुषस्य अदोग्ध्रीगोरक्षणात् यथा श्रम एव फलं तथेत्यर्थः ।। अतो गोरक्षणेन पुण्यप्राप्तेः कथं वैयर्थ्यमिति चोद्यानवकाशः ।।

**वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया ।**
**वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ।। ४४ ।।**

'वैष्णवे बन्धुसत्कृत्य' इत्यत्र वैष्णवे आगते बन्धुवत् जामातृवत् सत्कार एव पूजेत्युच्यते । तत्रापि प्रथमदीपावलीसन्दर्भे जामातरि आगते

यथा सत्क्रियते तथेति गुरुपादाः । उत्तरत्र अनादरस्यापि सम्भवात् ।।

**मुक्तिसाधनभूतभेदोपदेशात् भगवदधीनबन्धमोक्षवर्णनात् मोक्षसाधनोपदेशात् विविधभगवत्पूजावर्णनाच्च भगवन्निष्ठत्वं बोध्यम् ।।**

**इति एकादशोऽध्यायः**

## द्वादशोऽध्यायः

**विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः ।**
**रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन् युगेऽनघ ।। ४ ।।**

'रजस्तमःप्रकृतयः' इत्यत्र राजसतामसा इति नार्थः । तेषां भगवत्प्राप्त्ययोगात् । किन्तु बाह्यशरीरमपेक्ष्य विप्रक्षत्रा यथा सात्विकास्तथा वैश्यादयो नेत्यभिप्रेत्य ।।

**सुग्रीवो हनुमान् ऋक्षो गजो गृध्रो वणिक्पथः ।**
**व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथाऽपरे ।। ६ ।।**

'सुग्रीवो हनुमान्' इत्यत्र ऋक्षः जाम्बवान् । यद्यप्येते उत्तमा देवाः । तथापि प्राणिशरीरिण इति अत्र गणिताः ।।

**रामेण सार्धं मधुरां प्रणीते**
**श्वाफल्किना मय्यनुरक्तचित्ताः ।**
**विगाढभावेन न मे वियोग-**
**तीव्राधयोऽन्यद् ददृशुः सुखाय ताः ।। १० ।।**

'रामेण सार्धम्' इत्यादिना गोपिकानां प्रशंसा गोप्योऽपि एतादृशा भक्ताः किमु देवताः इति कैमुत्यसूचनायैव ।।

**उद्धव उवाच—**

**संशयः शृण्वतो वाचं तव योगेश्वरेश्वर ।**
**न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः ।। १६ ।।**

'संशयः शृण्वतः' इत्यत्र तत्वं जानन्नप्युद्धवः लोकसंशयं स्वसंशयमिव मन्वानः पूर्वं वायोरुत्तमत्वमुक्त्वेदानीं गोपिकाप्रशंसा कृतेति संशयबीजं हृदि निधाय पृच्छति ।।

**श्रीभगवानुवाच—**

**य एष जीवो विवरप्रसूतिः**
**प्राणेन घोषेण गुहां प्रविष्टः ।**
**मनोमयं सूक्ष्ममुपैति रूपं**
**मात्रा स्वरो वर्ण इति स्थविष्ठम् ।। १७ ।।**

'य एष जीवः'इत्यादिना भगवान् पूर्वोक्तकैमुत्यमेव परिहारं हृदि कृत्वा वायुमहिमानमाह ।।

**एवं गुरूपासनयैकभक्त्या**
**विद्याकुठारण शितेन धीरः ।**
**विवश्च्य जीवाशयमप्रमत्तः**
**सम्पद्य चात्मानमथ त्यजास्त्रम् ।। २४ ।।**

एवं गुरूपासनया' इत्यत्र प्राकृतान्तकरणच्छेदनोपयोगी कुठारो विद्या । सच गुरुसेवानिकषाश्मना निशितः कार्य इत्युच्यते ।।

**भगवद्भक्तिरेव साधनश्रेष्ठमिति वर्णनेन भगवद्भक्ताग्रेसरवायोः महिमावर्णनेन च भगवन्निष्ठत्वं बोध्यम् ।।**

**इति द्वादशोऽध्यायः**

## त्रयोदशोऽध्यायः

**सत्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः ।**
**सत्वेनान्यतमौ हन्यात् सत्वं चैव हि ।। १ ।।**

'सत्वं सत्वेन हन्यात्'इत्यत्र अभिवृद्धेन सत्वगुणेन सत्वं गुणमपि हन्यात् जह्यादित्यर्थः । यथा अभिवृद्धः अग्निः काष्ठं दग्ध्वा स्वयं शाम्यति तथा अभिवृद्धः सत्वगुणोन्तःकरणं दग्ध्वा स्वयं शाम्यतीति भावः ।।

**तत्तत् सात्विकमेवैषां यद्यद् वृद्धाः प्रचक्षते ।**
**निन्दन्ति तामसं तत्तद् राजसं तदुपेक्षितम् ।। ५ ।।**

'तत्तत् सात्विकम्' इत्यत्र क्षीरं सात्विकं प्रशस्तत्वात्, मद्यं तामसं निन्दितत्वात्, 'काफी' इत्यपभ्रष्टसंज्ञायामुच्यमानं राजसमुपेक्षितत्वात् इति गुरुपादाः ।।

**स मामचिन्तयद् देवः प्रश्नपारविनिश्चयम् ।**
**तस्याहं हंसरूपेण समीपमगमं तदा ।। १९ ।।**

'स मामचिन्तयद्देवः'इत्यत्र एतत्काले स्वेनैव प्रश्नपरिहार इष्टो भगवतेति जानन् ब्रह्मा भगवन्तं तदर्थं सस्मारेति भावः ।।।

**पञ्चात्मकेषु भूतेषु समानेषु च वस्तुतः ।**
**को भवानिति वः प्रश्नो वाचारम्भो निरर्थकः ।। २३ ।।**

'को भवान्' इत्यत्र यदि ब्रह्मणा वन्द्या अनेके भवेयुः तर्हि तेषां मध्ये भवान् क इति प्रश्नो युज्यते । किन्तु ब्रह्मणा वन्द्यो हरिरेक एवेति ब्रह्मवन्दितत्वात् हंसस्य विष्णुत्वनिश्चयात् को भवानिति प्रश्नो व्यर्थ इत्युच्यते ।।

**गुणेषु वा विशेच्चितमभीक्ष्णं गुणसेवया ।**
**गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् ।। २६ ।।**

‘मद्रूप उभयम्’ इत्यत्र मनोविषयाण्येतदुभयं भगवति समर्पयेत् । भगवानेव मनोविषयसम्पर्कं वियोजयतीत्युच्यते । अत्र पनसदृष्टान्तो योजितव्यः । तद्वर्णितमस्माभिः ‘दृष्टान्ततीर्थ देवेन्द्रतीर्थरु’ इति कर्नाटकभाषाग्रन्थके ।

**मुमुक्षुणा भगवत्प्राप्त्यै अवश्यक्रियमाणयोगस्य वर्णनात् भगवन्निष्ठत्वं बोध्यम् ।।**

**इति त्रयोदशोऽध्यायः**

## चतुर्दशोऽध्यायः

**श्रीभगवानुवाच—**

**कालेन नष्टा प्रलये वाणीयं वेदसञ्ज्ञिता ।**
**मयाऽऽदौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ।। ३ ।।**

‘कालेन नष्टा’इत्यादिना मतभेदकरणं यद्वर्णितंमत्र तदेव वर्णितं भीष्मेण युधिष्ठिरं प्रति शान्तिपर्वणि ।।

**न तथा मे प्रियतम आत्मयोनिर्न शङ्करः ।**
**न च सङ्कर्षणो न श्रीर्नवाऽऽत्मा च यथा भवान् ।। १५ ।।**

‘न तथा मे..यथा भवान्’ इत्यत्र उद्धवस्य श्रियादिभ्य उत्तमत्वं नोच्यते। किन्तु कृपानिमित्तप्रीतिविषयत्वमेव । प्रद्युम्नसाम्बरामान् विहाय अन्यत्र यादवेषु उत्तमत्वं वा ।।

**निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ।**
**अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः ।। १६ ।।**

'अनुव्रजाम्यहम्' इत्यत्र भक्तानुव्रजने स्वपादधूलिः तन्मस्तकोपरि पतित्वा तान् पावयतीति बुद्ध्या अनुव्रजतीति ज्ञातव्यम् ।। अग्रतो गमने भक्तपादधूलिरेव वायुवशात् स्वमस्तकोपरि पतेत्, मा भूदिति च । अनेन रथोत्सवादिषु देवस्य पुरतो गच्छेत् न पृष्ठत इति सूचितं भवति ।। तदुक्तं दासार्यैः 'भक्तजन मुन्दे नीनवर हिन्दे' इति ।।

**वाग् गद्गदा द्रवते यस्य चित्तं**
**रुदत्यभीक्ष्णं हसति क्वचिच्च ।**
**विलज्ज उद्गायति नृत्यते च**
**मद्भक्तियुक्तो भुवनं पुनाति ।। २४ ।।**

'वाग्गद्गदा' इत्यत्रेदमवगन्तव्यम् । भक्ता द्विविधाः शान्ता उन्मादाश्चेति । तत्र रोदनहसनादिकं यदत्र वर्णितं तदुन्मादभक्तानाम् । शान्तास्तु अस्पन्दतरव इव भगवन्तं चिन्तयन्ति । अनयोर्मध्ये श्रेष्ठत्वस्य उन्मादत्वं वा शान्तत्वं वा न हेतुः । किन्तु चित्तद्रवो मनः प्रसादः स्थैर्यं च । दम्भपरिहारार्थं रोदनादिकं निगृण्हीयात् इति ।।

**न तथाऽस्य भवेत् क्लेशो बन्धश्चान्यप्रसङ्गतः ।**
**योषित्सङ्गाद् यथा पुंसो यथा तत्सङ्गिसङ्गतः ।। ३० ।।**

'योषित्सङ्गात्' इत्यत्र यद्यपि योषिच्छब्दो मिथ्याज्ञानपरत्वेन भगवत्पादैर्व्याख्यातस्तथापि प्रसिद्धस्त्रीपरत्वं न हीयते । भगवत्पादैरेव 'परदारदृशिः प्रोक्ता' इत्यादिना स्त्रीसङ्गजनीनदोषान् प्रकटीकुर्वद्भिः 'देवदाराभिकामानां सङ्गिसङ्गस्ततोधिकः' इत्यपि व्याख्यातत्वात् । यस्य परस्त्रीषु दृष्टिः तस्य उत्तमस्त्रीषु अत एव रूपवतीषु मनः सज्जेतापि । अतः परस्त्रीविषये जागरूकैर्भाव्यमिति गुरुपादाः ।।।

**भगवत्प्राप्तिसाधनोत्तमभक्तिमार्गस्य तद्विघातिनश्च भगवतो ध्यानस्य च वर्णनात् भगवन्निष्टत्वं बोध्यम् ।।**

**इति चतुर्दशोऽध्यायः**

## पञ्चदशोऽध्यायः

**श्रीभगवानुवाच—**

**जितेन्द्रियस्य युक्तस्य जितश्वासस्य योगिनः ।**
**मयि धारयतश्चेत उपतिष्ठन्ति सिद्धयः ।। १ ।।**

'मयि धारयतः' इत्यादि भगवदुपदेशो इदमवगन्तव्यम् । विविधधारणाभिर्विविधसिद्धयो भवन्ति खलु । किन्त्विदानीं तादृशधारणायोगकर्तारो दुर्लभाः । किमुत तदुपदेष्टारः । प्रायो योगमार्गस्तिरोहितः । भगवानाचार्योऽपि योगमार्गस्य क्लेशावहत्वादेव तत्र नैर्भर्यमकृत्वा कथामार्गमेव विस्तरपेणोपदिदेश । योगमार्गस्य दिग्दर्शनमेव कृतवान् तन्त्रसारसङ्ग्रहे । अस्मिन्नध्यायेऽपि योगशास्त्रीयशब्दश्रवणमेव भवति, नतु योगमार्गशिक्षणं जायत इति ।। किञ्चेदानीं लोके प्रसिद्धं योगशास्त्रं पातञ्जलीयं मोक्षानुपयोगि तद्विरोधि चेति द्रष्टव्यम् । यत्किञ्चिल्लौकिकप्रयोजनमारोग्यलाभादि भवेद्वा ।।

**श्रीभगवानुवाच—**

**सिद्धयोऽष्टादश प्रोक्ता धारणायोगपारगैः ।**
**तासामष्टौ मत्प्रधाना ता एव गुणहेतवः ।। ३ ।।**

'सिद्धयोऽष्टादश, तासामष्टौ मत्प्रधानाः' इत्यत्र देवेभ्योन्यत्र अष्टादश सिद्धयः, देवेषु तन्मूलभूता अष्टसिद्धयः, विरिञ्चे स्वाभाविका अष्टौ देवेभ्योऽधिकाः विष्णौ सर्वाधिका इति ज्ञेयम् ।।

**अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः ।**

**प्राकाश्यं श्रुतदृष्टेषु शक्तेः प्रेरणमीशिता ।। ४ ।।**

'अणिमा महिमा' इत्यत्र अणिमा, महिमा, लघिमा, प्राप्तिः, प्राकाश्यम्, ईशित्वं, वशित्वं, प्राकाम्यमित्यष्टसिद्धयः । 'गरिमा' प्रत्येकसिद्धिः इति केचन वदन्ति । किन्तु गरिमा महिम्न्येव अन्तर्भूतः । क्वचित् प्राप्ति-प्राकाश्ययोरेक-धारणासाध्यत्वात् गरिमा पृथक् गणित इति द्रष्टव्यम् ।।

**अनूर्मिमत्त्वं देहेऽस्मिन् दूरश्रवणदर्शनम् ।**
**मनोजवः कामरूपं परकायप्रवेशनम् ।। ६ ।।**

'दूरश्रवणदर्शनम्' इत्यत्र सहस्रयोजनादर्वाक् इति ज्ञातव्यम् ।

**स्वच्छन्दमृत्युर्देवानां सहक्रीडानुदर्शनम् ।**
**यथासङ्कल्पसंसिद्धिराज्ञाऽप्रतिहतागतिः ।। ७ ।।**

'देवानां सह क्रीडा' इत्यत्र इन्द्रादीन् विनेति ज्ञेयम् ।।

**त्रिकालज्ञत्वमद्वन्द्वं परचित्ताद्यभिज्ञता ।**
**अग्न्यर्काम्बुविषादीनां प्रतिस्तम्भोऽपराजयः ।। ८ ।।**

'त्रिकालज्ञत्वं' तस्मिन् युगे एव स्थिते विषय इति ज्ञेयम् ।।

**भगवति मनोधारणाधारणययया योगसिद्धीनां वर्णनात् भगवन्निष्ठत्वं ज्ञेयम् ।।**

**इति पञ्चदशोऽध्यायः**

## षोडशोऽध्यायः

**एतदध्यायो गीतास्थविभूत्यध्यायसमाख्यारूपः ।**

**अहं गतिर्गतिमतां कालः कलयतामहम् ।**

**गुणानामप्यहं सौम्यं गुणिन्यौत्पत्तिको गुणः ।। १० ।।**

'गुणानामप्यहं सौम्यम्' इत्यत्र सौम्यं नाम आनन्दानुभवरूपवत्त्वम् । तदभिमानी वायुः । एतदभिप्रेत्यैव भगवता भगवत्पादाचार्यं प्रति 'भुवि सन्ति सौम्य पुरुषा गुणोचिताः'इत्यत्र 'सौम्य'इति सम्बोधनं कृतमिति द्रष्टव्यम् ।।

'गुणिन्यौत्पत्तिको गुणः'इत्यत्र औत्पत्तिकगुणो नाम शुभप्राप्त्यैकयोग्यता । तस्याप्यभिमानी वायुः । स एव 'गुणिनामप्यहं सूत्रम्'इत्यत्र सूत्रशब्दोक्तः ।।

**गुणिनामप्यहं सूत्रं महतां च महानहम् ।**
**सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ।। ११ ।।**

'सूक्ष्माणामप्यहं जीवः' इत्यत्र गुरुपादोक्तः प्रमेयविशेषः । जीवे सूक्ष्माणां मध्ये विभूतिरूपम् । अतः जीवोऽतिसूक्ष्म इति ज्ञायते । अत एव जीवविषयका जीवकर्तृत्वादिविशेषाः स्थूलदृष्टिभिः न ज्ञातुं शक्यन्ते ।।

**हिरण्यगर्भो देवानां मन्त्राणां प्रणवस्त्रिवृत् ।**
**अक्षराणामकारोऽस्मि पदानि च्छन्दसामहम् ।। १२ ।।**

'पदानि च्छन्दसाम्' इत्यत्र पद्यन्त इति पदानि प्रतिपाद्यानीति यावत्। अत्रायं विवेकः । वेदस्थवर्ण-पद-अर्धर्च-ऋक्-वर्ग-सूक्त-अध्याय-अष्टक-शाखानां देवतास्तारतम्यक्रमेण सन्ति । तासामधीश्वराः वेदवाच्याः । तेषु भगवानेव श्रेष्ठ इति सकलवेदपरममुख्यार्थभूतः परमात्मैव साक्षाद्विभूतिरूप इति । विशेषस्तु तात्पर्यादवगन्तव्यो गुरुमुखेन । नास्माभिरत्र प्रकटीकर्तव्य इत्युपरम्यते ।।

**पुरोधसां वसिष्ठोऽहं ब्रह्मिष्ठानां बृहस्पतिः ।**
**स्कन्दोऽहं सर्वसेनान्यामग्रण्यां भगवानजः ।। २२ ।।**

'पुरोधसां वसिष्ठः' इत्यत्र मानुषाणां पुरोधसामित्युपस्कर्तव्यम् । तेन ' पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्' इति गीताया अविरोधः ।।

**यज्ञानां ब्रह्मयज्ञोऽहं व्रतानामविहिंसनम् ।**
**वाय्वग्न्यर्काम्बुवागात्मा शुचीनामप्यहं शुचिः ।। २३ ।।**

'यज्ञानां ब्रह्मयज्ञः' इत्यत्र ब्रह्मयज्ञो नाम स्वाध्याययज्ञः । अयमेव ज्ञानयज्ञ इति द्रष्टव्यम् । अयमेव जपयज्ञोऽपि । 'जप्येनैव तु संसिद्ध्येत् ब्राह्मणो नात्र संशयः' इति तैत्तिरीयभाष्यस्थजपशब्देनापि स्वाध्याय एव विवक्षितः । अतो गीतायाः समाख्यारूपमिदम् ।।

**योगानामात्मसंरोधो मन्त्रोऽस्मि विजिगीषताम् ।**
**आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनाम् ।। २४ ।।**

'विकल्पः ख्यातिवादिनाम्' इत्यत्र ख्यातिवादिनां ज्ञानवादिनां मध्ये विकल्पो भेदवादीत्यर्थः ।।

**स्त्रीणां तु शतरूपाऽहं पुंसां स्वायम्भुवो मनुः ।**
**नारायणो मुनीनां च कुमारो ब्रह्मचारिणाम् ।। २५ ।।**

'स्त्रीणां तु शतरूपाऽहं पुंसां स्वायम्भुवो मनुः' इत्यत्र इन्द्राण्यादीन् इन्द्रादींश्च विहायेति द्रष्टव्यम् ।। सजातीयकदेशजातिविभूतिरियम् ।।

**वासुदेवो भगवतां त्वं तु भागवतेष्वहम् ।**
**किम्पुरुषाणां च हनूमान् विद्याध्राणां सुदर्शनः ।। २९ ।।**

'त्वं तु भागवतेष्वहम्' इत्यत्रेदं ज्ञातव्यम् । भागवतेष्वधिक उद्धवः । तस्मादप्यर्जुनः । ततो वरो रामः । तस्मादभ्यधिका द्रौपदी । तस्या अभ्यधिको भीमो यत्सदृशो नान्योऽस्ति अधिकारिवर्ग इति ।।

**ओजः सहोबलवतां कर्माहं विद्धि सात्वताम् ।**
**सात्वतां नवमूर्तीनामादिमूर्तिरहं पुरा ।। ३२ ।।**

'सात्वतां नवमूर्तीनाम्' इत्यत्र पञ्चरात्रोक्तानि शेषगरुडवायुब्रह्मरमा-भगवतां मूर्तिनवकानि प्रत्येकं सन्ति । तेषां मध्ये भगवन्मूर्तयः साक्षाद्विभूति-रूपाणीति भावः ।। विस्तरस्तु तात्पर्यादवगन्तव्यम् ।।

**विश्वावसुः पूर्वचित्तिर्गन्धर्वाप्सरसामहम् ।**
**भूधराणामहं स्थैर्यं गन्धमात्रमहं भुवः ।। ३३ ।।**

'विश्वावसुः पूर्वचित्तिर्गन्धर्वाप्सरसामहम्' इत्यत्र चित्ररथम् ऊर्वशीं च विहयेति द्रष्टव्यम् ।।

**भगवद्विभूतिवर्णनात् स्पष्टं भगवन्निष्टत्वम् ।**

**।। इति षोडशोऽध्यायः ।।**

## सप्तदशोऽध्यायः

**श्रीभगवानुवाच—**

**धर्म्य एष तव प्रश्नो नैःश्रेयसकरो नृणाम् ।**
**वर्णाश्रमाचारवतां तमुद्धव निबोध मे ।। ९ ।।**

**इतः परमध्यायद्वयं वर्णाश्रमाचारवर्णनपरम् ।**

'नैःश्रेयसकर' इत्यत्र सकामं वर्णाश्रमाचाराचरणं स्वर्गादिफलाय निष्कामं तु ज्ञानद्वारा श्रेयआख्यमोक्षकरमिति ज्ञेयम् ।।

**आदौ कृतयुगे वर्णो नृणां हंस इति स्मृतः ।**
**कृतकृत्याः प्रजा जात्या तस्मात् कृतयुगं विदुः ।। १० ।।**

'आदौ कृतयुगे' इत्यत्र आदौ इति विशेषणात् प्रथमे कृतयुगे हंसाभिधा एका एव जातिरासीदिति ज्ञायते । इतरकृतयुगेषु चातुर्वर्ण्यव्यवस्था आसीदित्यादि ज्ञेयम् ।। आदित्रेतायुगे जातानां विप्रादिजातीनां द्वितीयकृतयुगे नाशस्याप्रमितत्वात् ।।

**तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः ।**
**स्थैर्यं ब्रह्मण्यमैश्वर्यं क्षत्रप्रकृतयस्त्विमाः ।। १७ ।।**

'ऐश्वर्यम्' ईश्वरभावो गीतातात्पर्योक्तोऽनुसन्धेयः ।।

**आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् ।**
**न मर्त्यबुद्ध्याऽसूयेत सर्वदेवमयो गुरुः ।। २७ ।।**

'आचार्यं मां विजानीयात्' इत्यत्र आचार्यान्तर्गतमित्यर्थः ।।

**शुश्रूषमाण आचार्यं सदोपसीत नीचवत् ।**
**यानशय्यासनस्थाने नातिदूरः कृताञ्जलिः ।। २९ ।।**

'नीचवत्' इत्यस्य चण्डालवदिति गुरुपादाः ।।

**अथानन्तरमावेक्ष्यन् यथाजिज्ञासितागमः ।**
**गुरवे दक्षिणां दत्वा स्नायाद् गुर्वनुमोदितः ।। ३७ ।।**

'गुरवे दक्षिणां दत्वा स्नायात्' इत्यत्र समावृत्तो भवेदित्यर्थः । गुरुकुलवाससमाप्त्यर्थं समावर्तनं कृत्वा अनन्तरमेवाश्रमानन्तरं प्राप्नुयादित्युक्तं भवति । अतो न केवलं गृहाश्रमस्वीकारार्थं समावर्तनं, किन्तु 'ब्रह्मचर्यादेव प्रव्रजेत्' इति श्रुत्यनुसारेण यत्याश्रमस्वीकारार्थमपि समावर्तनमावश्यकमेवेति भाति । अन्यथा स्वस्य गुरुकुलवासे मृतानां स्वात्मदशाहज्ञातीनामुद्देशेन त्र्यहाशौचस्याननुष्ठितत्वात् आशौचमध्ये सन्न्यासस्वीकारापत्तेः बहुविप्लवः स्यात् ।। किञ्च यथोपनयनं गुरूपसत्तिप्रापकं तथा समावर्तनं गुरुकुल-

वाससमापकम् । तस्याकृतत्वे कथं गुरुकुलाद्बहिर्निर्गमनमिति द्रष्टव्यम् ।।

**गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सिताम् ।**
**यवीयसीं तु वयसा यां सवर्णामनुक्रमात् ।। ३९ ।।**

'यां सवर्णामनुक्रमात्' इत्यत्र अन्यत्रोक्तरीत्या असगोत्रामित्युपस्कर्तव्यम् ।।

**कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान् ।**
**तिष्ठेद् वनं वोपविशेत् प्रज्ञावान् वा परिव्रजेत् ।। ५५ ।।**

'तिष्ठेद् वनं वोपविशेत्' इत्यत्र 'तिष्ठेत्' इत्युक्त्या गृहस्थाश्रमे तिष्ठन्नेवापि सिद्धिं प्राप्नोति । वनप्रवेशो वा यतिधर्मो वा न नियत इत्युक्तं भवति । 'प्रज्ञावान् वा' इत्यत्र 'वा' इत्यस्य 'वै' इत्यर्थः । 'सुधा वा पठनीया वसुधा वा पालनीया' इत्यत्रेव । तेन ज्ञानिन एव गृहस्थस्य सन्न्यासे अधिकार इत्युक्तं भवति ।।

**अहो मे पितरौ वृद्धौ भार्या बालात्मजा सती ।**
**अनाथा मामृते दीनाः कथं जीवन्ति दुःखिताः ।। ५७ ।।**

'अनाथा मामृते दीनाः' इत्यत्र पित्रादिपोषणं न निषिध्यते । एवंसति मानविरोधात् । किन्तु 'अहमेव तेषां पोषकः' इति मोह एव निषिद्ध्यते । उत्तरत्र 'मूढधीः' इति विशेषणादेवं पर्यवस्यति ।।

**भगवत्प्राप्तिसाधनवर्णाश्रमधर्मनिरूपणात्भगवन्निष्ठत्वमत्रोत्तरत्रच।।**

## अष्टादशोऽध्यायः

**विप्रस्य वै संन्यसतो देवा दारादिरूपिणः ।**
**विघ्नं कुर्वन्त्ययं ह्यस्मानाक्रम्य समियात् परम् ।। १४ ।।**

'देवा दारादिरूपिणः विघ्नं कुर्वन्ति' इत्यत्र देवान् सम्पूज्यानुज्ञामादाय सन्यसतो विघ्नं न कुर्वन्ति । असम्पूज्य न्यसिष्णुं विघ्नमुत्पाद्याधः पातयन्तीति विवेकः ॥

**बिभृयाच्चेन्मुनिर्वासः कौपीनाच्छादनं परम् ।**
**त्यक्तं न दण्डपात्राभ्यामन्यत् किञ्चिदनापदि ॥ १५ ॥**

'कौपीनाच्छादनं परम्' इत्यत्र केवलं कौपीनरूपाच्छादनमित्येकोऽर्थः । अधिकापेक्षायां कौपीनरूपाच्छादनं परं शाटकमेकमिति द्वे वस्त्र इति द्वितीयोऽर्थः । कौपीनम् आच्छादनरूपमेकं वस्त्रं परमुत्तरीयरूपं चेति वस्त्रत्रयमिति तृतीयोऽर्थः । परमित्यावृत्य करवस्त्ररूपं चतुर्थमादाय वस्त्रचतुष्टयमिति चतुर्थोऽर्थः । नातः परमिति गुरुपादाः ॥

**बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः ।**
**विभज्य याचितं शेषं भुञ्जीताशेषमाहृतम् ॥ १९ ॥**

'विभज्य' इत्यनेन रमादिभ्यो बलिदानं सभोज्यहरणं च गृह्यते ॥

**एकश्चरेन्महीमेतां निःसङ्गः संयतेन्द्रियः ।**
**आत्मक्रीड आत्मरत आत्मवान् समदर्शनः ।**
**विविक्तक्षेमशरणो मद्भावविमलाशयः ॥ २० ॥**

'विविक्तक्षेमशरणः' इत्यत्र कलौ युगे सायंगृहत्वं निषिध्यते ॥

**वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् ।**
**संसिद्ध्यत्याश्वसंमोहः शुद्धसत्वः शिलान्धसा ॥ २५ ॥**

'भैक्ष्यमाचरेत्' इत्युक्त्वा संसिद्ध्यति' इत्युक्त्या यतेर्भिक्षान्नभोजनेन ज्ञानसिद्धिरिति ज्ञायते । एवमेव ब्रह्मचारिणः । गृहस्थस्य तु विपरीतं

फलमिति गुरुपादाः ।। शिलान्धसेत्यत्र लुप्तोपमा । था गृहस्थः शिलान्धसा शिलोञ्छवृत्त्या सिद्ध्यति एवं यतिः भैक्ष्येण सिद्ध्यतीत्यर्थः ।।

**आहारार्थं समीहेत युक्तं तत्प्राणधारणम् ।**
**तत्वं विमृश्यते तेन तद् विज्ञाय विमुच्यते ।। ३९ ।।**

'आहारार्थं समीहेत युक्तं तत्प्राणधारणम्' इत्यत्र यतिरपि यावत्प्राणधारणयोग्याहाराय यतेदेवेत्युच्यते । प्राणधारणेन तत्वजिज्ञासाद्वारा मोक्षाख्यमहाफलसद्भावात् ।।

**तावत् परिचरेद् भक्तः श्रद्धावाननसूयकः ।**
**यावद् ब्रह्म विजानीयान्मामेव गुरुमादृतः ।। ४० ।।**

'तावत् परिचरेत्' इत्यत्रापि ब्रह्मज्ञानानन्तरं गुरुशुश्रूषा नावश्यकीति प्रतीयते । तन्न । 'ततः परं च शुश्रूषेत्' इति स्मृतिविरोधात् ।।

**भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौकसाम् ।**
**गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनम् ।। ४० ।।**

'तप ईक्षा वनौकसः' इत्यत्र ईक्षा बन्धमोक्षचिन्तनमिति गुरुपादाः ।।

**इति अष्टादशोऽध्यायः**

**भगवन्ज्ञानमाहात्म्यस्य वर्णनात् ज्ञानविज्ञानवैराग्याणां भगवत्प्राप्ति-साधनभूतानां वर्णनाच्च भगवन्निष्ठत्वं बोध्यम् ।।**

**इति एकोनविंशोऽध्यायः**

## विंशोऽध्यायः

**श्रीभगवानुवाच—**

**योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।**

**ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ।। ६ ।।**

'योगास्त्रयो मया प्रोक्ताः' इत्यत्रेदमवगन्तव्यम् । 'गुणदोषदृष्टिर्दोषः' इति भगवतोक्ते विहितनिषिद्धाचरणयोः क्रमेण गुणदोषत्वात् तदर्थमेव वेदानां प्रवृत्तत्वात् कथमेतदिति उद्धवेन चोदिते भगवान् योगत्रयं वक्तुमारब्धवात् । कथमत्र सङ्गतिरिति चेत् योगत्रयस्याधिकारिणः पृथक् सन्ति । 'स्वे स्वे अधिकारे या निष्ठा स गुणः परिकीर्तितः । विपर्ययस्तु दोषः स्यादुभयोरेष निर्णयः' इति निगमयितुमुपोद्धातरूपेण योगत्रयवर्णनमिति ।।

**न किञ्चित् साधवो धीरा भक्ता ह्येकान्तिनो मम ।**
**वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ।। ३५ ।।**

'न किञ्चित् साधवो धीराः' इत्यत्र भगवता दीयमानं मोक्षमपि भक्तिफलत्वेन न गृण्हते । किन्तु भगवदाज्ञेति गृह्यत इति भावः ।।

**भगवत्प्राप्तिसाधनयोगत्रयवर्णनात् भगवन्निष्ठत्वं बोध्यम् ।।**

**इति विंशोऽध्यायः**

## अथ एकविंशोऽध्यायः

**धान्यदार्वस्थितन्तूनां रसतैजसचर्मणाम् ।**
**कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः ।।१२ ।।**

'धान्य' इति श्लोके धान्यस्य कालेन शुद्धिरित्युच्यते । दक्षिणोत्तरायणयोः फलितानां धान्यानां धात्रीहवनाग्रयणेष्ट्युत्तरकाले शुद्धिरित्येकोऽर्थः । अन्त्यज-स्पृष्टव्रीह्यादेर्मासत्रयादनन्तरं शुद्धिरित्यपरोऽर्थ इति गुरुपादाः ।।

**अत्र भगवत्प्राप्तिसाधनधर्मानुष्ठानार्थं शुद्ध्यशुद्धिकीर्तनात् तद्विरोधि-विषयसङ्गप्राप्त्या अनर्थवर्णनात् भगवत एव वेदहृदयवेत्तृत्वस्य वर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति एकविंशोध्यायः**

**भगवज्ज्ञानसाधनतत्वसङ्ख्यचनात् प्रकृतिपुरुषवैलक्षण्यवर्णनात् वैराग्यार्थं जन्ममृतिकारणवर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति द्वाविंशोध्यायः**

## अथ त्रयोविंशोध्यायः

**एते पञ्चदशानार्था ह्यर्थमूला मता नृणाम् ।**
**तस्मादनर्थमर्थाख्यं श्रेयोर्थी दूरतस्त्यजेत् ।। १९ ।।**

'तस्मादनर्थमर्थाख्य'मित्यत्र अनर्थस्यैव अर्थेति नाम विपरीतलक्षणयेति ज्ञातव्यम् ।

**द्वन्द्वजयसाधनभूतभिक्षुगीतावर्णनात् भगवन्निष्ठत्वम् । द्वन्द्वजयस्य भगवत्प्रीतिकारणत्वादिति भावः ।।**

## अथ चतुर्विंशोध्यायः

**योगस्य तपसश्चैव ज्ञानस्य गतयोऽमलाः ।**
**महर्जनस्तपः सत्यं भक्तियोगस्य मद्गतिः ।। १४ ।।**

'तपसश्चैव' इत्यत्र योगो नाम नित्यमेकमात्रकालमपरोक्षदृशा युत-मखण्डितं ध्यानम् । पादयोगो नाम नित्यं पादमात्रकालमपरोक्षदृशा युक्तं तादृशम् ।। तपो नाम नित्यं षण्मात्रकालमपरोक्षदृशा युतम् । नित्यं मुहूर्तकालमपरोक्षदृशा युतं ज्ञानम् । ततोधिकं महाज्ञानम् । तत्र पादयोगेन महर्लोकप्राप्तिः । योगेन जनोलोकः । तपसा सत्यलोकः । ज्ञानात् सत्यलोकः । महाज्ञानेन भगवल्लोक इति विवेकः ।।

**भगवत्सृष्टिस्थितिसंहाररूपसाङ्ख्यवर्णनात् भगवन्निष्ठत्वम् ।।**

## अथ पञ्चविंशोऽध्यायः

**कैवल्यं सात्विकं ज्ञानं कर्मनिष्ठं तु राजसम् ।**
**प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ।। २४ ।।**

'प्राकृतं तामसं ज्ञानम्' इत्यनेन आधुनिकवैज्ञानिकज्ञानं तामसमित्युक्तं भवति। तस्य नीतिनिष्ठत्वस्य वा कर्मनिष्ठत्वस्य वा अभावात् ।।

**वनं तु सात्विको वासो ग्रामो राजस उच्यते ।**
**तामसं द्यूतसदनं मन्निकेतं तु निर्गुणम् ।। २५ ।।**

तामसं द्यूतसदनमित्यत्र द्यूतेत्युपलक्षणम् । यत्र द्यूतं हिंसा पानं स्त्री इति चतुर्विधकलिसन्निधिः तत् तामसं क्षेत्रमित्यर्थः । एतेन विदेशवासस्तामस इत्युक्तप्रायम् ।। रजोगुणमाश्रित्य तमोगुणं जयेत् । सत्वगुणमाश्रित्य रजः । सत्वेनैव सत्वं जित्वा निर्गुणातामियादिति क्रमः । एवं विधभगवत्तोषक-रसाधानानुष्ठानसौकर्याय सात्विकादिविवेकार्थं प्रवृत्तत्वात् भगवन्निष्ठत्वम् ।।

**।। इति पञ्चविंशोध्यायः ।।**

**मोहकेषु मुख्यस्य स्त्रीलक्षणद्रव्यस्य विषये जागरूकेन भाव्यं मुमुक्षुणेति ऐलगीताव्याजेन वर्णनात् मुक्तये सत्सङ्गस्य आवश्यकत्व-वर्णनाच्च भगवत्प्राप्तिसाधनस्यैव वर्णितत्वात् भगवन्निष्ठत्वम् ।।**

**।। इति षड्विंशोध्यायः ।।**

## अथ सप्तविंशोऽध्यायः

**भगवत्प्राप्तिसाधनकर्मयोगवर्णनात् भगवन्निष्ठत्वमस्मिन्नध्याये ।**

**श्रीभगवानुवाच–**

**न ह्यन्तोऽनन्तपारस्य कर्मकाण्डस्य चोद्धव ।**

**संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ।। ६ ।।**

‘न ह्यन्तोऽनन्तपारस्य कर्मकाण्डस्य’ इत्येतत् ‘तन्त्रमार्गास्तु हरिणा ह्यसङ्ख्याः सम्प्रकीर्तिताः’(त.सा.सं)इत्यस्य संवादि ।

**अर्चायां स्थण्डिलेऽग्नौ वा सूर्येप्सु हृदि वा द्विजे ।**
**द्रव्येण भक्तियुक्तोऽर्चेत् स्वगुरुं माममायया ।। ९ ।।**

अर्चायामित्यादि स्थानेषु पूजावैविध्यमेकादशाध्याये स्पष्टम् ।

**पूर्वं स्नानं प्रकुर्वीत धौतदन्तोऽङ्गशुद्धये ।**
**उभयैरपि च स्नानं मन्त्रैर्मुद्ग्रहणादिभिः ।। १० ।।**

‘पूर्वं स्नानं प्रकुर्वीत’ इत्यत्र स्नानं विना पूजा अपराधमिति सूचयति । ‘अस्नात्वा देवपूजायाः करणं शङ्कया विना’ इत्युक्तेः।।

**अस्थिरायां विकल्पः स्यात् स्थाण्डिले तु भवेद् द्वयम् ।**
**स्नपनं तु विलेप्यायामन्यत्र परिमार्जनम् ।। १४ ।।**

‘अथिरायां विकल्पः’ इत्यत्र अस्थिरप्रतिष्ठायां आवाहनविसर्जने विकल्पेन स्यातामित्यर्थः । श्रीमदाचार्यकरार्चितप्रतिमासु न स्यातामन्यत्र स्यातामिति व्यवस्थितविकल्पः अविगीतशिष्टाचारपरम्पराप्राप्तः ।।

‘स्नपनं तु’ इत्यत्र विलेप्यायां प्रतिमायां तु परिमार्जनमेव स्नपनमन्यत्र शिलादिप्रतिमायामभिषेचनमिति यथायोग्यं सम्बन्धः ।।

**स्नानालङ्करणं प्रेष्ठमर्चायामेव तूद्धव ।**
**स्थण्डिले तत्वविन्यासो वह्नावाज्यप्लुतं हविः ।। १६ ।।**

‘स्नानालङ्करणं प्रेष्ठम्’ इत्यनेन ‘अलङ्कारप्रियो विष्णुः’ इत्येतत् सूचयति ।।

**पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि देशिकः ।**
**हृदा शीर्ष्णाऽथ शिखया गायत्र्या वाऽभिमन्त्रयेत् ।। २१ ।।**

पाद्य-अर्घ्य-आचमनीयार्थं त्रीणि पात्राणि इत्यत्र तन्त्रसारोक्तदेवपूजायां यथा पञ्चपात्राणि आसाद्यन्ते एवं पञ्चरात्रोत्कपूजायां त्रीणि पात्राणि इति वेदितव्यम् ।।

**पाद्योपस्पर्शनार्घ्यादीनुपचारान् प्रकल्पयेत् ।**
**धर्मादिभिश्च नवभिः कल्पयित्वासनं मम ।। २४ ।।**

'धर्मादिभिश्च नवभिः' इत्यत्र धर्मादिभिः धर्म-ज्ञान-वैराग्य-ऐश्वर्य-अधर्म-अज्ञान-अवैराग्य-अनैश्वर्यैः नवभिः शक्त्यादिभिश्च इत्यर्थः ।। चकारेण गरुडादयो ग्राह्याः । विस्तरस्तु तन्त्रसारसङ्ग्रहे ।।

**स्वस्य धर्मानुवाक्येन महापुरुषविद्यया ।**
**पौरुषेणापि सूक्तेन धामनीरजनादिभिः ।। ३० ।।**

'धामनीराजनादिभिः' इत्यत्र धाम समुद्रसूक्तम्, नीराजनं पवमानसूक्तम्। 'पवस्वेति त्रिवर्गकम्' इति पद्यमालायां विशिष्योक्तम् ।।

**विधिना विहिते कुण्डे मेखलावर्तवेदिभिः ।**
**अग्निमाधाय परितः समूहेत् पाणिनोदितम् ।। ३५ ।।**

'विधिना विहिते' इत्यादिना अनुयागविधिः वर्णितो ज्ञातव्यः ।।

**ततः शेषां मया दत्तां शिरस्याधाय सादरम् ।**
**उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत् पुनः ।। ४६ ।।**

'ततः शेषां' इत्यत्र विष्णुनिर्माल्यस्य अवश्यग्रहणीयत्वमुक्तम् । निर्माल्यग्रहणं विना पूजाफलस्य असम्पूर्तेरिति गुरुपादाः ।।

## अथ अष्टविंशोऽध्यायः

**श्रीभगवानुवाच–**

**परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् ।**
**विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च ।। १ ।।**

**परस्वभावकर्माणि यः प्रशंसति निन्दति ।**
**स आशु भ्रंशते स्थानादसत्याभिनिवेशतः ।। २ ।।**

'परस्वभाव' इत्यत्र प्रशंस्यान् न निन्दयेत्, निन्द्यान् न प्रशंसेदित्यर्थः । प्रशंस्यानां निन्दाया निन्द्यानां प्रशंसाया अधर्महेतुत्वात् । अत एव 'असत्याभिनिवेशतः' इत्युत्तरश्लोक उक्तम् ।।

**संसारस्वरूपनिरूपणात् भगवद्योगेन तत्तरणवर्णनात् योगान्तराय-परिहारवर्णनाच्च भगवन्निष्ठत्वम् ।।**

## अथ एकोनत्रिंशोऽध्यायः

**नैवोपयान्त्यपचितिं कवयस्तवेश**
**ब्रह्मादयोपि नतमूर्द्ध सदा स्मरन्तः ।**
**योऽन्तर्बहिस्तनुभृतामशुभं विधुन्व-**
**न्नार्चार्यचैत्यवपुषा स्वगतिं व्यनंक्षि ।। ६ ।।**

'आचार्यचैत्यपवुषा' इत्यत्र चैत्यो चित्ताभिमानी ब्रह्मा । ब्रह्मान्तर्यामी सन् स्वयोग्यज्ञानं व्यक्तीकरोषीत्युक्त्या सर्वेषां मुक्तियोग्यानां साक्षान्मुक्तिसाधको ब्रह्मोपदेश इत्युक्तं भवति ।।

**देशान् पुण्यान् संश्रयेत मद्भक्तैः साधुभिः श्रितान् ।**
**देवासुरमनुष्येषु मद्भक्ताचरितानि च ।। १० ।।**

'देशान् पुण्यान् संश्रयेत' इति भगवता पुण्यदेशाश्रयणस्य विधानात् अपुण्यानां म्लेच्छदेशानामाश्रयेण भगवदप्रीतिः स्यादिति स्फुटमेव ।।

**विसृज्य स्वयमात्मस्थां दृश्यव्रीडां च दैहिकीम् ।**
**प्रणमेद् दण्डवद् भूमावाश्वचण्डालगोखरम् ।। १६ ।।**

'प्रणमेत्' इत्यत्र 'णमु प्रह्वत्वे' इति धातुः । श्वाद्यन्तर्यामिणि भगवति मनसा प्रह्वीभूयात् इति भाव इति गुरुपादाः । अवश्यमेवैतद्वेदित्व्यम् । श्वादीनां दण्डनमस्कारस्य निषिद्धत्वात् ।।

**श्रीभगवानुवाच–**

**गच्छोद्धव मयाऽऽदिष्टो बदर्याख्यं मदाश्रमम् ।**
**तत्र मत्पादतीर्थोदैः स्नानोपस्पर्शनैः शुचिः ।। ४१ ।।**

'मत्पादतीर्थैः' इत्यत्र पादतीर्थं उष्णकुण्डम् । तस्य भगवतो नारायणस्य पादोद्भवत्वात् ।।

**ईक्षयाऽलकनन्दाया विधूताशेषकल्मषः ।**
**वसानो वल्कलान्यङ्ग वन्यभुक् सुखनिःस्पृहः ।। ४२ ।।**

'ईक्षया अलकनन्दाया' इत्यनेन अलकनन्दादर्शमात्रेण शुचिकरत्वमुक्तं वेदितव्यम् ।।

**भगवत्प्राप्तिसाधनसुमङ्गलधर्मवर्णनेन भगवन्निष्ठत्वं बोध्यम् ।।**

**।। इति एकोनत्रिंशोऽध्यायः ।।**

## अथ त्रिंशोऽध्यायः

**ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः ।**
**प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् ।। २ ।।**

'तनुमत्यजत्' इत्यत्र अत्यजत् अतिशयेन अहरत् । अज हरणे इति धातुः ॥

**प्रद्युम्नसाम्बौ युधिरूढमत्सरा-**
**वक्रूरभोजावनिरुद्धसात्यकी ।**
**सुभद्रसङ्ग्रामजितौ सुचारुगदौ**
**सुमित्रासुरथौ समीयतुः ॥ १६ ॥**

'प्रद्युम्नसाम्बौ' इत्यत्र उभावपि कामांशौ परस्परं समीयतुः । अहो विष्णोर्मायाबलमिति भावः ॥

**अथ तावपि संक्रुद्धावुद्यम्य कुरुनन्दन ।**
**एरकामुष्टिपरिघैश्चरन्तौ जघ्नतुर्युधि ॥ २३ ॥**

'तावपि सङ्क्रुद्धौ' इत्यत्र क्रोधं प्रदर्शयन्तौ इत्यर्थः । कृष्णस्य क्रोधाभावात् बलभद्रस्येङ्गितज्ञत्वात् ॥

**श्रीभगवानुवाच–**

**मा भैर्जर त्वमुत्तिष्ठ काम एष कृतो हि मे ।**
**याहि त्वं मदनुज्ञातः स्वर्गं सुकृतिनां पदम् ॥ ३९ ॥**

'मा भैर्जर' इत्यत्र भृगुः पादताडनदोषात् नीचजन्म प्राप । तत्र शरारोपणरूपे नीचकर्मणि कृतेपि पश्चात्तापत्वात् स्वभावतः सज्जीवत्वात् भगवतोऽतिकरुणावत्वात् भगवता क्षान्तमिति द्रष्टव्यम् ॥

**यदुकुलसंहारूपभगवन्महिमावर्णनेन भगवन्निष्ठत्वं बोध्यम् ॥**

**इति त्रिंशोध्यायः**

## अथ एकत्रिंशोऽध्यायः

**मर्त्येन यो गुरुसुतं यमनीतलोकं**
**त्वां चानयच्छरणदः परमास्त्रदग्धम् ।**
**जिग्ये पुरेऽन्तकमपीशतनावनीशः**
**किं स्वावने स्वरनयन् मृगयुं सदेहम् ।। १२ ।।**

'मर्त्येन' इति श्लोके भगवतो मृतिर्नास्तीत्यत्र युक्तिचतुष्टयं दर्शितम् । तथाहि मृतगुरुसुतमानीय दक्षिणारूपेण दत्तवान् स्वयं कथं म्रियते । ब्रह्मास्त्रदग्धपरीक्षिदुज्जीवनकर्ता स्वरक्षणे नालं किम्? यममपि पारिजातहरणे यो जितवान् स कथं यमवशो भवति । स्वपादे बाणं प्रयुक्तवन्तं जरानामकव्याधमपि यः सशरीरं स्वर्गं यापितवान् स कथं शरीरं त्यजतीति ।।

**रामपत्न्याश्च तं देहमुपगुह्याग्निमाविशन् ।**
**वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन् हरेः स्नुषाः ।**
**कृष्णपत्न्योऽविशन्नग्निं रुग्मिण्याद्यास्तदात्मिकाः ।। २० ।।**

'कृष्णपत्न्योविशन्नग्निम्' इत्यत्रायं विवेकः । रुग्मिणी अग्नावन्तर्दधे । सत्यभामा वने अन्तर्दधे । तयोश्चिदानन्दतनुत्वात् न देहत्यागः । षण्महिष्यो योगाग्नौ देहं त्यक्तवन्त इत्येके । त्यक्तवत् कृष्णदर्शितं शरीरमादाय सहगमनं कृतवन्त इत्यपरे ।। काश्चिदग्नौ काश्चित् तपसा देहं त्यक्तवन्त इति भगवत्पादाः ।।

**भगवतो वैकुण्ठयात्रावर्णनपर्त्वात् भगवन्निष्ठत्वम् ।।**

**इति एकत्रिंशोध्यायः**

**इति एकादशस्कन्धः समाप्तः**

# अथ द्वादशस्कन्धः

## अथ प्रथमोऽध्यायः

भगवता भूत्यागानन्तरं दुष्टा राजानो भविष्यन्तीति भविष्यद्राजचरितवर्णनात् भगवन्महिमैव वर्णितो भवतीति भगदवन्निष्ठत्वम् ।।

## अथ द्वितीयोऽध्यायः

भगवत्सन्निधानराहित्येन कलेरधर्मभूयिष्ठत्वं कल्क्यवतारेण कृतयुग-प्रवर्तनं चेति वर्णनात् भगवन्निष्ठत्वम् ।।

## अथ तृतीयोऽध्यायः

कलेर्दोषनिधित्वेपि श्रीकृष्णस्मरणेन तद्दोषात्ययवर्णनात् भगवन्निष्ठत्वम् ।।

## ।। अथ चतुर्थोऽध्यायः ।।

भगवत्कर्तृकलयचतुष्टयवर्णनेन भगवच्चिन्तया तक्षकभक्षणदोष-निवृत्तेर्वर्णनेन च भगवन्निष्ठत्वम् ।।

## ।। अथ पञ्चमोऽध्यायः ।।

सूत उवाच–

इत्युक्तस्तमनुज्ञाय भगवान् बादरायणिः ।
**जगाम भिक्षुभिः साकं नरदेवेन पूजितः ।। ८ ।।**

भगवान् बादरायणिः भिक्षुभिः साकं जगाम इत्यत्र यतिभिः मृतदेहस्य

अदर्शनीयत्वात् शुकादयो जग्मुरिति भाव इति गुरुपादाः ।।

**इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः ।**
**बभूव सम्भ्रान्तमतिः सविमानः सतक्षकः ।। २२ ।।**

'स्थानादिन्द्रः' इत्यत्र इन्द्रः अर्जुनरूपस्य स्वस्य सन्ताने जातं जनमेजयं कीर्त्या योजयन् स्वयमेव स्वस्थानादवततारेति द्रष्टव्यम् ।।

**तं पतन्तं विमानेन सहतक्षकमम्बरात् ।**
**विलोक्याङ्गिरसः प्राह राजानं तं बृहस्पतिः ।। २३ ।।**

'प्राह राजानं तं बृहस्पतिः' इत्यत्र बृहस्पतिरपि सर्पयागान्निवर्तितु-मादिदेश । भारतोक्त्यनुसारेणास्तीकोपि जनमेजयेन दत्तवरस्तदेव ययाचे इति भारत-भागवतयोर्विरोधो नास्तीति सन्तोष्टव्यम् ।।।

**अन्ततो बाध्यबाधकतलक्षणाया भगवन्मायाया एव वर्णनात् भगवन्निष्ठत्वम् ।।**

## ।। अथ षष्ठोऽध्यायः ।।

**भगवत्प्रतिपादकवेदव्यञ्जनक्रमस्य भगवता भगवन्नोदित-तच्छिष्यप्रशिष्यैश्च कृतस्य वेदविभजनस्य पुराणप्रणयनस्य च वर्णनात् भगवन्निष्ठत्वम् ।।**

**।। इति षष्ठोऽध्यायः ।।**

**महाभागवतस्य मार्कण्डेयस्य चरितस्य वर्णनमुपरितनाध्यायत्रये ।**

**तत्र मार्कण्डेयकृतनरनारायणस्तोत्रेण सप्तमाध्यायो भगवन्निष्ठः । प्रलयरूपभगवन्महिमावर्णनेनाष्टमः । शिवमार्कण्डेयसंवादेनापि भगवन्महिमैव वर्णित इति नवमोपि ।।**

**एतत् केचिदविद्वांसो मायाप्रसृतमात्मनः ।**
**अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ।। ४१ ।।**

अत्र निषेध्यत्वेन भगवत्क्रियाणां कादाचित्कत्वस्योक्तेः भगवत्क्रियाया शक्त्यात्मना नित्यत्वं वर्णितं ज्ञातव्यम् । नित्यामेव प्रलयादिशक्तिं स्वेच्छया तत्तत्काले व्यक्तीकरोतीति तत्त्वम् । अतो मार्कण्डेयाय प्रदर्शितः प्रलयो नेन्द्रजालवत् कुहकः । किन्तु अचिन्त्याद्भुतैश्वर्येण जगद्व्यापारे प्रचलत्यपि प्रदर्शित इत्यवगन्तव्यम् । अस्मदादिबुद्ध्यगोचरत्वादेव युक्तिविरुद्धत्वादेवेशकृतमिति सन्तोष्टव्यम् । 'यद्धि युक्त्या विरुद्ध्येत तदीशकृतमेव हि' इति भगवत्पादोक्तेः ।।

**।। इति सप्तमाष्टमनवमाध्यायाः ।।**

## ।। अथ दशमोऽध्यायः ।।

**ओजस्सहोबलयुतं मुख्यतत्वं गदां दधत् ।**
**अपां तत्वं दरवरं तेजस्तत्वं सुदर्शनम् ।। १४ ।।**

'अपां तत्वं दरवरम्' इत्यत्र श्रीदेवी शङ्खः, भूदेवी पद्मम्, दुर्गादेवी चक्रम्, मुख्यप्राणो गदा , स एव पञ्चरूपी बाणः, विद्या शार्ङ्गं. रमा खड्गः, दुर्गा रूपान्तरेण चर्म इत्यन्यत्रोक्तमप्यनुसन्धेयम् । कामानिरुद्धौ च चक्रशङ्खरूपौ' इति च ।

**तन्त्रोक्तरीत्या अङ्गोपाङ्गायुधाकल्पवर्णनेन भगवन्निष्ठत्वम् ।।**

## ।। अथ एकादशोऽध्यायः ।।

**सूर्यमण्डलमध्यगस्य भगवतो द्वादशसूर्यादिषु स्वमात्मानं व्यूह्य स्थितस्य महिम्नो वर्णनात् भगवन्निष्ठत्वम् ।।**

## ।। अथ द्वादशोऽध्यायः ।।

उपसंहारव्याजेन श्रीमद्भागवतकथासङ्ग्रहात् भगवन्निष्ठत्वम् । 'इह तु पुनर्भगवानशेषमूर्तिः परिपठितोनुपदं कथाप्रसङ्गैः' इति स्वयमेवोक्तत्वात् समग्रं भागवतं भगवन्निष्ठमेवेति स्फुटमभूत् ।।

## ।। अथ त्रयोदशाध्यायः ।।

**निम्नगानां यथा गङ्गा देवानामच्युतो यथा ।**
**वैष्णवानां यथा शम्भुः पुराणानामिदं तथा ।। १५ ।।**

शम्भुः चतुर्मुखः । 'शम्भुश्चतुर्मुखः पद्मः' इति कोशात् । छिन्नवैष्णवानां यथा शम्भुः शिवः इति वा व्याख्येयम् ।।

**कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा**
**तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणे ।**
**योगीन्द्राय तदात्मनाऽथ भगवद्राताय कारुण्यत-**
**स्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ।। १८ ।।**

'कस्मै येन' इति श्लोकेन ऋषिपरम्परोक्ता वेदितव्या । तत्स्मरणस्यावश्यकत्वादध्येतृणाम् ।।

**भवे भवे यथा भक्तिः पादयोस्तव जायते ।**
**तथा कुरुष्व योगेश नाथस्त्वं मे यतः प्रभो ।। २१ ।।**

नाथः नियामकः । अनेन 'धियो यो नः प्रचोदयात्' इत्यस्यार्थः उक्तो वेदितव्यः । तेन धीमहीति प्रथमश्लोकोक्तेन एकवाक्यत्वं बोध्यम् ।।

**नामसङ्कीर्तनं यस्य सर्वपापप्राणाशनम् ।**

**प्रणामो दुःखशमनस्तं नमामि हरिं परम् ।। २२ ।।**

**इति श्रीभागवते महापुराणे पारमहंस्यां वैयासक्यामष्टदशसाहस्र्यां संहितायां द्वादशस्कन्धे सूतोक्तौ त्रयोदशोध्यायः ।**

'नामसङ्कीर्तनम्' इत्यत्र नाम रामकृष्णादि । 'नाम वा एताः सर्वा विद्या' इति श्रुतेः ऋगादिविद्याकीर्तनं वा ।। 'दुःखशमनम्' इत्यत्र दुःखं संसारः । तस्य सुखदुःखरूपत्वात् । 'दुः दुःखमिति सम्प्रोक्तं खं सुखं प्रोच्यते बुधैः' इत्युक्तत्वात् ।।

**भगवदेकनिष्ठभागवतमहिम्नो भागवतागतिक्रमस्य च वर्णनात् भगवन्निष्ठत्वं बोध्यम्।।**

**।। इति श्रीद्वादशस्कन्धगतप्रमेयसङ्ग्रहः ।।**

प्रत्यध्यायं भगवति निष्ठत्वस्य सुवर्णनात् ।
भगवन्मध्वहृद्धामा भगवान् प्रीयतां मम।।

मृत्यो माविश मा रुद्रेत्यर्थितस्तु पुरा मया ।
प्रौढभागवतस्याप्तिं कृतवान् भगवान् किल ।।

शतश्लोकीभागवतस्याप्तेः प्रार्थन ईदृशे ।
दुराशा स्यादिति भया प्रणम्य विररामि तम् ।।

।। इति प्रौढभागवते द्वादशस्कन्धः समाप्तः ।।